THE AITAREYA UPANISHAD

WITH

SHRI SHANKAR'S COMMENTARY

(Also contains First Three Chapters of Second Book of Aitareya Aranyaka)

ऐतरेयोपनिषत्

श्रीशाङ्करभाष्यसंयुता

(ऐतरेयद्वितीयारण्यकस्य प्रथमाध्यायत्रयेण सह)



ADHYĀTMA PRAKĀSHA KARYĀLAYA

Public Charitable Trust

Holenarasipura - 573 211, Karnataka - INDIA

2008

Visit us at www.adhyatmaprakasha.org


First Edition 2008
1000 Copies

Pages:
Part I : XIV + 101
Part II : XXV + 90

Rs : 60/-

Composed by
Nataraj. K. Hulamani
No. 33. Shivanand Nagar,
Navanagar.
Hubli
Ph 94495 73443

Printed at
SRI RAMA PRINTERS
No. 25, 15h Cross,
Srinidhi Layout.
Bangalore-62.



Sri Nityananda Saraswathi Swamiji

PUBLISHERS' NOTE

Adhyatma Prakasha Karyalaya is happy to place in the hands of the readers a unique two part book that contains all the six chapters of the Second Book of Aitareya Aranyaka.

The Aitareya Aranyaka of the Shakala School of Rigveda consists of Five Books, each called an Aranyaka. Of these, the Second Aranyaka has six chapters and is called by the name 'Bahvrcha-brahmanopanishad'. It contains meditations on Prana in the first three chapters and knowledge of the Self in the last three chapters.

The portion of the Second Aranyaka dealing with the Knowledge of the Self is customarily called as Aitareya Upanishad. It is well known that there exists a Shankara Bhashya for this portion of the Sencond Aranyaka. The Karyalaya has published during 1945, the Aitareya Upanishad with the Bhashya edited by H.H.Sri Satchidanandendra Saraswati Swamiji. This edition included Swamiji's Kannada translations, a scholarly introduction, short notes, summary of the chapters and many other facilities for the reader. This book has been reprinted twice, during 1975 and 1993.

In his introduction to the above book, Sri Swamiji stated that it is probable that Sri Shankara wrote commentary for all the six chapters of the Second Aranyaka, and advanced several reasons for the same. For more details on Swamiji's reasons, the readers are referred to the Bhumikas in Sanskrit or the Preface in English, in the present book.

Sri Swamiji also stated that he was in possession of a hand written manuscript titled 'Sri Shankaracharya Krita Bhashyam', comprising a Bhashya on all the six chapters. In that manuscript, the

Bhashya for the last three chapters is same as the now famous Shankara Bhashya on the Aitareya Upanishad. However, Sri Swamiji refrained from publishing the manuscript immediately, as in his opinion, the authenticity of the Bhashya for the first three chapters in the manuscript as well as in additional manuscripts which might come to light in future needed to be carefully examined before deciding to attribute the Bhashya to Sri Shankara. The Karyalaya reverentially holds on to the Swamiji's view.

In the opinion of Sri Swamiji, however, it is essential to read all the six chapters of Second Aranyaka as a whole in order to understand the Upanishad Bhashya. This is because Shankara in his discussion has considered the contents of the six chapters as a whole. Also, the relationship of the first three chapters are seen to have been discussed in the Bhashya and several statements from them are quoted in the Bhashyas on other Upanishads and the Brahmasutras. Therefore, the Karyalaya thought it beneficial for the reader if all the six chapters of the Book are printed as a single book.

The present book has been brought out in Devanagari script for the benefit of readers not knowing Kannada, and it contains two parts. The first part contains the first three chapters along with the Bhashya found in the manuscript. The titles 'Bahvrcha-brahmanopanishad prarambhah' in the beginning of first part and 'Aitareyaopanishad' for both the parts are used as these terms are in vogue. The title 'Sri Shankara Bhashya Sametha' in the beginning of the first part is as per manuscript. This part, however, contains minimum facilities in terms of short notes, etc,.

The second part of the book has all the facilities like an introduction, short notes, summary of chapters, lists of mantras and words, etc., as in the Kannada edition. The Bhashya parts numbers

here are same as found in the Kannada edition. It is important to note that these numbers are kept independent of similar numbers in the first part.

The readers may also note that two different chapter numbers are indicated at the top right hand corner of the pages in the second part. One of them is exclusive to this part, treating the chapters in this part as 1, 2 and 3. The other is in the Aranyaka order, according to which the chapter numbers in this part are 4, 5 and 6.

The Karyalaya expresses its profound gratitude to all the saints, scholars and others who have rendered selfless services in bringing out this volume. Sri Nataraj K Hulamani has done an excellent composing job. Printing is by Sri Rama Printers. May the blessings of Sadguru shower always on all of them.

We solicit the opinion of discerning readers on this book and on all the activities of the Karyalaya. We conclude this note remembering the lotus feet of Sri Swamiji who rendered a yeomen service in the field of Vedanta and laid a firm foundation in the form of Adhyatma Prakasha Karyalaya for its propagation.

PUBLISHERS

सीतम्मा-कृष्णमूर्ति पब्लिक् चारिटबल् ट्रस्ट्-होळेनरसीपुरम्
संस्थापकाः- श्री श्री नित्यानन्देन्द्रसरस्वतीस्वामिनः
एषां संक्षिप्त परिचयः

श्रीमान् लक्ष्मीनारायणः इति सरलसुसंस्कृतपुरुषः आसीत् । तस्य पितामहः श्री लक्ष्मीनारायणप्पः, सः "बब्बूर्कम्मे" इति कर्णाटकब्राह्मणान्तर्विभागे जातः । श्री लक्ष्मीनारायणप्पस्य एकमात्रः पुत्रः श्री कृष्णमूर्तिरिति ।

एते सर्वे पूर्वं कर्णाटकस्य चिक्कमगलूरुनगरे बसवनहळ्ळीतिप्रान्ते न्यवसन् मध्यमया वृत्त्या च एते जीवन्तः आसन् । कृष्णमूर्तिस्तु मैसूरुनगरे आधुनिकप्रौढविद्याभ्यासं समाप्य सीतम्मानाम्नीं कन्यामुदवहत् । सा सीतम्मा श्री शिवरामस्य पुत्री, एष तु शिवरामः श्री श्री सच्चिदानन्देन्द्रसरस्वतीस्वामिनाम् अग्रजः । श्रीमतीश्रीमातोः सीतम्मा-कृष्ममूर्त्योः एवायं कुमारः श्रीमान् लक्ष्मीनारायणः, अयं तु १५-९-१९३०तमे वर्षे जातः । अस्य द्वौ अनुजौ तिस्रः भगिन्यश्चासन् । अस्मिन् बृहत्कुटुम्बे जातो लक्ष्मीनारायणः प्रौढविद्याभ्यासार्थं बेङ्गलूरुनगरं गतवान् । तत्र सम्यक् पठित्वा तान्त्रिकविद्यालये B.E. परीक्षां प्रथमश्रेण्या उत्तीर्णः सन् स्वर्णपदकं प्राप्तवान् । भारतीयरैल्वेसंस्थायाम् अन्यास्वपि च संस्थासु क्रमशः उद्योगं लब्ध्वा तेषु प्रामाणिकतया निर्वञ्चनेन च कर्तव्यमूढ्वा सर्वत्र यशः प्राप्तवान् । अनन्तरं सद्वंशात् कन्यामानीय ऊढवानपि दैवसंकल्पानुरोधेन, सा कन्या पञ्चत्वं गता । जन्मान्तरसंस्कारवशात् पुनर्विवाहमकृत्वा ऐहिकभोगेऽपि विरक्तः सन् अध्यात्मसाधनरूपजीवनमन्ववर्तत । यावत्पर्यन्तं उद्योगे आसीत्, भूपाल्नगरे, तावत् पर्यन्तमपि भक्तिज्ञानवैराग्यादिकं अधिगम्य कर्मसु फलेषु च असङ्गतयैव प्रावर्तत । स्वदेशभक्तिः दीनजनेष्वादरः, अतिथ्यभ्यागतेषु संभ्रमश्च तस्मिन् अनितर-साधारण्येन आसीत् । अस्मद्देशस्य स्वातन्त्र्यानयनान्दोलनेऽपि तप्य पात्रमासीत् । तेन परीक्षया यत् स्वर्णपदकं प्राप्तं तत्पुनः स्वराष्ट्रियनिध्यर्थं प्रत्यर्पितम् ।

इतःपरम् लक्ष्मीनारायणस्य बहुवचनेन प्रयोगः। यदा ते द्विपञ्चाशद्वर्षीयाः आसन् उद्योगादिसर्वविधलौकिककर्मसु निर्विण्णा अभवन्। ततः बेङ्गलूरुनगरमागम्य तत्र श्री श्री सच्चिदानन्देन्द्रस्वामिनाम् शिष्या अभवन्। तत्र तेभ्यः ते कांश्चिन्मासान् उपनिषदः शाङ्करं भाष्यं चाधीतवन्तः। अनन्तरं १०-५-१९७५ तमे पारमहंस्याश्रमं प्राप्य श्री श्री सच्चिदानन्देन्द्रस्वामिभिरेवोपदिष्टाः ये यतिधर्माः, तांश्च पालयन् अध्यात्म-विद्यारता अभवन्।

यदा श्री श्री सच्चिदानन्देन्द्रस्वामिनः पार्थिवशरीरं त्यक्तवन्तः तदा तेनैव पार्थिवशरीरेण साकं होळेनरसीपुरमागत्य स्वगुरोर्यतिसंस्कारानन्तरं तत्रैव आ स्वशरीर-मोक्षणपर्यन्तमासन्। एतेऽपि १०-७-१९९७ तमे सिद्धिङ्गताः। एतेषां समाधिः होळेनरसीपुरस्य हेमावत्याः तीरे मारुतिदेवालयस्य पश्चात् वर्तते।

एतैः स्वकीयोद्योगसमये यावद्धनं संपादितं तत्सर्वं स्वमातापित्रोः नाम्ना श्रीमती सीतम्माकृष्णमूर्तिपब्लिक्चारिटबल्ट्रस्ट्(संस्था) स्थापितम्। इदानीमपि एषा संस्था शिवमोग्गासमीपे मत्तूरुग्रामे श्रीसच्चिदानन्दवेदवेदान्तसंस्कृतपाठशालाद्वारा अनेकेषां विद्यार्थिनां संस्कृत-वेद-वेदान्त-धर्मशास्त्र-श्रौताध्ययनादिके आनुकूल्यं कल्पयन्ती वर्तते। अतोऽस्य महत्कार्यस्य मूलकारणं श्री श्री नित्यानन्देन्द्रसरस्वतीस्वामिनाम् महदौदार्यमेव। एतत्संस्थाद्वारैव श्री श्री सच्चिदानन्देन्द्रसरस्वतीस्वामिभिः रचितं 'परमार्थचिन्तामणि', 'वेदान्तविचारद इतिहास' इति कन्नडपुस्तके मुद्रापिते। इदानीं तु एतत्संस्थाद्वारैव ऐतरेयोपनिषत् (षडध्यायात्मिका शाङ्करभाष्यसमेता) ग्रन्थः मुद्राप्यते। तदर्थमेतया संस्थया पञ्चचत्वारिंशत् सहस्राणि रूप्यकानि दत्तानि। ईदृश-महत्पुण्यतमकर्म कृतवद्भ्यः सीतम्माकृष्णमूर्तिपब्लिक्चारिटबल्समित्याः सदस्येभ्यः वयम् अध्यात्मप्रकाशकार्यालयसमितिसदस्याः हार्दं धन्यवादं समर्पयामः।

इति विश्वस्तसमितिः

Part I

ग्रन्थविभागक्रमः

(अत्रत्यसंख्या पृष्ठसूचिकाः)

Part II

ग्रन्थविभागक्रमः

(अत्रत्यसंख्या पृष्ठसूचिकाः)

Part I

प्रथमः भागः

ऐतरेयद्वितीयारण्यके अध्यायाः १,२,३

विषयानुक्रमणिका

प्रथमोऽध्यायः

प्रथमः खण्डः

द्वितीयः खण्डः

तृतीयः खण्डः

चतुर्थः खण्डः

पञ्चमः खण्डः

षष्ठः खण्डः

द्वितीयः खण्डः

तृतीयः खण्डः

चतुर्थः खण्डः

पञ्चमः खण्डः

षष्ठः खण्डः

सप्तमः खण्डः

अष्टमः खण्डः

|| श्री शाङ्कर भाष्य समेता ||

ऐतरेयोपनिषत्

[1]ओं वाङ्मे मनसि प्रतिष्ठिता मनो मे वाचि प्रतिष्ठितमविरावीर्म एधि वेदस्य म आणीस्थः श्रुतं मे मा प्रहासीरनेनाधीतेना-होरात्रान्संदधाम्यृतं वदिष्यामि सत्यं वदिष्यामि तन्मामवतु तद्वक्तारमवतु, अवतुमामवतु वक्तारम् | अवतु वक्तारम् || ओं शान्तिः शान्तिः शान्तिः ||

अवतरणिकाभाष्यम्–उपनिषच्छब्धार्थविवरणम्

१. *एष पन्था* इत्याद्या बह्वृचब्राह्मणोपनिषत् | तस्या इदं विवरणमल्पग्रन्थं सुखबोधार्थमारभ्यते | उपनिषदित्युपनिपूर्वस्य सदेः क्विबन्तस्य विशरणगत्यवसादनार्थस्य रूपमाचक्षते | विशेषेण च उपनिषच्छब्दवाच्या आत्मविद्या | तादर्थ्याद्ग्रन्थोऽप्युपनिषत् | ये ह्यस्या-मात्मविद्यायां तात्पर्येणात्मतया वर्तन्ते आत्मविद्यानिष्ठाः तेषामविद्यादि संसारबीजदोषमवसादयति, विनाशयति, परं चात्मानं निगमयत्यवबोधयति, गर्भजन्मजरारोगादींश्च निशातयति | अत इयमात्मविद्या उपनिषत् | तदुपकारकत्वात् प्राणादिविद्यानामपि उपनिषत्त्वम् | सोऽयमात्मविद्या-

---

1. इयं शान्तिर्द्वितीयारण्यकस्य सप्तमाध्यायरूपा | अस्याः स्थाने ओं भूमिमुपस्पृश्येत्यादि वाग्रस इत्यन्तं शान्तिपठनं संप्रदायस्वीकृतं क्वचिद्दृश्यते |

विष्करणाय *एष पन्था* इत्यादिग्रन्थो व्याचिख्यासितः ॥

२. [1]यदि ब्रह्मविद्याप्रतिपत्त्यर्थोऽयमारम्भः, किं महाव्रतविषयविज्ञान प्रस्तावेन? इदमेवारब्धव्यम् - *आत्मा वा इदमेक एवाग्र आसीत्* (४-१ ऐ.आ. २-४-१) इति । अत्रेदं प्रयोजनं मन्यते श्रुतिः - महाव्रतं कर्म सर्वकर्मसन्दोहलक्षणं सर्वात्मनो हिरण्यगर्भस्य प्राप्तिकारणम् । तथा च वक्ष्यति - *एष वै यज्ञे यज्ञोऽहन्यहर्देवेषु देवोऽध्यूळ्हो यदेतन्महदुक्थम्* (ऐ.आ. २-३-४) (इति) । फलं चास्य विज्ञानसंयुक्तस्य-*प्रज्ञामयो देवतामयो ब्रह्ममयोऽमृतमयः । सम्भूय देवता अप्येति य एवं वेद* (ऐ.आ. २-२-४) इति देवताप्ययलक्षणम्, संसार एव, अशनायापिपासादिमत्त्वात् देवतानाम् । तस्मात् ज्ञानसंयुक्तादपि कर्मणो नात्यन्तिकी संसारनिवृत्तिः । आत्मज्ञानादेव केवलात् संसारनिवृत्तिः इत्येतत्प्रयोजनम् । वक्ष्यति च *ता एता देवताः सृष्टा अस्मिन् महत्यर्णवे प्रापतंस्तमशनापिपासाभ्यामन्ववार्जत् । ता एनमब्रुवन् आयतनं नः प्रजानीहि यस्मिन् प्रतिष्ठिता अन्नमदामेति, स इतः प्रयन्नेव पुनर्जायते* (ऐ.आ. २-४-२) इति चोक्त्वा आत्मज्ञानादेव अमृतत्वप्राप्तिमुपसंहरिष्यति, *स एतेन प्राज्ञेनात्मनास्माल्लोकादुत्क्रम्य अमुष्मिन् स्वर्गे लोके सर्वान्कामानाप्त्वा अमृतः समभवत् समभवत्* (ऐ.आ. २-६-१)इति । तस्मात् -

---

1. इतः पूर्वं लिखितपुस्तके **तस्य कर्मकाण्डेन संबन्धोऽभिधीयते । सर्वोऽप्ययं वेदः** इत्यारभ्य **तद्विपरीतब्रह्मविद्याप्रतिपत्त्यर्था उपनिषदारभ्यते**-इत्येतदन्तो बृहदारण्यकोपनिषद्भाष्यावतरणिकाभागो केनचित् प्रक्षिप्त उपलभ्यते ।

प्रथमोऽध्यायः - प्रथमः खण्डः

बह्वृचब्राह्मणोपनिषत्प्रारम्भः

आत्मज्ञानमाहात्म्यम्

**एष पन्था एतत् कर्मैतद्ब्रह्मैतत्सत्यम् । तस्मान्न प्रमाद्येत्तन्नातीयात् ।
न ह्यत्यायन् पूर्वे येऽत्यायंस्ते परा बभूवुः ॥ १ ॥**

अप्रमत्तैः आत्मज्ञानाय प्रयतितव्यम्

३. एष पन्था अमृतत्वप्राप्तये यदेतदात्मज्ञानम् । एतदेव कर्म कर्तव्यत्वात्सर्वैः[1]? यज्ञदानतपोभिः पुण्यैः कर्मभिर्यमनियमैश्चात्मज्ञानमुत्पाद्यमित्यर्थः । तद्धि (स हि ?) पन्था मार्गोऽमृतत्वगमनाय । *नान्यः पन्था विद्यतेऽयनाय* (तै. आ. ३-१३) इति मन्त्रवर्णात् । *तद्ध्यग्रं सर्वविद्यानां प्राप्यते ह्यमृतं ततः* ।(मनु. १२-८५) इति च मनुस्मृतेः । एतद्ब्रह्म, तत्प्राप्तिफलत्वात् । एतत्सत्यं परमार्थसदात्मनो विषयत्वात् ॥ वाचारम्भणमात्रविकारानृतविषयाणि हि इतराणि ज्ञानानि ॥

४. तस्मादस्मादात्मज्ञानमार्गान्न प्रमाद्येत - प्रमादो न कर्तव्यः । प्रमादस्तदतिक्रमः । अतस्तन्न कुर्यादित्यर्थः ।[2] तत् तं पन्थानं नातीयात्-नातिगच्छेत् । तदतिगमनं च दोषः । तस्मात् तन्न कुर्यात् । यस्माद्धि पूर्वे अतिक्रान्ता ब्राह्मणाः न हि तं मार्गं अतीत्यायन् (अत्यायन्?) नातिगतवन्त

---

1. सर्वैर्हि इति मूले
2. 'प्रमाद्यतः किं स्यादित्युच्यते' इत्यधिकं मूले ।

इत्यर्थः | प्रमाद्यतः किं स्यादिति ? उच्यते-येऽस्मान्मार्गाद्भ्रष्टा अत्यायंस्ते पराबभूवुः-पराभूताः कर्मज्ञानानुष्ठानं प्रत्ययोग्याः संवृत्ता इत्यर्थः | स हि तेषां पराभवः | तस्मात् पूर्वेषां पन्थानं ज्ञानकर्मानुष्ठानमप्रमत्तोऽनुपातयेत् ||

आत्मज्ञानानधिकारिणः

तदुक्तमृषिणा-

प्रजा हि तिस्रो अत्यायमीयुर्न्यन्या अर्कमभितो विविश्रे | बृहद्ध तस्थौ भुवनेष्वन्तः पवमानो हरित आविवेशेति || (ऋ. मं. ८ सू १०१ ऋ १४) || २ ||

तिस्रः प्रजाः कर्मणः ज्ञानात् च प्रच्युताः

५. (तद्)ब्राह्मणोक्तमर्थजातं ऋषिणा मन्त्रेणाप्युक्तम् | किं पुनस्तदर्थजातम्? य इमं पन्थानमतिक्रान्तास्ते पराभूताः, ये तु कर्म-ज्ञानानुष्ठाने प्रवृत्तास्तेऽस्मात् पथोऽनपेता आत्मज्ञानयोग्या (जाता) इतीममर्थं प्रदर्शयन्नाह-प्रजा ह तिस्र इत्यादि | प्रजाः प्रजननात् | ह इति वृत्तावद्योतको निपातः | तिस्रः त्रिसङ्ख्याका राशिभेदेन | किमित्याह-अत्यायम्-अतिगमनम् ईयुः गतवत्यः | तिस्र प्रजा ज्ञानायोग्यतां गता इत्यर्थः | याः पुनरन्यास्ता अर्कम् अग्निम् अभितः उभयतः कर्मणा ज्ञानेन चेत्यर्थः | अभि नि विविश्रे अभिनिविष्टाः | कर्मज्ञानाभ्यामग्निमाश्रिता इत्यर्थः | किं च बृहत् महानित्यर्थः | ह तस्थौ स्थितवान् भुवनेषु | भवन्त्येषु भूतानीति लोका भुवनशब्दवाच्याः, तेषु | अन्तः मध्ये तस्थौ महान् सविता

लोकप्रकाशकृद्देव इत्यर्थः। तं च काश्चित् अभिनिविविश्र इत्यनुषङ्गः। पवमानो वायुः हरितो दिशः, आविवेश प्रविष्टः। यश्च वायुर्दिक्षु प्रविष्टस्तं च काश्चित् अभिनिविविश्रे ॥

प्रजा ह तिस्रो अत्यायमीयुरिति वै ता इमाः प्रजास्तिस्रो अत्यायमायंस्तानीमानि वयांसि वङ्गावगधाश्चेरपादाः। न्या१न्या अर्कमभितो विविश्र इति ता इमाः प्रजा अर्कमभितो निविष्टा इममेवाग्निम्। बृहद्ध तस्थौ भुवनेष्वन्तरित्यद उ एव बृहद् भुवनेष्वन्तरसावादित्यः। पवमानो हरित आ विवेशेति वायुरेव पवमानो दिशो हरित आविष्टः ॥ ३ ॥

पूर्वमन्त्रस्यैव विवरणम्

६. काः पुनस्तास्तिस्रो (येऽ)त्यायमीयुरिति मन्त्रोक्तार्थं ब्राह्मण-मन्वाचष्टे। या वै ता इमाः प्रजास्तिस्रो अत्यायमायन् ता वक्ष्याम इति वाक्यशेषः। तानीमानि वयांसि पक्षिणो यान्यप्यन्यानि गतिमन्ति भूतानि। वेः गत्यर्थत्वाद्धातोः। कर्मज्ञानायोग्यानि वयःशब्देनोच्यन्ते। तानि वयांसि तिसृणामेको राशिः। वङ्गावगधा वङ्गाश्च अवगधाश्च वङ्गावगधाः। वङ्गाः वनगमनाद्वर्णलोपेन। वनगा इत्येतत्। वानस्पत्यादयो महान्तः स्थावरा इत्यर्थः। अवगधाः क्षुद्रस्थावराः, व्रीहियवाद्या ओषधयः। अवतेर्धातोः पालनार्थस्य गृध्यतेश्च मिश्रीभावकर्मणो रूपम् *अवगधा* इति। अवनेन प्रयोजनेन, जङ्गमैः प्राणिभिरन्नभूताः सन्त आत्मानं मिश्रयन्तीति *अवगधाः*।

चशब्दः समुच्चयार्थः। एवं स्थावराश्चैको राशिरित्यर्थः। इरपादा इत्युरः पादाः। इकारस्योत्वमापाद्य विसर्जनीयोपसर्जनं कृत्वा। उरःपादा इति सर्पादयो गृह्यन्ते। एवमेतास्तिस्त्रः प्रजा अत्यायमीयुः कर्मज्ञानमार्गात् परिभ्रष्टा इत्यर्थः। प्रत्युद्धारश्चासामत्यन्तदुर्लभः। **तस्मात् पापकर्मणो जुगुप्सेत्, श्रेयसो मार्गान्न प्रमाद्येदिति वैराग्यहेतोरिदं वचनम्॥**

७. न्य१न्या अर्कमभितो विविश्र इति ता इमाः प्रजा अर्कमभितो निविष्टाः इति व्याख्यातम्। अर्कमितीममेवाग्निम् यं कर्मपरा अर्चयन्ति॥

बृहद्ध तस्थौ भुवनेष्वन्तरित्यद उ एव असावेवेत्यर्थः। बृहत् भुवनेष्वन्तरसावादित्यो नान्यस्तस्थौ महान् महत्त्वं हि प्रसिद्धं सवितुः। व्याख्यातमन्यत्॥

पवमानो हरित आविवेशेति वायुरेव पवमानो, दिशो हरित आविष्टः इति ऋग्विवरण एवोक्तम्॥

॥ इति प्रथमः खण्डः॥

अथ द्वितीय खण्डः

प्राणस्वरूपनिर्धारणम्-आधिदैविकत्वेन, आध्यात्मिकत्वेन च

८. अत्र अनन्तरातीतग्रन्थे महाव्रताख्यं कर्म अधिगतम् यस्मिन् महदुक्थाख्यं शास्त्रं बृहतीसहस्रलक्षणं शस्यते। तत् कर्म उक्थशस्त्रोप-लक्षितम् अनेकलोककालदेवतादिभेदनविशिष्टस्य उक्थनाम्नः प्राणस्य विज्ञानेन समुच्चिचीषितम् इति सप्रपञ्चप्राणनिर्दिधारयिषया इदमाह-

उक्थमुक्थमिति वै प्रजा वदन्ति तदिदमेवोक्थमियमेव पृथिवीतो हीदं सर्वमुत्तिष्ठति यदिदं किं च | तस्याग्निरर्कोऽन्नमशीतयोऽन्नेन हीदं सर्वमश्नुते | अन्तरिक्षमेवोक्थमन्तरिक्षं वा अनु पतन्त्यन्तरिक्ष-मनुधावयन्ति तस्य वायुरर्कोऽन्नमशीतयोऽन्नेन हीदं सर्वमश्नुते | असावेव द्यौरुक्थममुतः प्रदानाद्धीदं सर्वमुत्तिष्ठति यदिदं किं च | तस्यासावादित्योऽर्कोऽन्नमशीतयोऽन्नेन हीदं सर्वमश्नुते || १ ||

लोकत्रयस्य उक्थत्वम्

९. उक्थमुक्थमित्यादि | अनिर्धारितार्थयाथात्म्यमिदं पदं ऋग्वेदपराः प्रजा वदन्ति | किं तत्? उक्थमिति शब्दमात्रमेव केवलं न त्वस्यार्थः केवलैर्याज्ञिकैरवगत इत्यर्थः | वैशब्दः प्रसिद्धावद्योतको निपातः | यश्चोक्थशब्दस्यार्थस्तमिह प्रदर्शयिष्याम इत्यभिप्रायः | किं पुनस्तत् | इदमेव तावदुक्थमितीयमेव पृथिवी, कथं पुनरुक्थशब्दः शास्त्रे प्रसिद्धः पृथिव्यां प्रयुज्यत इति? उच्यते | परशब्दस्य परत्र प्रवृत्तस्य सामान्यं किंचिद्वक्तव्य-मित्याह-अस्ति चोक्थेन पृथिव्याः सामान्यम् | इतो हि यस्मादिदं (सर्वम्) स्थावरजङ्गमञ्चोत्तिष्ठति उत्पद्यते यदिदं किञ्च यत्किञ्चेदम् | अतोऽस्त्युकार-थकारयोगः पृथिव्या उक्थस्य च सामान्यम् | किं च तस्यास्य पृथिव्युक्थस्य अग्निरर्कः | किं चान्नमशीतयः तिस्रस्तृचाशीतयोऽन्नसंस्तुता उक्थे | तथात्रास्यान्नमेवाशीतयः | कथमित्याह अन्ने हि यस्मादिदं सर्वं प्राणिजातमश्नुते व्याप्नोति | अन्नवान् लोके प्रभविष्णुर्भवति | अश्नोते-

रशीतयोऽन्नम् | तृचाशीतीनां चेन्द्रस्यान्नत्वं वक्ष्यति |---- *स हान्नमित्यभिव्याहृत्य बृहतीसहस्रं शशंस* (ऐ.आ. २-२-३)इति ||

१०. तथान्तरिक्षमेवोक्थम् | उक्थत्वेन कारणमाह | अन्तरिक्षं वा अनुपतन्ति | अन्तरिक्षमेव लक्षयित्वा गच्छन्ति | तथान्तरिक्षमनुधावयन्ति धावन्ति | तदुभयमुत्थानपूर्वकमित्युक्थशब्दलाभे कारणम् | अन्तरिक्षस्य तस्य वायुरर्कोऽन्नमशीतयोऽन्नेन हीदं सर्वमश्नुत इति पूर्ववत्सर्वम् ||

११. असावेव द्यौरुक्थम् | (अमुतः)अमुष्माद्दिवः समुत्थितात् प्रदानात् वृष्ट्यादिलक्षणात्, हि यस्मात्, इदं स्थावरं जङ्गमं च सर्वमुत्तिष्ठति यदिदं किं च | तस्मात् द्यौरुक्थशब्दवाच्या | तस्याप्युक्थशब्दवाच्यस्य असावादित्योऽर्कोऽन्नमशीतयोऽन्नेन हीदं सर्वमश्नुत इति पूर्ववत् ||

इत्यधिदैवतमथाध्यात्मम् || २ ||

१२. इत्येवं देवताविषयदर्शनम् अधिदैवतम् उक्तम् | अथ अनन्तरम् अध्यात्ममुच्यते ||

पुरुषस्य आध्यात्मिकं उक्थत्वम्

पुरुष एवोक्थमयमेव महान् प्रजापतिरहमुक्थमस्मीति विद्यात् | तस्य मुखमेवोक्थं यथा पृथिवी तथा तस्य वागर्कोऽन्नमशीतयोऽन्नेन हीदं सर्वमश्नुते | नासिके एवोक्थं यथान्तरिक्षं तथा | तस्याः प्राणोऽर्कोऽन्नमशीतयोऽन्नेन हीदं सर्वमश्नुते | तदेतद्ब्रध्नस्य विष्टपं यदेतस्मिन्नासिकायै विनतमिव | ललाटमेवोक्थं यथा द्यौस्तथा तस्य चक्षुरर्कोऽन्नमशीतयोऽन्नेन हीदं सर्वमश्नुते || ३ ||

१३ पुरुष एवोक्थम्। कः पुनरसौ पुरुष इति ? आह य एष प्रसिद्धः शिरःपाण्यादिमान्। कथं तस्योक्थत्वमिति। उच्यते-यतोऽयं महान् प्रजापतिः । महत्त्वं प्रजापतित्वं च तस्य वक्ष्यति -*अथातो विभूतयोऽस्य पुरुषस्य* (ऐ.आ. २-१-७) इत्यादिना। यस्मात् महानयं प्रजापतिः पुरुषो ज्ञानकर्मसाधनत्वेन जगदुत्पादकत्वात् तस्मादुक्थम्। यस्मादेवं तस्मादात्मानमेव पुरुषो विद्यात् *अहमुक्थमस्मि* इति। पुरुषं ह्यन्तरतमं यां यामवस्थामुपनेष्यन्ति आ परब्रह्मप्रतिपत्तेः, तां तामवस्थामहमुक्थ-मस्मीत्येवं विद्यादित्येवमर्थो विज्ञानप्रारम्भ इहादौ प्रयुज्यते विधिः - अहमुक्थमस्मीति विद्यादिति। उक्थशब्दः पृथिव्यादौ स्थूले प्रयुक्तोऽन्तरतमे प्राणे कथमुक्थत्वेन संस्थास्यत (इति)। *इयमेव पृथिवी* इति प्रस्तुतस्य *तदेतदुक्थाः३प्राण एव* (ऐ.आ. २-१-४) इति निर्धारणश्रुतेः । पुरुषस्य उक्थत्वेऽर्काशीतिसंबन्धो वक्तव्य इत्याह - (तस्य मुखमेवोक्थं यथा पृथिवी तथा) तस्य वागर्कोऽन्नमशीतय इत्यादि । मुखादीनामुक्थत्व-विशेषाभिधानं बाह्योक्थैः सङ्ख्यादिसामान्य-सम्पादनार्थम्। तथा चाह - तस्याध्यात्मिकस्य पुरुषोक्थस्य विशेषतो मुखमेवोक्थम्। यथा पृथिव्युक्थं बाह्यस्य त्रैलोक्यात्मनः प्रजापतेः, तथाध्यात्मिकस्यापि मुखमुक्थम्। यथा च तस्याग्निरर्कः, एवं वागर्को, मुखेनोक्थेन संबन्धात्। अन्नमशीतय इत्यादि व्याख्यातमन्यत्। तदेतत्। किं तत् ? अन्तरिक्षावसाने सुवर्गो वै लोको ब्रध्नस्य विष्टपं यत् तदिहाध्यात्ममेतत्। यदेतन्नासिकायै नासिकाया अवसाने भुवश्चाधस्तात्

विशेषेण नतमिव निम्नमिव। निम्नतायाः प्रत्यक्षत्वात् इवशब्दोऽनर्थकः ललाटमेवोक्थम् इति । समानमन्यत्॥

समानमशीतयोऽध्यात्मं चाधिदैवतं चान्नमेवान्नेन हीमानि सर्वाणि भूतानि समनन्ती३ अन्नेनेमं लोकं जयत्यन्नेनामुं तस्मात् समानमशीतयोऽध्यात्मं चाधिदैवतं चान्नमेव॥ ४॥

अशीतिरूपान्नस्य व्याख्यानम्

१४. उक्थभेददर्शनेषु अर्कभेददर्शनात् अशीतिषु तत्प्रसङ्गो माभूदित्याह-समानमशीतय इत्यादि। किं पुनस्तत्समानम्? अन्नमेवाध्यात्मं चाधिदैवतं चाशीतयः। कस्मात् पुनरर्कवदशीतयोऽन्या अन्याश्च न कल्प्यन्त इति? तत्र हेतुमाह अन्नेन हि यस्मात् इमानि (सर्वाणि) प्राणाविष्टानि सर्वाणि भूतानि समनन्ति चेष्टन्ते, प्राणनं कुर्वन्ति। अन्नेन चेमं लोकं जयति, व्याप्नोति अन्नवतो ह्युभयलोकव्याप्तिः प्रसिद्धा लोके। अश्नुतेर्हि व्याप्तिकर्मणोऽशीतिशब्दरूपम्। तस्मात् समानमशीतयोऽध्यात्मं चाधिदैवतं चान्नमेव नान्यदर्कवत् कल्पनार्हम् शब्दसारूप्यसंभवात्॥

तदिदमन्नमन्नादमियमेव पृथिवीतो हीदं सर्वम् उत्तिष्ठति यदिदं किं च। यद्ध किं चेदं प्रेर्ता[1] तदसौ सर्वमत्ति यदु किंचातः प्रैतीँ३ तदियं सर्वमत्ति सेयमित्याद्यात्री। अत्ता ह वा आद्यो भवति। न तस्येशे यन्नाद्याद्यद्वैनं नाद्युः॥ ५॥

---

1. प्रेर्त इत्येकारस्याकारल्पुतिरिकारसहिता व्याकरणे विहिता (व्या,सू, ८-१-१०२) सायणभाष्ये। प्रेत्ता - इति सायण भाष्ये आदृतः पाठः।

जगतोऽन्नान्नादरूपत्वम्

१५. तदिदं यथोक्तं बाह्याध्यात्मलक्षणं जगत् द्वयमेव अन्नं च अद्यत इत्यन्नम्। अन्नादं चान्नमत्तीति। अस्य जगतोऽन्नान्नादत्वं कथमिति ? उच्यते । इयमेव तावद् पृथिवी अन्नम्। कुतः ? इतः अस्याः पृथिव्या हीदं सर्वं स्थावरजङ्गमं च क्रियाकर्तृसाधनलक्षणमुत्तिष्ठति - उत्पद्यते, पार्थिवत्वात् सर्वस्य । यदिदं किञ्च - यत्किञ्चेदमविशेषेण कर्तृसाधन-रूपम्। यद्येवं किं स्यात् ? इत्युच्यते। यद्ध किञ्चेदं कर्तृप्रयुक्तं (च ?) चरुपुरोडाशादि सकर्तृकं प्रेर्ता इति पञ्चमो लकारः । प्रेर्तै इत्यस्य आयादेशे यलोप इदं रूपं प्रैतीत्यस्मिन्नर्थे यत्किंचिदितोऽमुं लोकं प्रैति गच्छतीत्यर्थः। तत् सर्वमसौ द्यौरत्ति भक्षयति, आत्मसात्करोति। तेनेयं पृथिवी आद्या, द्यौरत्री। यदु किंचातोऽमुष्माद् द्युलोकात् प्रैति आगच्छति वृष्ट्यादि, क्षीणलोकाश्च यजमानाः, तत् सर्वमियं पृथिवी अत्ति। तेनासौ आद्या द्यौः, पृथिवी अत्त्री। तथान्तरिक्षलोकोऽपि उपकार्योपकारकत्त्वदर्शनात् आत्ता आद्यश्च। तथा प्राणिनः सर्वेऽन्योन्यमुपकार्योपकारक(त्व) दर्शनात् तदिदं जगत् अन्नमन्नादं चेति प्रस्तुतमुपसंहरति । सेयं पृथिवी इति एवम् आद्यात्री आद्या च अत्री चेति। तथा असावपि द्यौः आद्यात्त्री, तथान्यदपि सर्वम्। पृथिवीग्रहणं सर्वस्य आद्यात्तृत्वोपलक्षणार्थम्। एवमहमन्नाद्यरूपः प्रजापतिरुक्थमस्मीति यो वेद, तस्येदं विदुषः फलमुच्यते। अत्ता ह वै सर्वस्य अन्नजातस्य भवति आद्यश्च। उभयात्मको हि प्रजापतिः, प्रजापतिरेव भवतीत्यर्थः ॥

१६. ननु किं तस्य विद्याफलं यद्यसावत्ता चाद्यश्च भवति ; यावता सर्वो हि लोकः परेण उपक्रियमाणो अत्ता भवति उपकुर्वन् परस्याद्यश्च । तथा विद्वानपि (इति) । नैष दोषः । कथमिति ? उच्यते । न च तस्य वस्तु न ईशे ईष्टे नैव स्वामी कश्चिद्भवति स यो यद्वस्तु नाद्यात् । यदेव यो विद्यात् तस्यैव स ईष्टे । अयं तु सर्वस्यैवात्तृत्वात् स्वामी विद्वान् यत् यस्मात् । वाशब्दः चार्थे । यस्माच्चैनं एवंविदं नाद्युः परे । तस्माद्विद्वान् सर्वात्मा सन् सर्वस्यात्मा अत्ता स्वात्माभूतस्येवाद्यस्य । यस्त्वविद्वान् स परेषामाद्यो न च सर्वस्यात्ता इत्ययं विशेषो विदुषोऽविदुषश्चेति ।।

।। इति द्वितीयः खण्डः ।।

अथ तृतीयः खण्डः

सृष्टेः पुरुषस्य रेतोरूपत्वम्

१७. अथातो रेतसः सृष्टिः । यस्माद्भोज्यभोक्तृस्वरूपं जगत्प्रजापतिः, स चायमेव पुरुष इत्युक्तम् । तस्य पुरुषस्य प्रजापतेः द्रव्यात्मकम् अनिर्धारितविशेषम् अनेनात्मना आद्यत्वमनेनेवात्तृत्वमिति । अतस्तद्विशेष-निर्दिधारयिषयाह -

अथातो रेतसः सृष्टिः प्रजापते रेतो देवाः देवानां रेतो वर्षं वर्षस्य रेत ओषधय ओषधीनां रेतोऽन्नमन्नस्य रेतो रेतो रेतसो रेतः प्रजाः प्रजानां रेतो हृदयं हृदयस्य रेतो मनो मनसो रेतो वाग्वाचो रेतः कर्म तदिदं कर्म कृतमयं पुरुषो ब्रह्मणो लोकः ।। १ ।।

१८. अथ अनन्तरम् रेतसः कार्यस्य अन्नात्मनः सोमभूतस्य

बाह्यपिण्डस्य सृष्टिरुच्यते। कथम्? प्रजापतेः पुरुषस्य कर्मज्ञानाधिकृतस्य रेतः कार्यं देवा वागाद्यभिमानिनोऽग्न्यादयः। *एत इतः संभृताः* (ऐ.आ.२-१-८) *तस्य वाचा सृष्टौ पृथिवी चाग्निश्च* (ऐ.आ.१-१-७) इत्यादौ यथास्य पुरुषस्य कार्यं देवा इति हि वक्ष्यामः। देवानां रेतो वर्षं वृष्टिः। तथा (वर्षस्य) वृष्टेः (रेतः) कार्यमोषधयो व्रीहियवाद्याः। औषधीनां रेतोऽन्नं लोकप्रसिद्धमेव। अन्नस्य भुक्तस्य रेत एव नृबीजं रेतः कार्यम्। रेतसः स्त्रीयोनौ निषिक्तस्य रेतः कार्यं प्रजाः। एवमयं पुरुषोऽनेन क्रमेण प्रजानां स्रष्टृत्वात् प्रजापतिः। तथा प्रजानामप्यनेनैव क्रमेण स्रष्टृत्वात् प्रजापतित्वम्। एवं सर्वस्य स्रष्टेति प्रजापतिरेव भवति॥

१९. भवतु (न) नु तावदेवम्। स प्रजापतिः केन साधनेनैवम् अन्नमयीः प्रजाः सृजतीत्युच्यते। प्रजानां - प्रजापतित्वापन्नानां रेतः कार्यं हृदयं बुद्धिः सर्वविज्ञानाधारभूता। तस्या बुद्धेर्हृदयस्य रेतो मनो ज्ञानम्। मनसो ज्ञानस्य रेतो वाक् - मन्त्रचोदना लक्षणा। तस्या वाचो रेतः कर्म। मन्त्रेण हि स्मृतं चोदितं कर्म क्रियते। *स एष वाचश्चित्तस्योत्तरोत्तरक्रमो यद्यज्ञः* (ऐ.आ.२-३-३) इति च वक्ष्यति। मनोवाक्प्रसूतं हि शास्त्रोक्तं कर्मेति (हि) वाजसनेयके। तथा च (?) *विज्ञानं यज्ञं तनुते* (तै.उ.२-५)इत्यादि (तैत्तिरीयके?)। तदिदं शरीरं हृदयाधारमनोवाक्प्रसूतं कर्मणा कृतम्। तेनेदं विनाशि आगमापायि चलमध्रुवम्। तथापि त्वयं पुरुषः परः शिरःपाण्यादिमान् ब्रह्मणः प्राणाख्यस्य वक्ष्यमाणस्य परस्य च लोकः,

लोक्यते अस्मिन् दृश्यते इति प्रज्ञानलक्षणस्य । स्वयं वा लोकयति पश्यतीति लोकः ॥

स इरामयो यद्धीरामयस्तस्माद्धिरण्मयः ॥ २ ॥

पुरुषस्य अन्नमयत्वम्

२०. स चायम् इरामयः अन्नमयः । तथा च व्याख्यातम् *अन्नस्य रेतो रेतो रेतसो रेतः प्रजाः* इति । यत् यस्मात् हि इरामयः अन्नमयः तस्मात् हिरण्मयः । हिरण्यम् अमृतज्योतिः, तन्मयः । सोमात्मकं हि अन्नम् । सोमश्च अमृतः अन्नभूतो देवानाम् । तन्मयं हि अन्नम् । अतो हिरण्मयो बाह्यः पिण्डः कर्मकृतो ब्रह्मणो लोकः । *अथ यत्किञ्चेदमार्द्रं तद्रेतसोऽसृजत तदु सोम एतावद्वा इदमन्नं च* (बृ. १-४-६) इति हि वाजसनेयके विज्ञायते ॥

हिरण्मयो ह वा अमुष्मिल्लोँके संभवति हिरण्मयः सर्वेभ्यो भूतेभ्यो ददृशे य एवं वेद ॥ ३ ॥

अन्नमयज्ञानफलम्

२१. एवं सोमात्मकत्वात् हिरण्मयः अन्नमयः पिण्ड इत्येवंविदः फलम् उच्यते । हिरण्मयः अमृतमयः सोमात्मको ह वै अमुष्मिन् स्वर्गे लोके संभवति स विवर्तत इत्यर्थः । किं च हिरण्मय एव सर्वेभ्यो भूतेभ्योऽर्थाय ददृशे दृश्यते सोमभूतः सोमवत् उपास्यो भवति इत्यर्थः । कोऽसौ ? य एवं यथोक्तम् अन्नात्मसतत्त्वं सोमात्मकतां यो वेद उपास्ते । शरीरात्मना अन्नमयेन सोमोऽहमस्मि इति चेतःसमाधाय आस्ते इत्यर्थः ॥

॥ इति तृतीयः खण्डः ॥

अथ चतुर्थः खण्डः

२२. अथेदानीम् अन्नमयस्य अभ्यन्तर आत्मा साधारणोऽत्ता उक्थं ब्रह्म इन्द्रः प्राणः इत्येवंशब्दवाच्यो ह्युक्तः। तस्य स्वरूपनिर्दिधारयिषया इदमारभ्यते-

लोकप्राणस्य अत्तृत्वम्

तं प्रपदाभ्यां प्रापद्यत ब्रह्मेमं पुरुषं यत् प्रपदाभ्यां प्रापद्यत ब्रह्मेमं पुरुषं तस्मात् प्रपदे तस्मात् प्रपदे इत्याचक्षते शफाः खुरा इत्यन्येषां पशूनाम्॥ १ ॥

२३. तम् ? कम् ? यः प्रकृतोऽन्नमयः ब्रह्मणो लोक इत्युक्तविशेषणः, तं प्रपदाभ्यां पादयोरग्रप्रदेशौ प्रपदे । ताभ्यां द्वारभूताभ्यां प्रापद्यत प्रपन्नं प्रविष्टम् पादाग्रप्रभृति आ मस्तकं शरीरं प्रविष्टम् इत्यर्थः। किं पुनस्तत् ? ब्रह्म बृहत्त्वात् प्राणाख्यं यस्यायं ब्रह्मणो लोकः पिण्डो नामरूपात्मकः। *नामरूपे सत्यं ताभ्यामयं प्राणश्छन्नः* (बृ.२-६-३) इति विज्ञायते वाजसनेयके। इमं पुरुषं शिरःपाण्यादिमन्तं स्वं लोकम्। यत् यस्मात् प्रपदाभ्यां प्रापद्यत ब्रह्म इमं पुरुषं तस्मात् प्रपदे पादाग्रे संवृत्ते। तस्मादेव च प्रपदे इत्याचक्षते लौकिकाः। प्रपदे च सती शफाः खुरा इति वा आचक्षते मनुष्यपशुभ्योऽन्येषां पशूनां चतुष्पदाम् अश्वप्रभृतीनाम्॥

प्राणब्रह्मणः ऊरुशब्दवाच्यत्वम्

तदूर्ध्वमुदसर्पत् ता ऊरू अभवताम्॥२ ॥

२४. तत् ऊर्ध्वम् उदसर्पत् ब्रह्म प्रपदाभ्यां प्रपन्नं सत् ऊर्ध्वम् उदसर्पत् उद्गतवत् विषमिव व्याप्तवत्। यस्मात् ऊर्ध्वम् उदसर्पत् तस्मात्तौ ऊरू ऊरुशब्दवाच्यौ अभवतां संवृत्तौ लोके ॥

प्राणब्रह्मणः उदरत्वम्

उरु गृणीहीत्यब्रवीत्तदुदरमभवत् ॥ ३ ॥

२५. तद् ब्रह्म ऊरूप्रदेशं संप्राप्य उरु विस्तीर्णं बहुधा गृणीहि ग्रसनं कुरु बहुनिगरणयोग्यं छिद्रं कुरु इत्यब्रवीत् इत्यर्थः। तस्मात् ब्रह्मणो वचनात् तत् शरीरमध्यम् उदरमभवत् ॥

प्राणब्रह्मणः उरस्त्वम्

उर्वेव मे कुर्वित्यब्रवीत् तदुरोऽभवत् ॥ ४ ॥

२६. पुनरपि उदरादूर्ध्वं उर्वेव विस्तीर्णतरमेव मे मम कुरु इत्यब्रवीत्। तत एव उरोऽभवत् उरःशब्दवाच्यो हृदयप्रदेशोऽभवत् ॥

उदरे हृदये प्राणब्रह्मदृष्टिः

उदरं ब्रह्मेति शार्कराक्ष्या उपासते हृदयं ब्रह्मेत्यारुणयो ब्रह्मा हैव ता ३ इ ॥ ५ ॥

१७. तदुदरं विशेषेण वैश्वानरभूतेन ब्रह्मणा एकाधिष्ठितत्वात् ब्रह्म इति ब्रह्मदृष्ट्या शर्कराक्षस्य अपत्यानि शार्कराक्ष्या ऋषयः उपासते चिन्तयन्ति। हृदयम् उदरादूर्ध्वप्रदेशं पुण्डरीकाकारं ब्रह्मण उपलब्धि-स्थानत्वात् ब्रह्म इत्युपासते। के ? अरुणस्य अपत्यानि आरुणयः। ब्रह्मा हैव ब्रह्मणी एव इति। इदादेशे तद् रूपं द्रष्टव्यम्। ता ३ इ। उदरोरसी ते

ब्रह्मणी एव इत्यर्थः । स्थानत्वात् ब्रह्मणः । ब्रह्मेति ग्रहीतुं युक्तम् अयुक्तं वा इति विचार्य अध्यवस्यति श्रुतिः ब्रह्मणी एवेति ॥

प्राणस्य शिरस्त्वम्

ऊर्ध्वं त्वेवोदसर्पत्तच्छिरोऽश्रयत यच्छिरोश्रयत तच्छिरोऽभवत् तच्छिरसः शिरस्त्वम् । ता एताः शीर्षञ्छ्रियः श्रिताश्चक्षुः श्रोत्रं मनो वाक् प्राणः । श्रयन्तेऽस्मिञ्छ्रियो य एवमेतच्छिरसः शिरस्त्वं वेद ॥ ६ ॥

२८. पुनरपि ऊर्ध्वं त्वेव उदसर्पत् । तद् ब्रह्म ऊर्ध्वम् उद्गम्य शिरोऽश्रयत आश्रितवत् । विशेषेण शिरसि हि चक्षुःश्रोत्रादीनि खानि करणानि स्वेषु (स्वतस्तु) पृथङ् निक्षिप्य दर्शनश्रवणादिव्यापारं कुर्वदास्ते । यद् यस्मात् शिरोऽश्रयत तत् ब्रह्मणः श्रयणात् शिरोऽभवत् । एवं तच्छिरसः शिरस्त्वं प्रसिद्धं लोके । तथा श्रयणादेव श्रियोऽभवन् । कास्ताः ? एता वक्ष्यमाणाः चक्षुः श्रोत्रं मनो वाक्प्राण इति । ताश्च शीर्षन् शिरसि श्रिताः श्रियः श्रीहेतुत्वात्, श्रयणाच्च प्राणानां श्रीत्वं शिरसश्च शिरस्त्वं यो वेद, अस्मिन् विदुषि श्रियः श्रयन्ते । श्रीशब्दसामान्यात् । भूतिलक्षणा श्रीरेकापि सती पश्वादिसाधनभेदेन बहुवचनभाक् श्रियः इति । चक्षुराद्या वा श्रियः अस्मिन् पक्षे । कल्पाकल्पेन्द्रियत्वं विद्वदविदुषोर्विशेषः । कल्पेन्द्रियत्वं हि इष्यते फलम् ॥

उक्थशब्दनिमित्तत्वम्

ता अहिंसन्ताहमुक्थमस्म्यहमुक्थमस्मीति ता अब्रुवन्

हन्तास्माच्छरीरादुत्क्रमाम तद्यस्मिन् उत्क्रान्ते इदं शरीरं पत्स्यति तदुक्थं भविष्यतीति ॥ ७ ॥

२९. शरीराश्रयाणां प्राणानां सङ्कीर्णत्वात् यत्प्रविष्टं ब्रह्म तद्दुर्निर्धारणम् इति तन्निर्दिधारयिषया इदं प्रस्तूयते ताः अहिंसन्तेत्यादि। ताः चक्षुराद्या अहिंसन्त अस्पर्धन्त। स्पर्धा च हिंसा। अन्योन्यपीडाहेतुत्वात्। स्पर्धां कृतवत्यः। कस्मिन्नर्थे इति ? उच्यते। अहमुक्थमस्मि अहमुक्थमस्मि इति। अहंश्रेष्ठतायाम् इत्यर्थः। *शास्त्राणां श्रीमत्तमं यशस्वितमम्* (कौ. २-६) इति कौषीतकिनामतः प्रसिद्धं महदुक्थस्य श्रेष्ठत्वम्। यदिह विचारणायां श्रेष्ठतमं ब्रह्म भविष्यति तद्दृष्टिमत् महदुक्थम्। तेन उक्थशब्दं ब्रह्म। श्रेष्ठत्वसामान्यात्। अत इदं विचार्यं किमिह श्रेष्ठं ब्रह्मेति। तद्विचारणा क्रियते प्राणसंवादाख्यायिकाव्याजेन। ताः श्रियः अहमुक्थमस्मीति वाङ्मात्रेण अन्यतमश्रेष्ठताया निष्पत्तिम् अपश्यन्त्यः प्रमाणमन्तरेण अन्योन्यमब्रुवन् अन्वयव्यतिरेकार्थम्। हन्त यद्यनुमतिरस्माकम्, अस्माच्छरीरात् क्रमेण उत्क्रमाम। तदिदं शरीरं नोऽस्माकं मध्ये यस्मिन् अन्यतमे उत्क्रान्ते, अपसृते, अपक्रान्ते पत्स्यति पतिष्यति तदिह उक्थं श्रेष्ठं भविष्यतीति॥

प्राणस्यैव उक्थत्वं नेतरेन्द्रियाणाम्

वागुदक्रामदवदन्नश्नन् पिबन्नास्तैव चक्षुरुदक्रामदपश्यन्नश्नन् पिबन्नास्तैव श्रोत्रमुदक्रामदशृण्वन्नश्नन् पिबन्नास्तैव मन उत्क्रामन्मीलित इवाश्नन् पिबन्नास्तैव प्राण उदक्रामत् तत्प्राण उत्क्रान्तेऽपद्यत। तदशीर्यताशारीतीँ३ तच्छरीरमभवत्तच्छरीरस्य

शरीरत्वम् । शीर्यते ह वा अस्य द्विषन् पाप्मा भ्रातृव्यः पराऽस्य द्विषन्पाप्मा भ्रातृव्यो भवति य एवं वेद ॥ ८ ॥

३०. एवमुक्ता वाक् प्रथममुदक्रामत् उत्क्रान्तवती; तस्यामप्युत्क्रा-न्तायां वदनमात्रं केवलम् अकुर्वन्, अश्नन्, पिबन् आस्त एव देहः । यदि हि वाक् उक्थमभविष्यत् पतितोऽभविष्यदयं देहः । न चापतत्, तस्मान्न उक्थं वाक् । समानमन्यत् । चक्षुरुदक्रामत्, श्रोत्रमुदक्रामत् । मन उदक्रामत् । मीलित इवेति । यथा मुग्धः चक्षुर्मीलनोन्मीलनमात्रं कुर्वन् विषयविवेकमकुर्वन् आस्ते तद्वद्देहः । प्राणस्त्वक्षुभितो महत्त्वात्, पश्चात् उदक्रामत् । तस्मिन् प्राणे उत्क्रान्ते इदं शरीरं अपद्यत, न केवलं पतितमेव तच्छरीरम्, तदशीर्यत, विशरणभावं चागमत्, विश्लिष्टमर्म-सन्धिरूपताम् अशारि शीर्णम् इति यस्मात् तस्मात् तत् तच्छरीरमभवत् । तदेवं शरणादेव (शरीरस्य) शरीरत्वं प्रसिद्धम् । अशरीरात्मकात् प्राणात् मत्तोऽन्यत् शरीरमेव शीर्यत इति यो वेद तस्य इदं फलमुच्यते । शीर्यते ह वै विनश्यत्येव अस्य विदुषो द्विषन् यो भवति । कः ? प्राणशरीराविवेक-दर्शननिमित्तः पाप्मा शरीराभिमानासङ्गलक्षणः भ्रातृव्यः । स हि एनं सहभूत एव अत्यन्तमनर्थे योजयन् द्वेष्टि नेतरो भ्रातृव्यः । स न केवलं शीर्यत एव पराभवति चास्य । नाभिमुख्येन शरीरग्रहणजेन अनर्थेन योक्तुं शक्नोति प्राणात्मब्रह्मविदम् इत्यभिप्रायः ॥

प्रकारान्तरेण प्राणस्य उक्थत्वम्

ता अहिंसन्तैवाहमुक्थमस्म्यहमुक्थमस्मीति ता अब्रुवन् हन्तेदं

पुनः शरीरं प्रविशाम तद्यस्मिन्नः प्रपन्न इदं शरीरमुत्थास्यति तदुक्थं भविष्यतीति। वाक्प्राविशदशयदेव चक्षुः प्राविशदशयदेव श्रोत्रं प्राविशदशयदेव मनः प्राविशदशयदेव प्राणः प्राविशत्प्राणे प्रपन्न उदतिष्ठत्तदुक्थमभवत् ॥ ९ ॥

३१. यादृच्छिकमपि प्राणोत्क्रमणे शरीरपतनं स्यात्, पुनः प्रवेशेन वागादीनां शरीरानुत्थानं, प्राणप्रवेशे चोत्थानं यावन्न प्रदर्शितं भवतीत्यत आह। वाक् प्राविशत्। तस्यां प्रविष्टायामपि शरीरं नोत्थितम्। अशयदेव सुप्तवत् पतितमेवास्त। तथा चक्षुरादिषु। चक्षुरादिषु चक्षुः श्रोत्रं मनः। प्राणः प्राविशत्। तस्मिन् प्राणे प्रपन्ने प्रविष्टे उदतिष्ठत् सुप्तप्रतिबुद्ध इव उत्थितं शरीरम्। प्राणः शरीरोत्थानहेतुत्वात् तदुक्थमभवत् ॥

प्राणम् उक्थमुपासीत

तदेतदुक्थाँ३ प्राण एव। प्राण उक्थमित्येव विद्यात् ॥ १० ॥

३२. *उक्थमुक्थमिति वै प्रजा वदन्ति* (ऐ.आ.२-१-२) इति प्रस्तुत्य इह किं नु खलु उक्थं भवितुमर्हतीत्युक्थ (क्त)मिति। विधा (निर्धा)रणं दर्शयति। *तदेतदुक्थाँ ३ प्राण एव* इति। निर्धारितं यस्मादेवम् (अतः) प्रकृतेन संयोज्य प्राणोऽहमुक्थमस्मि इत्येव विद्यात् पूर्ववत् प्रस्तुत एव विधिरनूद्यते ॥

प्राणस्य सर्वात्मत्वम्

तं देवा अब्रुवन्त्वमुक्थमसि त्वमिदं सर्वमसि तव वयं

स्मस्त्वमस्माकमसीति। तदप्येतदृषिणोक्तम् - त्वमस्माकं तव स्मसीति॥ ११॥

३३. निर्धारितब्रह्मसंबन्धार्थं प्राणेन पराजितैर्वागादिभिस्तूयत इति स्तुतिच्छद्मना विद्याविषयस्य प्राणस्य सर्वात्मत्वं दर्शयति। तथा च वक्ष्यति *प्राणो वा अहमस्म्यृषे* (ऐ.आ.२-२-३) इत्यादि। प्राणैकशब्दवाच्यत्वं सर्वस्यैकैव व्याहृतिः प्राण एवेति। तस्मात् न स्तुतिरिति विज्ञान-विषयबाह्योऽर्थ उच्यते। वागादिभिः तं प्रकृतं निर्धारितयाथात्म्यं, पराजिता वागादयो देवाः राज्ञ इव प्रतिराजानः करमिव प्रयच्छन्त अब्रुवन् उक्तवन्तः। त्वमुक्थमसि, त्वमिदं सर्वमसि, किं च तव स्वामिन इव भृत्याः वयं स्मः भवामः। तव रूपादिबल्युपहारिणो वयम्। त्वं पुनरस्माकं भृत्यानामिव स्वामी असि भवसि। तदपि एतदुक्तं वस्तु ब्राह्मणेन ऋषिणा मन्त्रेणापि उक्तं प्रकाशितं संहितायां मन्त्रः - *त्वयेदिन्द्र वयं प्रतिब्रवीमहि स्पृधः। त्वमस्माकं तव स्मसि*। (ऋ.सं.मं.८-९२-३२) त्वया यथोक्तमहाभाग्येन (इद्) इत्थम् इन्द्र हे परमेश्वर वयं युजा योगेन रसयोगेनेव ताम्रं लब्धवीर्याः सन्तः प्रतिब्रवीमहि प्रतिवक्ष्यामः स्पृधः संग्रामस्य निमित्तस्पर्धया इत्यर्थः। त्वद्योगमन्तरेण कुतो नः सामर्थ्यं प्रतिवक्तुम् अन्यद्वा कर्तुम्। त्वमस्माकं तव स्मसीति। त्वमेव हि अस्माकं शक्त्याधानकृत्। तव स्वामिनः प्रेष्ठाः स्मसि भवामो वयम्। इतिशब्दो मन्त्रसमाप्त्यर्थः॥

॥ इति चतुर्थः खण्डः॥

अथ पञ्चमः खण्डः

प्राणस्य कालात्मत्वम्

तं देवाः प्राणयन्त स प्रणीतः प्रातायत प्रातायीतीँ३ तत् प्रातरभवत् समागादितीँ३ तत्सायमभवदहरेव प्राणो रात्रिरपानः ।। १ ।।

३४. किञ्च तमेव प्राणं देवा वागादयः प्र अनयन्त प्राणयन्त प्रणीतवन्तः महाभाग्यं गमितवन्तः इत्यर्थः । स प्राणः देवैः प्रणीतः सन् प्र अतायत प्रातायत महाभाग्यसन्ततिं गच्छन् स्वामीव च वागादिदेवैः स्थापितः सन् स्वामीव भृत्यान् देवान् प्रातायि अपालयत् इतीं ३ यस्मात् तस्मात् स प्राणः प्रातःकालोऽभवत् । सम् आगात् समागात् एकीभावं गतवान् वागादीनां संहरणेन स्वापार्थं लोकस्य इतीं ३ तत् तस्मात् सायम् अभवत् सायंकालोऽभवत् । प्राणवृत्त्या हि लोकस्य जागरणार्थं वागादीन् निक्षिपन् पालयति यदा तदा प्राणवृत्तिनिमित्तोऽहराख्यः कालविशेषः इति अहरेव प्राण इत्युच्यते । स्वापार्थं वागादिसंहरणम् अपानवृत्तिनिमित्तम् इति रात्रिरपान इत्युच्यते । प्राणापानवृत्तिभ्यां वागादिविक्षेपसंहरणे कुर्वन् प्राणिनां जाग्रत्स्वप्नार्थं कर्मार्थं विश्रमणार्थं च अहोरात्रिरूपः कालोऽभवत् प्राणः इत्यर्थः ।।

प्राणस्य देवात्मत्वम्

वागग्निश्चक्षुरसावादित्यश्चन्द्रमा मनो दिशः श्रोत्रं स एष प्रहितां संयोगोऽध्यात्ममिमा देवता अद उ आविरधिदैवतमित्येतत्तदुक्तं

भवति || २ ||

३५. न केवलं स प्राणः कालात्मैव देवतात्मा च | कथमिति ? उच्यते | तस्य प्राणस्य या वाक् सोऽग्निः | तथा चक्षुरसावादित्यः | चन्द्रमा मनः | दिशः श्रोत्रम् | वागादीनां हि अभिमानित्वं प्रसिद्धम् अग्न्यादीनाम् | यदेतत् अग्न्यादीनां वागाद्यभिमानितया संस्थानम् स एष प्रहितां प्रगतानां वागादीनां संयोगः अध्यात्मम् आत्मानम् अधिकृत्य आत्मनो भोगार्थः संयोग एष प्रवर्तते संहरति इत्यर्थः | इमा एव वागाद्यभिमानिन्यो देवताः अद उ एतत्, किं तत् | आविः प्रकाशरूपं यद् वर्तते अग्न्यादित्यादि तदधिदैवतम् | यागादिकर्मकाले समुद्दिश्यमानं कर्माङ्गतया अधिदैवतम् उच्यते | तदेतदुक्तं भवतीति वक्ष्यमाणेन ऋषिवाक्येन संबन्धः ||

प्राणविदः सर्वात्मत्वम्

एतद्ध स्म वै तद्विद्वानाह हिरण्यदन् बैदो न तस्येशे यं मह्यं न दधुरिति प्रहितां वा अहमध्यात्मं संयोगं निविष्टं वेदैतद्ध तत् || ३ ||

३६. कोऽसावृषिः? किं वा तदृषिवाक्यम् इति ? आह श्रुतिरेव | तत् अध्यात्माधिदैवसंयोगलक्षणं वस्तु तदुक्तम् | ह स्म वै इति वृत्तावद्योतका निपाताः | तदेतद् विद्वान् सन् आह उक्तवान् हिरण्यदन् नाम्ना बिदस्यापत्यं बैदः ऋषिः, न तस्य पदार्थस्य यस्य कस्यचित् नेशे नेष्टे कश्चित् यं पदार्थं मह्यं न दद्युः न प्रयच्छेयुः | सर्वात्मने प्राणभूताय मह्यमेव सर्वावस्थाय सर्वपदार्थजातं प्रयच्छन्ति सर्वे | सर्वः सर्वत उपनीयमानस्य अहमेव स्वामी,

सर्वे मम बलिहारकाः इत्यर्थः। अत्र हेतुमाह प्रहितां वै अहमध्यात्मं संयोगं निविष्टं यथोक्तं वेद विजानामि (इति)। एतद्ध तत् एतद् यथोक्तदर्शनम्॥

प्राणोपासकस्य ऐश्वर्यम्

अनीशनानि ह वा अस्मै भूतानि बलिं हरन्ति य एवं वेद॥ ४॥

३७. अन्योऽपि एवं यो वेद तस्यैतत् फलमुच्यते। तत् बलिं ह वै अस्मै एवंविदे आत्मभूताय सर्वाणि भूतानि हरन्ति उपनयन्ति। किंविशिष्टानि? अनीशनानि अस्वतन्त्राणि भृत्या इव स्वामिने॥

प्राणस्य सत्यशब्दवाच्यत्वम्

तत् सत्यं सदिति प्राणस्तीत्यन्नं यमित्यसावादित्यस्तदेतत्त्रिवृत्त्रिवृदिव वै चक्षुः शुक्लं कृष्णं कनीनिकेति॥ ५॥

३८. यत्तदुक्तम् अध्यात्माधिदैवलक्षणं समस्तं सत्यमित्येकेन शब्देन अभिधीयते। *तदेकया वाचा अभिव्याह्रियते सत्यमिति ह विज्ञायते* कौषीतकिनाम्। किं पुनस्तदनेकलोकशब्दवाच्यमिति? उच्यते। सदिति नित्यसद्रूपत्वात् प्राणः। तीत्यन्नं अन्नवाचकमेव तकारमात्रम्। इकारस्तु उच्चारणार्थोऽनुबन्धः। मृत्युशब्दे तकारोऽस्ति। मृत्युमद्धि अन्नम् आद्यत्वद्विनाशी। तत्सामान्यात् तीत्यन्नमुच्यते। यमित्यसावादित्यः। यातीति यमयतेर्वा बन्धनार्थस्य रूपं यम्। आदित्यात्मना हि सर्वं बद्धम्। आदित्यश्च आत्मा सर्वस्य। आत्मसंबद्धं हि सर्वम्। अतो यमित्यसावादित्यः प्राणेनादित्येन चात्मना अद्मा मृत्युमदन्नमन्तर्भावितम् अनृतरूपम् इति

सत्यभूयस्त्वमेव। *आत्तं वै भूयसा कनीय* इति हि स्थितिः। तस्मात् तदेव तत् सर्वं जगत्सत्यं त्रिवृदेव नातोऽतिरिक्तम्। तदेतत् त्रिवृत्त्वं चक्षुषीह प्रत्यक्षं प्रदर्श्यते। आदित्यात्मकं हि समस्तं बाह्यम्। स चादित्य इह चक्षुस्त्रिवृदिव वै। इवशब्दोऽवधारणार्थः। वै शब्दः प्रसिद्धस्मारकः। कथम्? शुक्लं कृष्णं कनीनिका च चक्षुर्मध्ये यत्तेजः॥

प्राणविदः माहात्म्यम्

स यदिह वा अपि मृषा वदति सत्यं हैवास्योदितं भवति य एवमेतत् सत्यस्य सत्यत्वं वेद॥ ६॥

३९. यथोक्तम् एवं तत् सत्यस्य सत्यत्वं यो वेद स यदिह वै कदाचित् प्रमादतो मृषापि वदति सत्यम् अवितथमेव ह वै अस्य विदुषः उदितम् उक्तं भवति संपद्यते। अनृतदोषो नैनं हिनस्तीत्यर्थः। विदुषः फलमेतत्॥

॥ इति पञ्चमः खण्डः॥

अथ षष्ठः खण्डः

प्राणस्य वाक्तन्तिः नाम दामेत्युपासनम्

तस्य वाक्तन्तिर्नामानि दामानि तदस्येदं वाचा तन्त्या नामाभिः दामभिः सर्वं सितं हीदं नामनी ँ३सर्वं वाचाऽभिवदति॥ १॥

४०. स ह (हि?) सर्वेण भोज्येन संयुक्तः प्राणः तस्यैकशब्दवाच्यो भवतीत्युपसंहृतम्। तस्यैव प्राणस्य विभूत्यन्तराभिधित्सया इदमारभ्यते।

तस्य प्राणस्य वाक् करणं तन्तुरिव तन्तिः यथा वत्सतन्तिर्लोके स्वात्मसंबन्धिभिः दामभिः वत्सान् संग्रथ्नाति संबध्नाति तथा वाक्तन्तिः। तत्समुत्थानि हि नामानि अभिधानानि दामानीव दामानि। सर्वं जगत् अभिधेयभूतं नामभिः प्रकाश्यमानं सत् बद्धमिव नामभिरिव वत्साः। तदेतत्साम्यम्। ह। तदिदं जगत् अस्य प्राणस्य वाचा तन्त्या नामभिर्दामस्थानीयैः सर्वम् अशेषं सितं बद्धम् सर्वं हि यस्मात् इदं नामनी ३ नाम्नि बद्धमिव। तेन प्रकाश्यमानत्वात्। तस्मात् युक्तमुक्तं नामभिर्दामभिः सर्वं सितमिति। प्रसिद्धं चैतत्। सर्वं वाचा अभिवदति सर्वो लोकः ॥

उपासनस्य फलम्

वहन्ति वा एनं तन्तिसम्बद्धा य एवं वेद ॥ २ ॥

४१. ते एवमेते अभिधानाभिधेयत्वलक्षणे नामरूपे प्राणस्य ममात्मभूते न मत्तो व्यतिरिच्येते-इत्येवं यो वेद तमेवंविदं वहन्ति प्रापयन्ति वाक्तन्तिसंबद्धा नामधेयभूताः प्राणिनो बलिं करदा इव राजानं प्रति ॥

प्राणस्य बृहतीरूपेण छन्दोव्यापकत्वम्

तस्योष्णिग्लोमानि त्वग्गायत्री त्रिष्टुङ्मांसमनुष्टुप्स्नावान्यस्थि जगती पंक्तिर्मज्जा प्राणो बृहती स च्छन्दोभिश्छन्नो यच्छन्दोभिश्छन्नस्तस्माच्छन्दांसीत्याचक्षते ॥ ३ ॥

४२. यथायं प्राणः बाह्यभूताभ्यां नामरूपाभ्यां मर्त्याभ्यां छन्नो वृतस्तयोरुपष्टम्भकः, एवं प्राणस्थानीया बृहती इतरैः छन्दोभिः छन्ना, प्राण इव तानि व्याप्नोति । तस्मात् सैव अस्मिन् क्रतौ शस्या । तस्यां हि शस्यमानायां सर्वाणि उपात्तानि भवन्ति । यथा प्राणेनात्मना नामरूपात्मकं जगत् व्याप्तम् इत्येतमर्थं दिदर्शयिषुराह । तस्य उष्णिक् लोमानि । तस्यास्य बृहत्यात्मनः प्राणस्य उष्णिक् लोमानि । पुरुषस्येव लोमानि । उष्णिक् सप्ताक्षरा लोमसंस्तुता । त्वक् गायत्री अष्टाक्षरा । अतः लोम्नोऽभ्यन्तरत्वक्संस्तुता । त्रिष्टुक् एकादशाक्षरा त्वचोऽभ्यन्तरा मांससंस्तुता । अनुष्टुप् ततोऽभ्यन्तरा स्नावा स्नावसंस्तुता । अस्थि जगती स्नाव्नोऽभ्यन्तरा अस्थिसंस्तुता द्वादशाक्षरा । पङ्क्तिर्मज्जा दशाक्षरा अस्थ्नोऽन्तर्मज्जासंस्तुता । प्राणो बृहती । सर्वान्तरत्वात् । बृहती प्राणसंस्तुता । सा चतुर्थी सर्वछन्दसां मध्ये भवा सती इतराणि छन्दांस्याप्नोतीत्यात्मसंस्तुता । सा त्विह शरीरधातुसंस्तुता इतरच्छंदसां परस्तात् पठिता प्राणसंस्तवस्य विवक्षितत्वात् । स प्राणो बृहत्यात्मा छन्दोभिरितरधातुभूतैः छन्नः छादितः । यत् यस्मात् छन्दोभिश्छन्नः तस्मात् छादनात् छन्दांसीति आचक्षते शिष्टाः ॥

उपासनस्य फलम्

छादयन्ति ह वा एनं छन्दांसि पापात् कर्मणो यस्यां कस्यांचिद्दिशि कामयते य एवमेतच्छन्दसां छन्दस्त्वं वेद ॥ ४ ॥

४३. गायत्र्यादीनि बृहत्यात्मप्राणभूतं माम् अन्यानि इतरधातुभूतानि

छन्दांसि छादयन्ति मर्माणीव योद्धॄन् गोपायन्ति | अतः छादनात् छन्दसां छन्दस्त्वं (इति) यथोक्तमेवं यो वेद तमेनं छादयन्ति रक्षन्ति इत्यर्थः | ह वै छन्दांसि | कुत इति ? उच्यते | पापात् दुरितात् कर्मणः शरीरस्थानीयात् मर्मस्थानीयानि योद्धारमिव यस्यां कस्यांचिद्दिशि यस्मिन् कस्मिंश्चिद्दिग्विशेषे | प्राच्यादौ कामयते इच्छति | पापं कर्म कर्तुम् इति वाक्यशेषः | तस्मात् कर्मणे रक्षन्तीति विद्याफलमेतत् ||

प्राणस्य माहात्म्यम्

तदुक्तम् ऋषिणा[1] अपश्यं गोपामित्येष वै गोपा एष हीदं सर्वं गोपायति | अनिपद्यमानमिति न ह्येष कदाचन संविशति आ च परा च पथिभिश्चरन्तमित्या च ह्येष परा च पथिभिश्चरति | स सध्रीचीः स विषूचीर्वसान इति सध्रीचीश्च ह्येष विषूचीश्च वस्त इमा एव दिश आवरीवर्ति भुवनेष्वन्तरित्येष ह्यन्तर्भुवनेष्वावरीवर्ति || ५ ||

४४. तदुक्तम् ऋषिणा मन्त्रेणापि उक्तं प्रकाशितम् | दीर्घतमा नाम ऋषिः एतस्मिन् प्राणात्मदर्शने अवस्थितः तदर्थप्रकाशकमेव इमं मन्त्रं ददर्श | अपश्यम् अदर्शं गोपां गोपायितारं रक्षितारं प्राणं सर्वस्य जगतः |

---

१. अपश्यं गोपामनिपद्यमानमा च परा च पथिभिश्चरन्तम् | स सध्रीचीः स विषूचीर्वसान आवरीवर्ति भुवनेष्वन्तः || (१-१०-१९४-३१ ; १-१०-१७७-२ ; ऋ.सं.१-१०-सू. १६४,१७७ (?) ऋ.३१ | ३) ||

अनिपद्यमानं स्वव्यापारोपरमेण नीचैरगच्छन्तम्। अनस्तमितस्वरूपेणैव वर्तमानम् इत्यर्थः। आ च आचरन्तं च अर्वाग्भूतैः पथिभिः मार्गैः। परा च पराचरन्तं च ऊर्ध्वगैः तिर्यग्भूतैश्च पथिभिः अनेकधा गच्छन्तम्। प्राण्युपकारार्थम् इत्यर्थः। स एवं प्राणः सध्रीचीर्दिशः। सहाञ्चन्तीति। स विषूचीः उपदिशः। विष्वग्गमनात्। ता एष प्राणो वसानः व्याप्य वर्तमानः आवरीवर्ति अत्यर्थम् अनुपरतो वरीवर्ति। बंभ्रमीतीत्यर्थः। भुवनेषु लोकेषु अन्तः मध्ये स्रङ्मणिसूत्रवद्धारयन् भुवनानीति। एवंमहिमा यस्तम् अहम् अपश्यम् इति दीर्घतमसो वचो मन्त्रः। गोपाम् इत्येतदृचं ब्राह्मणं व्याचष्टे। एष वै प्राणो गोपा इति। एष हीति प्रसिद्धिरुच्यते हेत्वर्थम्। प्रसिद्धं प्राणस्य गोप्तृत्वम् इत्यर्थः। अनिपद्यमानमिति न ह्येष कदाचन संविशति इत्यविश्रान्तत्वम् उच्यते। प्राणस्य अध्यात्ममधिदैवतं च। आ च, परा च पथिभिश्चरतीति प्रसिद्धमेतत्। स सध्रीचीः स विषूचीः वसान इति। सध्रीच्यो विषूच्यश्च दिश इत्याह। वसान इति ता दिश एष वस्ते अधिदैवतात्मना निवसति। आवरीवर्ति भुवनेष्वन्तरिति। एष हि अन्तर्भुवनेष्वावरीवर्ति वायुः॥

प्राणस्य व्यापकत्वम्

अथो आवृतासोऽवतासो न कर्तृभिरिति सर्वं हीदं प्राणेनावृतम्॥ ६॥

४५. अन्येन च मन्त्रेण तमेतमेव प्राणं स्तौति ***अप्रक्षितं वसुबिभर्षि हस्तयोरषाळ्हं सहस्तन्वि श्रुतो दधे। आवृतासोऽवतासो न कर्तृभिस्तनूष***

ते क्रतव इन्द्र भूरयः।। (ऋ.१०-५६-८) अप्रक्षितम् अनुपहिंसितम् अप्रक्षीणं वा। वसु धनं कर्मफलाख्यं बिभर्षि धारयसि। हस्तयोः दक्षिणोत्तरायणयोः अधिदैवतम् अध्यात्मं च प्राणापानयोः जीवनादिलक्षणं कर्मफलम्। किं च अषाळहम् अमर्षणीयम्। अप्रसह्यमन्यैः। किं तत्? सहः बलं तव इत्यर्थः। यस्मात् कर्मफलरूपं जगद्धारयितुम् उत्सहसे इत्यर्थः। किं च तन्वि तनौ शरीरे, आत्मनः श्रुतः श्रवणानि विज्ञानानि दधे धारयसि। त्वद्देहाश्रितमेव हि सर्वं ज्ञानम्। सर्वात्मत्वात् तव। किं तु आवृतासः आवृताः। के ? अवतास इति। अवताः अवटा न आवृता इव अवटाः। नकारस्य उपर्युपचारात् उपमार्थत्वम्। यथा हिरण्यनिध्याद्यवस्थापनकर्तारः अवटेषु हिरण्यादिद्रव्यं निधाय मृत्पाषाणादिभिः अवटान् आवृण्वन्ति आच्छादयन्ति। तत्र यथा कर्तृभिः अवटा आवृताः तथा ते तव तनूषु शरीरेषु क्रतवः संकल्पविशेषाः निधिस्थानीयाः विज्ञानानि इत्यभिप्रायः। इन्द्र हे परमेश्वर, भूरयः बहवः। अनेकज्ञानाश्रयः सर्वज्ञस्त्वम् इत्यभिप्रायः। क्रतवः यज्ञविशेषा वा। *अयं वै यज्ञो योऽयं पवते* इति श्रुतेः। आवृतासः इत्येकं पादं व्याचष्टे ब्राह्मणम्। सर्वज्ञानकर्मफलात्मकं हि यस्मादिदं जगत् प्राणेन आवृतं व्याप्तं सर्वतः।।

प्राणस्य सर्वाधारत्वम्

सोऽयमाकाशः प्राणेन बृहत्या विष्टब्धस्तद्यथायमाकाशः प्राणेन बृहत्या विष्टब्धः एवं सर्वाणि भूतान्यापिपीलिकाभ्यः प्राणेन बृहत्या विष्टब्धानीत्येवं विद्यात्।। ७।।

४६. किंचान्यमपि दृष्टान्तमाह। सोऽयं प्रसिद्ध आकाशः प्राणेन बृहतीछन्दोरूपेण बृहत्या विष्टब्धो विशेषेण स्तब्धः दृढीकृतः व्याप्तः। स प्रसिद्धो दृष्टान्तत्वेन उपादीयते। तद्यथा अयमाकाशः प्राणेन बृहत्या प्राणेन विष्टब्धः। एवं सर्वाणि भूतानि जीवाविष्टानि आ पिपीलिकाभ्यः पिपीलिकाभिः सह प्राणेन मया बृहत्या विष्टब्धानीत्येवं विद्यात्। अहमुक्थमस्मि इति प्रकृतविधिः सर्वत्र अनूद्यते। अन्येनान्येन गुणेन संबन्धार्थम्। प्रागात्मा वा इत्येतस्मात् प्राणविषयमेव दर्शनम् एकमेव अनेकगुणफलसंबन्धात् मन्दबुद्धीनाम् अनेकदर्शनभ्रान्तिकारणं भवति॥ ६॥

॥ इति षष्ठः खण्डः ॥

अथ सप्तमः खण्डः

पुरुषस्य विभूतयः

अथातो विभूतयोऽस्य पुरुषस्य॥ १॥

४७. अग्न्यादीनाम् अध्यात्मं संयोगो निविष्ट उक्तः तत्र कारणं वक्तव्यमित्यत आह। अथ अनन्तरं विभूतयः विस्ताराः अस्य ज्ञानकर्माधि-कृतस्य पुरुषस्य प्रजापतेः। अस्य हि पुरुषस्य ज्ञानकर्मभ्यां स्रष्टृत्वात् कार्यभूताः सह पृथिव्यादिभिः स्थानैः अग्न्यादयो देवाः स्थानिनः। ते तस्मिन् कारणे पुरुषे अध्यात्मं निविष्टाः इत्यस्य उपपन्नो हेतुरुच्यते। कारणे हि कार्यं निविष्टं भवति॥

प्राणस्य वाचः पृथिव्यग्निरूपत्वम्

तस्य वाचा सृष्टौ पृथिवी चाग्निश्चास्यामोषधयो जायन्तेऽग्निरेनाः

स्वदयतीदमाहरतेदमाहरतेत्येवमेतौ वाचं पितरं परिचरतः पृथिवी चाग्निश्च यावदनु पृथिवी यावदन्वग्निस्तावानस्य लोको भवति नास्य तावल्लोको जीर्यते यावदेतयोर्न जीर्यते पृथिव्याश्चाग्नेश्च य एवमेतां वाचो विभूतिं वेद ।। २ ।।

४८. तस्य पुरुषस्य वाचा करणभूतया ज्ञानकर्मसव्यपेक्षया सृष्टौ उत्पादितौ पृथिवी च़ स्थानम् अग्निश्च स्थानी। तौ च वाचः पुत्रौ सन्तौ पितुः कम् उपकारं कुर्वाते इति ? उच्यते। अस्यां पृथिव्याम् ओषधयो जायन्ते। ताश्चैना अग्निः भक्ष्यभोज्यादिप्रकारेण पक्तिं कुर्वन् स्वदयति स्वादुयुक्ताः करोति। स च पिता वाक् स्वादुतरम् इदमाहरत इदमाहरत इत्याहूय भक्षयति। एवम् ओषधिजनन (रूपेण) पक्तिरूपेण चैतौ पृथिवी चाग्निश्च वाचं पितरं परिचरतः परिचरणं कुर्वाते ।।

४९. मम वाचो विभूतिर्विस्तरः पृथिव्यग्नी इत्येवम् एतां वाचो विभूतिं यो वेद तस्य एतद् विद्याफलमुच्यते। यावद् वस्त्वनु पृथिवी व्याप्तवती यावच्चाग्निर्व्याप्तवान् तावान् अस्य विदुषो लोको भोज्यो भवति। तावदस्य आत्मा विस्तीर्यते इत्यर्थः। किं च नास्य तावल्लोको जीर्यते न तावत् क्षीयते। कियन्तं कालमिति ? आह। यावदेतयोः पृथिव्याश्चाग्नेश्च लोको न जीर्यते तावन्तं कालम् इत्यर्थः। एवम् उत्तरेषु वाक्येषु योज्यम् ।।

प्राणस्य घ्राणेन वाय्वन्तरिक्षरूपत्वम्

प्राणेन सृष्टावन्तरिक्षं च वायुश्चान्तरिक्षं वा अनुचरन्त्यन्तरिक्ष-मनुशृण्वन्ति वायुरस्मै पुण्यं गन्धमावहत्येवमेतौ प्राणं पितरं परि-

चरतोऽन्तरिक्षं च वायुश्च यावदन्वन्तरिक्षं यावदनु वायुस्तावानस्य लोको भवति नास्य तावल्लोको जीर्यते यावदेतयोर्न जीर्यन्तेऽन्तरिक्षस्य च वायोश्च य एवमेतां प्राणस्य विभूतिं वेद ॥ ३ ॥

५०. पुरुषस्य नासिकाप्राणेन सृष्टौ अन्तरिक्षं च वायुश्च एतमुपकारं कुर्वाते। अन्तरिक्षमनु लक्षयित्वा चरन्ति पितरः। तथा अन्तरिक्षमेव अनु लक्षयित्वा शृण्वन्ति। न हि मूर्तद्रव्येण निरुद्धाः सर्वतश्चरन्ति शृण्वन्ति वा। वायुरस्मै पित्रे पुण्यं गन्धमावहति। नन्वपुण्यमपि गन्धं जिघ्रति पिता तत्र कथं पुण्यमिति विशेषणम् ? नैष दोषः। सर्वोऽपि गन्धः पुण्य एव पितुः प्राणस्य। मनसा तु कर्मवशात् विकल्प्यमानोऽपुण्यो भवति। तदपेक्षया प्राणस्य पुण्यं गन्धम् आवहति इति विशेषणम्। चरणश्रवण-पुण्यगन्धहेतुत्वेन अन्तरिक्षवायू प्राणं पितरं प्रत्युपकुर्वाते ॥

चक्षुषा सृष्टौ द्यौश्चादित्यश्च द्यौर्हास्मै वृष्टिमन्नाद्यं संप्रयच्छत्यादित्योऽस्मै ज्योतिः प्रकाशं करोत्येवमेतौ चक्षुःपितरं परिचरतो द्यौश्चाऽऽदित्यश्च यावदनु द्यौर्यावदन्वादित्यस्तावानस्य लोको भवति नास्य तावल्लोको जीर्यते यावदेतयोर्न जीर्यते दिवश्चादित्यस्य च य एवमेतां चक्षुषो विभूतिं वेद ॥ ४ ॥

प्राणस्य चक्षुषा द्युलोकादित्यरूपत्वम्

५१. चक्षुषा सृष्टौ द्यौश्चादित्यश्च। द्यौर्हास्मै पित्रे वृष्टिरूपेण उदकम्

अन्नाद्यं च प्रयच्छति। आदित्योऽस्य चक्षुषो रूपोपलब्धये। ज्योतिरेव प्रकाशः ज्योतिःप्रकाशः। तं ज्योतिःप्रकाशम् उपकारं करोति॥

श्रोत्रेण सृष्टा दिशश्च चन्द्रमाश्च दिग्भ्यो हैवमायती३ँ दिग्भ्यो विशृणोति चन्द्रमा अस्मै पूर्वपक्षापरपक्षान् विचिनोति पुण्याय कर्मण एवमेते श्रोत्रं पितरं परिचरन्ति दिशश्च चन्द्रमाश्च यावदनु दिशो यावदनु चन्द्रमास्तावानस्य लोको भवति नास्य तावल्लोको जीर्यते यावदेतेषां न जीर्यते दिशां च चन्द्रमसश्च य एवमेतां श्रोत्रस्य विभूतिं वेद॥ ५॥

प्राणस्य श्रोत्रस्य दिक्चन्द्रमस्त्वम्

५२. श्रोत्रेण सृष्टा दिशश्च चन्द्रमाश्च। दिग्भ्यो हैनम् आयती आगच्छन्ति सर्वे भोगविशेषाः। दिग्भ्य एव च समुत्थान् शब्दान् शृणोति। एवं दिशः पितरमुपकुर्वन्ति। चन्द्रमाश्च अस्मै पुण्याय कर्मणे पूर्वपक्षापर-पक्षौ विचिन्वन् विभजमानः पुण्यकर्माङ्गत्वाय उपकरोति॥

प्राणस्य मनसा अब्वरुणरूपत्वम्

मनसा सृष्टा आपश्च वरुणश्चाऽऽपो हास्मै श्रद्धां संनमन्ते पुण्याय कर्मणे वरुणोऽस्य प्रजां धर्मेण दाधारैवमैते मनः पितरं परिचरन्त्यापश्च वरुणश्च यावदन्वापो यावदनु वरुणस्तावानस्य लोको भवति नास्य तावल्लोको जीर्यते यावदेतेषां न जीर्यतेऽपां च वरुणस्य च य एवमेतां मनसो विभूतिं वेद॥ ६॥

५३. मनसा सृष्टा आपश्च वरुणश्च । वरुणोऽबायतनो देवतात्मा । आपो हास्मै पित्रे पुण्यकर्माङ्गत्वाय श्रद्धाम् आस्तिक्यबुद्धिं संनमन्ते उत्पादयन्ति इत्यर्थः । वरुणस्तु अस्य प्रजां धर्मेण दाधार धृतवान् । धारयति इत्यर्थः । वारुणैः व्याध्यादिभिः असंस्पृष्टां धर्मयुक्तां प्रजां करोति । श्रद्धोत्पादनप्रजाधारणाभ्याम् उपकुर्वन्ति आपश्च वरुणश्च । समानमन्यत् । एवमेकैकः पुरुषो ज्ञानकर्मभ्यां सर्वस्य जगतः स्रष्टृत्वात् प्रजापतिरेव ॥

॥ इति सप्तमः खण्डः ॥

अथ अष्टमः खण्डः

जगतः अब्भूयस्त्वं प्राणविभूतिश्च

आपा३ इत्याप इति तदिदामाप एवेदं वै मूलमदस्तूलमयं पितैते पुत्रा यत्र ह क्वच पुत्रस्य तत्पितुर्यत्र वा पितुस्तद्वा पुत्रस्येत्येतत् तदुक्तं भवति । एतद्ध स्म वै तद्विद्वानाह महिदास ऐतरेय आऽहं मां देवेभ्यो वेद ओ मद्देवान् वेदेतःप्रदाना ह्येत इतः संभृता इति ॥ १ ॥

५४. अयं पुरुषो जगत् सृजन् किमुपादाय सृजतीति सृष्टिमूल-निर्दिधारयिषया इदं प्रस्तूयते । दृश्यते हि अब्बाहुल्यं जगतः संहतत्वात् । संहतिश्च अप्कार्यं मृत्पिण्डादिषु दृष्टम् । ततोऽपाम् उपादानकारणत्वं जगत आशङ्क्यते (?) अतो विचारयन् आह । आपा३ इति प्रस्तौति । विचार्य च अन्यस्य असंभवात् आप इति निश्चयं चकार । तदिदं जगत् आप एव । यद्यपि इतराणि भूतानि विद्यन्ते तथापि आप एव त्विदं जगत्

इति निश्चीयते। अपोभूयस्त्वदर्शनात्। कनीयांसि चेतराणि भूतानि। *आत्तं वै भूयसा कनीयः* (?) भूयसश्च आरम्भकत्वं प्रसिद्धं लोके। तस्मात् अप्रधानानि भूतानि उपादानं जगत इति। एवं सति इदम् अध्यात्मम्। वै इत्यवधारणार्थम्। इदमेव जगतो मूलम्। अतः तत् पृथिव्यग्न्यादिलक्षणं तूलम् अग्रम्। अयं पुरुषः कर्मज्ञानाधिकृतः पिता। एते पृथिव्यग्न्यादयः पुत्राः। तथा च व्याख्यातं विभूतिखण्डे। यत्र ह क्व च यस्मिन् कस्मिंश्चित् पुत्रस्य स्वभूतं यद् वस्तु तत् पितुरपि स्वमेव भवति। पितुरात्मभूतत्वात् पुत्रस्य। *आत्मा वै पुत्रनामासि* (कृ.यजु.एकाग्नि. २-११) इति दर्शनात् आत्मत्वम् अविशिष्टं पितापुत्रयोरिति। यत्र वा पितुर्वस्तु स्वभूतं तद्वा पुत्रस्य इति प्रसिद्धं लोके। तथैव इहापि पृथिव्यग्न्यादीनां यत्स्वम् तत् पुरुषस्य, यच्च पुरुषस्य तत्पुत्रस्थानीयानां पृथिव्यग्न्यादीनाम्। एकत्वात् अध्यात्माधिदैवतयोः, तथा च व्याख्यातम् *यदनु पृथिवी* (ऐ.आ.२-१-७) इत्यादिना। *एतत्तदुक्तं भवति* इति पूर्ववत्॥

५५. तदेतदध्यात्माधिदैवतैकत्वलक्षणं वस्तु विद्वान् महिदासो नामतः, इतराया अपत्यम् ऐतरेयः देवता ह स्म किमाहेति ? उच्यते। यो देवैः सह एकत्वेन माम् आत्मानम् अहं वेद जाने, आ उ मत्, आ मत्तो मया सह एकत्वेन च देवान् वेद। कुतः ? इतः अस्मात् अध्यात्मं कर्त्रा प्रयुज्यते चरुपुरोडाशादिस्थितिकारणं प्रदानं येषां देवानां, ते इति इतःप्रदाना हि यस्मात् तस्मात् एते इतः अस्माल्लोकात् मया पित्रा पुत्रा इव अन्नसंस्कारादिना संभृताः सम्यक् भृताः। तस्मान्मम च देवानां चैकत्वमेव।

यदुक्तम् - *इदं वै मूलमदस्तूलम्* इति तदेवम् इतो यद्देवानां सोमाज्यपयःपश्वादि संप्रदीयते तस्मात् अब्बाहुल्यात् अस्त्वम्। तत्साधनं च अग्निहोत्रादिलक्षणं कर्म जगतो मूलमिति। अतोऽपां जगत्कारणत्वम् (त्वात्) उपपन्नमेवम् आप एवेत्युक्तम्। पुरुषस्य प्रजापतित्वनिरूपण-प्रसङ्गेन अप्साधनं कर्म पुरुषनिर्वर्त्यं सर्वोऽप्ययं प्राणस्यैव गुणविस्तारो यत्कारणं यच्च कार्यम्। तस्य सर्वस्य प्राणव्यतिरेकेणाभावात्। तस्मात् प्राणो ब्रह्म उक्थं बृहती, आत्मा च सर्वस्य॥

स एष गिरिश्चक्षुः श्रोत्रं मनो वाक्प्राणस्तं ब्रह्मगिरिरित्याचक्षते। गिरति ह वै द्विषन्तं पाप्मानं भ्रातृव्यं पराऽस्य द्विषन् पाप्मा भ्रातृव्यो भवति य एवं वेद॥ २॥

५६. तस्य ब्रह्मणः आत्मत्वेन अनुपलब्धिकारणम् इदमुच्यते। स एष वक्ष्यमाणः चक्षुः श्रोत्रं मनो वाक् प्राणः इति इन्द्रियसमुदाय एषः गिरिरिव गिरिः। यथा गिरिः उदकरत्नादीनां गिरणात् शिलासंचयः तथा चक्षुरादीन्द्रियगिरिरपि प्राणात्मनोः परापरयोः ब्रह्मणोः गिरणात् गिरिः। तं च अत एव ब्रह्मगिरिरित्याचक्षते शिष्टाः। **चक्षुरादिव्यापारासक्तबुद्धित्वाद् हि सर्वो लोको ब्रह्म नोपलभते। अतो गीर्णमिव इन्द्रियैः।** यस्तु स्वव्यापारप्रवृत्तैरिन्द्रियैः छादितत्वान्नोपलभ्यते ब्रह्म इति वेद स इन्द्रिय-व्यापारमुत्सृजंस्तद्व्यापारजनितं पाप्मानम् आत्मनो विद्विषन्तं भ्रातृव्यं गिरति विनाशयति। अनुरूपमेव विद्याफलम्। गतमन्यत्॥

प्राणस्य भूतिरूपेणोपासनम्

स एषोऽसुः स एष प्राणः स एष भूतिश्चाभूतिश्च । तं भूतिरिति देवा उपासांचाक्रिरे ते बभूवुस्तस्माद्धाऽप्येतर्हि सुप्तो भूर्भूरित्येव प्रश्वसिति । अभूतिरित्यसुरास्ते पराबभूवुः । भवत्यात्मना पराऽस्य द्विषन् पाप्मा भ्रातृव्यो भवति य एवं वेद ॥ ३ ॥

५७. प्राणब्रह्मणः स्तुतिरुपास्यत्वात् प्ररोचनार्थम् आरभ्यते । स एषोऽसुः प्राणनं जीवनं प्राणिनाम् । कोऽसौ ? यः प्रस्तुतः स एष प्राणः । किं च स एवैष भूतिहेतुत्वात् भूतिः । प्राणवतो हि भूतिर्भवति नाप्राणस्य तथा अभूतिश्च । अभूतिहेतुत्वात् । तं भूतिरिति देवा उपासांचक्रिरे । भूतिगुणोपासनात् ते देवा बभूवुः । भूतिमन्तः संवृत्ताः इत्यर्थः । यस्मात् भूतिगुणवान् असौ प्राणः तस्मात् ह अप्येतर्हि एतस्मिन्नपि काले सुप्तः पुरुषो भूर्भूः इति शब्दानुकरणम् । कुर्वन् भूतिगुणवत्त्वम् आत्मनो दर्शयन्निव प्रश्वसिति । अभूतिः अभूतिहेतुत्वात् । प्राणापक्रमणे त्वभूतिः प्रसिद्धा लोके । अतोऽभूतिरित्यसुरा उपासांचक्रिरे । तेन ते पराबभूवुः । तस्मात् भूतिगुणवान् प्राण उपास्यः नाऽभूतिगुणः, भूतिगुणवान् अहं प्राण इत्येवं यो वेद उपास्ते तस्यैतद् विद्याफलम् उच्यते । भूतिगुणात्मनैव देववद् भवति । द्विषंश्च पाप्मा भ्रातृव्योऽसुरवत् पराभवति ॥

प्राणस्य अमृतत्वोपासनम्

स एष मृत्युश्चैवामृतं च । तदुक्तमृषिणा - अपाङ् प्राङेति स्वधया गृभीत इत्यपानेन ह्ययं यतः प्राणो न पराङ् भवति ।

अमर्त्यो मर्त्येना सयोनिरित्येतेन हीदं सर्वं सयोनि मर्त्यानि हीमानि शरीराणी ँ३ अमृतैषा देवता। ता शश्वन्ता विषूचीना नियन्ता न्य१न्यं चिक्युर्न निचिक्युरन्यमिति निचिन्वन्ति हैवेमानि शरीराणी३ अमृतैवैषा देवता, अमृतो ह वा अमुष्मिँलोके संभवत्यमृतः सर्वेभ्यो भूतेभ्यो ददृशे य एवं वेद य एवं वेद॥ ४॥

५८. किं च स एष प्राणो मृत्युश्च। मरणहेतुत्वात्। तदपगमे हि सर्वो लोको म्रियते। अमृतं च। अमृतहेतुत्वात्। तदनुपगमात् हि अमृता देवाः। तदुक्तमृषिणा। *अपाङ् प्राङेति स्वधया गृभीतोऽमर्त्यो मर्त्येना सयोनिः* (ऋ.१-१६४-३८) अपाङ् अपनयनं कुर्वन् मूत्रपुरीषादीनाम् अपानवृत्या अपाङ् एति अधो गच्छति। तथा प्राङ् प्राणवृत्या एति। एवं प्राणापानवृत्तिभ्यां लोकस्य जीवनं कुर्वन् आस्ते शरीरेषु। किंनिबन्धना हि (?) तस्य शरीरे स्थितिः? उच्यते। स्वधया अन्नेन गृभीतः। गृहीत इत्येतत्। अन्नेन हि दामस्थानीयेन अस्मिन् शरीरे बद्धः प्राणो दाम्नेव वत्सः। तत्रान्नमपानेनाहृतम् अपानशब्दवाच्यं प्राणस्य स्थितिकारणं भवतीत्येतदाह ब्राह्मणम्। अपानेन अपानसहभूतेनान्नेनेत्यर्थः। हि अयं प्राणः यतः यस्मात् गृहीतत्वात् न परा(ङ्) भवति शरीरमुत्सृज्य न गच्छतीत्यर्थः। अमर्त्यः अमरणधर्मित्वात् अमृतः मर्त्येन शरीरेण सयोनिः समानस्थानः समाननिबन्धनः। अन्नमेव हि समानं प्राणशरीरयोः निबन्धनम्। तुल्यप्रसवो वा शरीरेण। यथाव्याख्यातमेवार्थमाह ब्राह्मणम्। एतेन प्राणेन

यस्मात् इदं शरीरजातं सर्वं सयोनि कः पुनरमर्त्यो मर्त्यं वा किमिति ? आह | मर्त्यानि हि इमानि | शरीराणीँ३ अमृतैषा प्राणदेवतेति | तौ शरीरप्राणौ शश्वन्ता शश्वन्तौ | नित्यसहभूतत्वात् प्राणेन शरीरमपि शश्वदिव | विषूचीना विष्वग्गती | नानागतिष्वपि विरुद्धं यन्तौ वियन्तौ | मर्त्यत्वात् शरीरम् अधो याति | प्राणस्तु अमृतत्वात् ऊर्ध्वं याति | न्यन्यं देहं निचिक्युः उपचितवन्तः, वर्धितवन्तः अन्नपानाभ्याम् | न निचिक्युः न वर्धितवन्तोऽन्यं प्राणम् | अमृतत्वात् | यथाव्याख्यातार्थमेवाह ब्राह्मणम् | विचिन्वन्ति हैव इमानि शरीराणी ३ | अतो मर्त्यानि तानि | अचैतन्यात् | चैतन्यत्वाच्चामृतैवैषा प्राणदेवता | अमृत एवाहं प्राणदेवतास्मि इत्येवं यो वेद तस्मै विद्याफलम् | अमृतोऽमरणाधर्मा (ह वा) अमुष्मिन् हिरण्यगर्भलोके इतः प्रेत्य संभवति | तद्भूतश्च सन् अमृतः प्राणवदेव सर्वेभ्यो भूतेभ्यो ददृशे दृश्यते | सर्वभूतानां ध्येयो भवतीत्यर्थः | द्विर्वचनमध्यायपरिसमाप्त्यर्थम् ||

|| इति अष्टमः खण्डः ||

|| इति प्रथमोऽध्यायः ||

अथ द्वितीयोऽध्यायः - प्रथम खण्डः

प्राणस्य शतर्चित्वम्

एष इमं लोकमभ्यार्चत् पुरुषरूपेण य एष तपति प्राणो वाव तदभ्यार्चत् प्राणो ह्येष य एष तपति तं शतं वर्षाण्यभ्यार्चत्तस्मा-च्छतं वर्षाणि पुरुषायुषो भवन्ति तं यच्छतं वर्षाण्यभ्यार्चत्तस्मा-च्छतर्चिनस्तस्माच्छतर्चिन इत्याचक्षत एतमेव सन्तम् ॥ १ ॥

५९. प्राण उक्थम् इत्येतदवधारितम् । तस्य च प्राणस्य सर्वात्मत्वम् । तं सर्वात्मानं प्राणम् उक्थमहमस्मीति विद्यात् । कर्मज्ञानाधिकृतः पुरुषः प्रजापतिः । अत्र च महाव्रताख्ये क्रतौ बृहतीसहस्रं संपिपादयिषितम् । तस्मिंश्च संपाद्यमाने सहस्रसंवत्सरसत्रान्तं कर्म संपादितं भवति । न हि संपादनव्यतिरेकेण तत्कर्म पुरुषेण कर्तुं शक्यम् । पुरुषस्य सहस्रसंवत्सरा-युषोऽभावात् । न च अनायुषां पुरुषाणां कर्मण्यधिकारः इति तदाम्नायानामा-नर्थक्यप्रसङ्गात् । कथं पुनः बृहतीसहस्रसंपत्त्या सहस्रसंवत्सरनिर्वर्त्यं कर्म संपन्नं भवतीति ? उच्यते । पुरुषायुस्संमितत्वात् बृहतीसहस्रस्य । तच्च वक्ष्यति । षट्त्रिंशतमक्षराणां सहस्राणि भवन्ति । तावन्ति पुरुषायुषोऽह्नां सहस्राणि भवन्तीति । किं च बृहतीसहस्रे च संपाद्यमाने प्राण एव संपादितो भवति । *प्राणो बृहती* इति ह्युक्तम् । प्राणश्च सर्वम् अहोरात्रादिः कालः कर्माङ्गभूतः । उक्तं च अहरेव प्राणः, रात्रिरपानः इति । तथा कर्ता, मन्त्रदृशः, मन्त्राः, क्रिया, फलं च । तस्मात् प्राणे च संपाद्यमाने सर्वं संपादितं स्यात् । कर्त्रादिः सर्वस्य प्राणव्यतिरेकेणाभावात् ॥

६०. कथं प्राण एव कर्त्रादिसर्वमिति ? उच्यते। एष प्राणो यः प्रस्तुतः स इमं शिरःपाण्यादिलक्षणं लोकं पिण्डपुरुषम् अभ्यार्चत् अभिगतवान् प्रविष्टः इत्यर्थः। तथा चोक्तम् *तं प्रपदाभ्याम्* (ऐ.आ.२-१-४) इत्यादिना। केन स्वरूपेण अभ्यार्चत् इत्याह पुरुषरूपेण। कोऽसौ अभ्यार्चदिति उच्यते। य एषोऽसौ आदित्यस्तपति। यदादित्यकर्तृकं शरीरप्रवेशनम्, तत् परमार्थतः प्राणो वाव प्राण एव तदभ्यार्चत्। ननु आदित्यप्रवेशः श्रुतो न प्राणकर्तृक इति ? नैष दोषः। प्राणत्वात् आदित्यस्य। कथं ? प्राणो हि यस्मात् एष सविता य एष तपति। तस्मात् प्राणकर्तृक एव प्रवेशः, तथा च आदावेव व्याख्यातम्। एवं च सति उपपन्नं वक्ष्यमाणम् *प्राणो वा अहमस्म्यृषे* (ऐ.आ.२-२-३) इत्यादि। *तद्योऽहं सोऽसौ* (ऐ.आ.२-२-४) इत्यादि च। तमिमं लोकं पिण्डं शतं वर्षाणि अभ्यार्चत् यस्मात् तस्मात् शतं वर्षाणि पुरुषायुषो भवन्ति। *पुरुषायुषः* इति निपातनात्। पुरुषस्य आयूंषि इत्येतत्। तस्मात् शतवर्षसंख्ययैव संपत् क्रियते। *तावन्ति शतसंवत्सरस्याह्नाम्* (ऐ.आ.२-२-४) इत्यादि। तञ्च यत् यस्मात् शतं वर्षाणि अभ्यार्चत् तस्मात् शतर्चिनः प्रथममण्डलदशऋषयः ऋष्यनुक्रमणे प्रसिद्धाः। तांश्च मण्डलदशर्षीन् शतर्चिन इत्याचक्षते एतमेव प्राणं सन्तम्। न हि अप्राणस्य मन्त्राणां दर्शनम् उपपद्यते। स एव प्राणः ऋषिशरीरस्य शतवर्षाभ्यर्चनात् शतर्चिशब्दवाच्यः प्रथममण्डलसंस्थानात्मभूतानेव एतान्, मन्त्रान् ददर्श। उत्तरेष्वपि मण्डलेषु ऋक्षु एवमेव यथोक्तं योज्यम्। यस्मात् ब्रह्मैव ऋषिः सर्वेषां मन्त्राणाम्॥

प्राण एव गृत्समदः

स इदं सर्वं मध्यतो दधे यदिदं किञ्च स यदिदं सर्वं मध्यतो दधे यदिदं किं च तस्मान्माध्यमास्तस्मान्माध्यमा इत्याचक्षत एतमेव सन्तम् ।। २ ।।

६१. स प्राणः इदं जगत् सर्वं मध्यतो मध्ये आत्मनो (आत्मना) दधे धृतवान् यदिदं किञ्च। यस्माच्च एवं धृतवान् तस्मात् माध्यमा ऋषयः प्राणः। आद्यन्ते मण्डले मुक्त्वा मध्यमानां मण्डलानां द्रष्टारो बहुत्वान्माध्यमा इत्युच्यन्ते ।।

प्राणो वै गृत्सोऽपानो मदः स यत् प्राणो गृत्सोऽपानो मदस्तस्माद् गृत्समदस्तस्माद्गृत्समद इत्याचक्षत एतमेव सन्तम् ।। ३ ।।

६२. विशेषतस्तु द्वितीयमण्डलदृक् गृत्समदः। प्राणो वै गृत्सः। स्वापकाले वागादीनां गिरणात्। अपानो मदः। रेतोविसर्गकारणमद हेतुत्वात्। स यत् प्राण इत्यादि पूर्ववत् ।।

प्राणः विश्वामित्रः

तस्येदं विश्वं मित्रमासीद्यदिदं किञ्च तद्यदस्येदं विश्वं मित्रमासीद्यदिदं किञ्च तस्माद् विश्वामित्रस्तस्माद्विश्वामित्र इत्याचक्षत एतमेव सन्तम् ।। ४ ।।

६३. तस्य प्राणस्य इदं सर्वं भोज्यजातं मित्रं स्निग्धम् स्थितिहेतुत्वात् आसीत्। एवं विश्वमित्रः सन् विश्वामित्र इत्युच्यते प्राणः ।।

प्राणः वामदेवः

तं देवा अब्रुवन्नयं वै नः सर्वेषां वाम इति तं यद्देवा अब्रुवन्नयं वै नः सर्वेषां वाम इति तस्माद्वामदेवस्तस्माद्वामदेव इत्याचक्षत एतमेव सन्तम् ।। ५ ।।

६४. तं प्राणं देवा वागादयः पराजिताः सन्तोऽब्रुवन् पूजयन्तः । अयं नः अस्माकं वामो वननीयः संभजनीयः इति । एवं यस्माद् वामो देवानामिति तस्माद् वामदेवः प्राणः ।।

प्राणोऽत्रिः

स इदं सर्वं पाप्मनोऽत्रायत यदिदं किञ्च स यदिदं सर्वं पाप्मनोऽत्रायत यदिदं किञ्च तस्मादत्रयस्तस्मादत्रय इत्याचक्षत एतमेव सन्तम् ।। ६ ।।

६५. स प्राणः इदं सर्वं प्राणिजातं यदिदं किञ्च यत्किञ्चेदं प्राणात्मप्रतिपन्नं पाप्मनोऽनर्थरूपात् अत्रायत पालितवान् । यस्मादेवं पाप्मनोऽत्रायत तस्मात् अत्रयः प्राणः ।।

।। इति प्रथमः खण्डः ।।

अथ द्वितीयः खण्डः

प्राणः भरद्वाजः

एष उ एव बिभ्रद्वाजः प्रजा वै वाजस्ता एष बिभर्ति यद् बिभर्ति तस्माद् भरद्वाजस्तस्माद् भरद्वाज इत्याचक्षत एतमेव सन्तम् ।। १ ।।

६६. एष एव प्राणो बिभ्रद् वाजः। प्रजा वै वाजः अन्नभूतत्वात्। ता एष स्वात्मानुप्रवेशेन प्रजा बिभर्ति। भरणाद् वाजस्य भरद्वाजः प्राणः।।

प्राणो वसिष्ठः

तं देवा अब्रुवन्नयं वै नः सर्वेषां वसिष्ठ इति तं यद् देवा अब्रुवन्नयं वै नः सर्वेषां वसिष्ठ इति तस्माद् वसिष्ठस्तस्माद्वसिष्ठ इत्याचक्षत एतमेव सन्तम्।। २।।

६७. तं देवा अब्रुवन् पूर्ववत्। अयं प्राणो नः सर्वेषां वसिष्ठः। वसुतमः वसुमत्तमो वा। देवैरुक्तो वसिष्ठ इति तस्माद् वसिष्ठः प्राणः।।

प्राणः प्रागथाः

स इदं सर्वमभिप्रागाद्यदिदं किञ्च स यदिदं सर्वमभिप्रागाद् यदिदं किञ्च तस्मात् प्रगाथास्तस्मात्प्रगाथा इत्याचक्षत एतमेव सन्तम्।। ३।।

६८. स प्राणः इदं सर्वम् आत्मानुप्रवेशेन अभिप्रागात् प्रगतवान् यस्मात् स प्राणः प्रगाथः।।

प्राणः पावमान्यः

स इदं सर्वमभ्यपवयत यदिदं किञ्च स यदिदं सर्वमभ्यपवयत यदिदं किञ्च तस्मात् पावमान्यस्तस्मात् पावमान्य इत्याचक्षत एतमेव सन्तम्।। ४।।

६९. स प्राणः इदं सर्वम् अभ्यपवयत आभिमुख्येन अशोधयत् (यत्) यस्माद् एवम्। पावनात् सर्वस्य पावमान्यः प्राणः। पावमान्य

इति ऋच उच्यन्ते। तदभेदेन ऋषिर्निर्दिश्यते। ऋषिप्रकरणात्॥

प्राणस्य महासूक्तक्षुद्रसूक्तत्वम्

सोऽब्रवीदहमिदं सर्वमसानि यच्च क्षुद्रं यच्च महदिति ते क्षुद्रसूक्ताश्चाभवन् महासूक्ताश्च तस्मात् क्षुद्रसूक्तास्तस्मात् क्षुद्रसूक्ता इत्याचक्षत एतमेव सन्तम्॥ ५॥

७०. स प्राणः शरीरेष्वात्मानं सर्वप्राणिनां पश्यन् अब्रवीत्। किमिति? उच्यते। अहं प्राणः इदं सर्वम् असानि, भवानि। किं तत् ? इदं यद्यत् क्षुद्रं कृमिकीटादि यच्च महत् हस्त्यादि। तस्मात् स प्राणः क्षुद्रसूक्ताश्च ते अभवत् महासूक्ताश्च। तत्र तं ऋषिमपि तन्नाम्ना आचक्षते। तस्मात् प्राण एव सर्वमन्त्राणां द्रष्टा। *एतमेव* इति दर्शनात्॥

प्राणः सूक्तम्

सूक्तं बतावोचतेति तत्सूक्तमभवत्तस्मात्सूक्तं तस्मात्सूक्तमित्याचक्षत एतमेव सन्तम्॥ ६॥

७१. किञ्च न केवलम् ऋषय एव प्राणः, मन्त्राश्च सूक्तादिरूपाः। तत् कथमिति ? उच्यते। सूक्तं बत इत्यनुकम्पां कुर्वन्, वागादीन् स्तुतिं कृतवन्तोऽवोचत यूयम् इत्युक्तवान् मन्त्रैरेव। तत् तस्मात् सूक्तमभवत् प्राणः। एवं मन्त्रशब्दाकारेण परिणमत इत्यर्थः। तस्मात् सूक्तं प्राणः तस्मादेव च कारणात् मन्त्रसमुदायं सूक्तमित्याचक्षते एतमेव प्राणं सन्तम्॥

प्राणः ऋक्

एष वा ऋगेष ह्येभ्यः सर्वेभ्यो भूतेभ्योऽर्चत स यदेभ्यः सर्वेभ्यो भूतेभ्योऽर्चत तस्मादृक्तस्मादृगित्याचक्षत एतमेव सन्तम्।। ७ ।।

७२. सूक्तावयवभूता ऋगप्येष एव प्राणः। एष हि यस्मात् प्राणः सर्वेभ्यो भूतेभ्योऽर्थाय अर्चत गतवान्, पूजां वा अकरोत् तस्मात् अर्चनात् ऋक् एष प्राणो मन्त्रोऽपि ।।

प्राणोऽर्धर्चः

एष वा अर्धर्च एष ह्येभ्यः सर्वेभ्योऽर्धेभ्योऽर्चत स यदेभ्यः सर्वेभ्योऽर्धेभ्योऽर्चत तस्मादर्धर्चस्तस्मादर्धर्च इत्याचक्षत एतमेव सन्तम्।। ८ ।।

७३. अत एवैष वै मन्त्रावयवोऽर्धर्चः प्राणः। एष हि यस्मात् सर्वेभ्योऽर्धेभ्यः स्थानेभ्योऽर्थाय अर्चत इत्युक्तार्थम्। अर्धेभ्योऽर्चनात् अर्धर्चः प्राणः। ऋचोऽर्धमपि प्राणः। एतमेव सन्तम् अर्धर्च इत्याचक्षते ।।

प्राणः पदम्

एष वै पदमेष हीमानि सर्वाणि भूतानि पादि स यदिमानि सर्वाणि भूतानि पादि तस्मात् पदं तस्मात् पदमित्याचक्षत एतमेव सन्तम्।। ९ ।।

७४. पदपादयोस्तुल्यत्वात् समानं निर्वचनम्। एष वै पदं पादश्च प्राण एव। कथम्? एष हि यस्मात् इमानि सर्वाणि भूतानि पादि अगच्छत् आत्मभावेन। तस्मात् पदं प्राणः। प्राणमेव सन्तं पदं पादं च पदम् इत्याचक्षते ।।

प्राणोऽक्षरम्

एष वा अक्षरमेष ह्येभ्यः सर्वेभ्यो भूतेभ्यः क्षरति न चैनमतिक्षरन्ति स यदेभ्यः सर्वेभ्यो भूतेभ्यः क्षरति न चैनमतिक्षरन्ति तस्मादक्षरं तस्मादक्षरमित्याचक्षत एतमेव सन्तम् ।। १० ।।

७५. एष वै प्राणोऽक्षरं वर्णः । हि यस्मादेष प्राणः सर्वेभ्यो भूतेभ्योऽर्थाय फलसाधनप्रदानरूपेण क्षरति । न चैनं प्राणम् अतीत्य भूतानि क्षरन्ति । यत् फलं साधनं वा भूतानि प्राणमतीत्य न प्रयच्छन्ति इत्यर्थः । *प्राणः प्राणं ददाति प्राणाय प्राणं ददाति* (छां.७-१५-१) श्रुत्यन्तरात् । यस्मात् कारणात् क्षरति, क्षरणाभावेन नञर्थेन न युक्तः प्राणः, अक्षरं वर्णमपि (वर्णोऽपि?) एतमेव सन्तम् अक्षरम् इत्याचक्षते ।।

ता वा एताः सर्वा ऋचः सर्वे वेदाः सर्वे घोषा एकैव व्याहृतिः प्राण एव प्राण ऋच इत्येव विद्यात् ।। ११ ।।

७६. ता वै एताः सूक्तादिरूपाः सर्वा ऋचः उक्ताः सर्वे च वेदाः सर्वे च घोषाः ध्वनयः । न घोषवतामेव अक्षराणां ग्रहणम् । सर्वस्य शब्दस्य प्राणत्वेन विवक्षितत्वात् । एकैव व्याहृतिः एकमेव व्याहरणम् । कोऽसौ ? प्राण एवेति । एकेन प्राणपदेन सर्वम् अभिहितं भवतीत्यभिप्रायः । यस्मादेवम्, तस्मात् प्राण ऋच इत्येव विद्यात् विजानीयात्, सर्वोपलक्षणार्थम् ऋग्ग्रहणम् । सर्वमुक्तं कर्माङ्गजातं प्राण इत्येव विद्यात् इत्यर्थः ।।

|| इति द्वितीय खण्डः ||

अथ तृतीयः खण्डः

तिस्रः तृचाशीतयः प्राणस्य अन्नम्

विश्वामित्रं ह्येतदहः शंसिष्यन्तमिन्द्र उपनिषसाद स हान्नमित्यभि-व्याहृत्य बृहतीसहस्रं शशंस तेनेन्द्रस्य प्रियं धामोपेयाय ॥ १ ॥

७७. यद्यपि सर्वा ऋचः प्राण इत्येव वेदितव्याः तथापि बृहती साक्षात् प्राणसंस्तुता । तस्मात् बृहतीमेव संपादयेत् इति स्थितम् । तत्सहस्रे हि संपाद्यमाने सर्वं संपन्नं भवति कर्मजातं पुरुषायुषनिर्वर्त्यम् । पुरुषायुषसंमितं हिं बृहतीसहस्रम् । तत्र महाव्रतीयेऽहनि बृहतीसहस्रे शस्यमाने तिस्रस्तृचाशीतयो बृहतीसहस्रात्मन इन्द्रस्य प्राणस्य अन्नम् इत्येतद्दर्शनं विधित्सन् आह ॥

७८. विश्वामित्रम् ऋषिं महाव्रते क्रतौ, कस्यचित् यजमानस्य होतारम् एतदहः एतन्महाव्रतीयेऽहनि बृहतीसहस्रं शंसिष्यन्तं शंसिष्यामी-त्येवम् उपक्रमं कुर्वन्तम् इन्द्रः प्राणः ममान्नम् अनेन होत्रा तृचाशीतिरूपं मह्यं दित्सितमिति इन्द्रः समीपं विश्वामित्रस्य होतुर्निषसाद उपनिषण्णवान् भोक्ष्यमाण (अपेक्षमाण) इव भोजयितुः समीपे । स च होता विश्वामित्रः इन्द्रस्यान्नम् । इयं तृचाशीतिरिति मनसा अभिव्याहृत्य संकल्प्य बृहतीसहस्रं बृहतीसहस्रैकदेशत्वात् प्रथमां तृचाशीतिं (शशंस)शंसितवान् । तेन अन्नाभिध्यानयुक्तेन तृचाशीतिशंसनेन इन्द्रस्य प्रियं धाम प्रियं स्थानम् उपेयाय उपगतवान् विश्वामित्रः ॥

तमिन्द्र उवाच ऋषे प्रियं वै मे धामोपागाः स वा ऋषे द्वितीयं शंसेति स हान्नमित्येवाभिव्याहृत्य बृहतीसहस्रं शशंस तेनेन्द्रस्य प्रियं धामोपेयाय ॥ २ ॥

७९. सर्वस्य हि अन्नदः प्रियो भवति। स चेन्द्रः प्रीतः सन् तं विश्वामित्रमुवाच। हे ऋषे प्रियम् इष्टं मे मम धाम स्थानं इत्येतत् उपागाः उपगतवानसि। स (वै)त्वं हे ऋषे द्वितीयं ममान्नं तृचाशीतिं शंस इति। स हान्नम् इत्याद्युक्तार्थम्। ननु इन्द्रनियोगमन्तरेणापि तिस्रस्तृचाशीतयः शस्यन्त एव बृहतीसहस्रसंपादनाय। सत्यमेवम्। तथापि तु तृचाशीतिषु अन्नाभिध्यानकर्तव्यतास्तुतिपरं *द्वितीयं तृतीयं शंस* इति नियोगरूपं वचनम्। यथा हि लोके भुञ्जानस्य इष्टव्यञ्जनादिप्राप्तौ द्वितीयं तृतीयं प्रयच्छेति, तद्वत् इन्द्रस्यात्यर्थं प्रीतिकराभिध्यानयुक्तास्तृचाशीतय इति स्तूयन्ते ॥

प्राणस्य सर्वात्मत्वम्

तमिन्द्र उवाच ऋषे प्रियं वै मे धामोपागाः स वा ऋषे तृतीयं शंसेति स हान्नमित्येवाभिव्याहृत्य बृहतीसहस्रं शशंस तेनेन्द्रस्य प्रियन्धामोपेयाय तमिन्द्र उवाच ऋषे प्रियं वै मे धामोपागा वरं ते ददामीति स होवाच त्वामेव जानीयामिति तमिन्द्र उवाच प्राणो वा अहमस्म्यृषे प्राणस्त्वं प्राणः सर्वाणि भूतानि प्राणो ह्येष य एष तपति स एतेन रूपेण सर्वा दिशो विष्टोऽस्मि तस्य मेऽन्नं मित्रं दक्षिणं तद्वैश्वामित्रमेष तपन्नेवास्मीति होवाच ॥ ३ ॥

८०. तथा चेन्द्रस्तुष्टः सन् विश्वामित्रम् (उवाच)वरं ते तुभ्यं ददामीति | स होवाच होता | त्वामेवेन्द्रं यथारूपं जानीयां त्वद्विज्ञानमेव मम वरं देहीति | तमेवमुक्तवन्तम् इन्द्रः प्रत्युवाच | प्राणो वा अहमस्मि यथाव्याख्यातः स श्रुत्या हे ऋषे | त्वं च प्राणः न केवल (लं त्वमेव)मेव प्राणः, सर्वाणि च स्थावरजङ्गमानि भूतानि प्राण एव | *तद्यथायमाकाशः* (ऐ.आ.२-१-६)इत्यादि ह्युक्तम् | किं च प्राणोऽस्म्येष इत्युक्तविशेषणं य एष तपति सविता इति | सोऽहमिन्द्रः एतेन प्राणादित्यलक्षणेन रूपेण सर्वा दिशः प्राच्याद्याः विष्टः प्रविष्टः अस्मि भवामि | तथा चोक्तम् - *पवमानो हरित आविवेश* (ऐ.आ.२-१-१) | *आदित्य उदयन्* (यत्) *प्राचीं दिशं प्रविशति* (प्र.१-६)इति | तस्य मे मम एवंभूतस्य प्राणस्येन्द्रस्य सर्वात्मनः अन्नं मित्रं संबद्धि | स्थितिकरत्वात् सोमात्मकं हि तद्व्याख्यातम् *अथातो रेतसः* (ऐ.आ.२-१-३) इत्यादिना | अतो दक्षिणं वर्धयितृ | किं तत्? अन्नम् तदन्नं वैश्वामित्रम् | विश्वामित्रेण होत्रा ऋषिणा तृचाशीतिरूपं दृष्टम् इति वैश्वामित्रम् | अथवा विश्वं च तत् मित्रं च तद् विश्वामित्रम् | समस्तं च सोमात्मकं जगत् अन्नं मम वर्धयितृ | वृद्धिश्च स्वार्थे वैश्वामित्रम् इति | तथा चोक्तम् *तस्येदं विश्वं मित्रमासीत्* (ऐ.आ.२-२-१) इत्यादि | अहं तु अत्ता प्राणोऽग्निभूत आदित्यश्च | एष तपन्नेवास्मीति होवाच | इदं मम त्वं यथात्वम् (तत्त्वं याथात्म्यम्) | एतज्जानीहि इत्युवाच || ननु *एष इमं लोकमभ्यार्चत्* (ऐ.आ.२-२-१) इत्यादिना उक्तमेव

इन्द्रस्य आदित्यादि सर्वप्राणात्मयाथात्म्यम् | किमर्थं पुनरिहोच्यते प्राणो वा अहमस्मि इत्यादिना? तत्रैतत् ज्ञापने प्रयोजनम् | निष्कामेन यथावत् कृतं श्रौतं कर्म ज्ञानोत्पत्तिकारणमिति | यथाज्ञानं वरः प्राप्तो विश्वामित्रेण अशीतयोऽन्नं सर्वं प्राणोऽस्मि इति च | विज्ञानस्य पूर्वमेव प्राप्तत्वात् न पुनर्वचनीयमिति ||

|| इति तृतीयः खण्डः ||

अथ चतुर्थः खण्डः

बृहतीसहस्रस्य शरीरादिसम्पादनम्

तद्वा इदं बृहतीसहस्रं संपन्नं तस्य यानि व्यञ्जनानि तच्छरीरं यो घोषः स आत्मा य ऊष्माणः स प्राणः | एतद्ध स्म वै तद्विद्वान् वसिष्ठो वसिष्ठो बभूव तत एतन्नामधेयं लेभे | एतदु हैवेन्द्रो विश्वामित्राय प्रोवाचैतदु हैवेन्द्रो भरद्वाजाय प्रोवाच तस्मात् स तेन बन्धुना यज्ञेषु हूयते || १ ||

८१. यथा तृचाशीतिषु अन्नत्वदर्शनमुक्तम् प्राणस्य, एवं बृहतीसहस्र संबद्धव्यञ्जनादिभ्यः शरीरादिसंपद्विशेषार्थं *तद्वा इदम्* इत्याद्यारभ्यते | तत् बृहतीसहस्रं महाव्रतब्राह्मणे यथा संपादितं वैशब्देन स्मारयति | तदिदं बृहतीसहस्रं इह वक्ष्यमाणाभिः कल्पनाभिः संपिपादयिषितं बुद्धौ संनिहितम् उच्यते (इदमिति?) | तस्य बृहतीसहस्रस्य शस्त्रभूतस्य अक्षराणां यानि व्यञ्जनानि स्वरव्यञ्जकत्वात् कादीनि | तानि बृहतीसहस्रात्मन इन्द्रस्य तच्छरीरम् | रूपजात्यादयो यथा शरीरे व्यज्यन्ते एवं स्वरादयः कादिषु |

तस्मात् शरीरावयवत्वेन तानि प्रविभज्य कल्प्यन्ते। तत्र यो घोषः गद्यादिषु व्यज्यमानः मध्यत्वसामान्यात् आत्मा। शरीरावयवानामिव मध्यमं शरीरम्। ये ऊष्माणः शषसादिषु व्यज्यमानाः विसर्जनीयश्च साक्षात् प्राणरूपत्वात् इन्द्रस्य प्राणः। तदेतत् बृहतीसहस्रदर्शनम् एवं विद्वान् वसिष्ठः ऋषिः, वसिष्ठो वभूव। ह स्म वै किल इति स्तुतिर्दर्शनस्य। वसिष्ठत्वगुणयोगादेव तत एतन्नामधेयं लेभे लब्धवान्। स वसिष्ठो वसिष्ठ इति प्रख्यातो लोके। एतदेव च दर्शनं उ हैव इन्द्रः प्रोवाच। तथा एतत् उ हैव इन्द्रो भरद्वाजाय प्रोवाच। **महतो महद्भिर्महता आयासेन प्राप्तं महते प्रयोजनाय इति दर्शनं स्तौति। देवासुरोदधिमथनोद्भूतामृतवत्।** इन्द्रो विश्वामित्राय एतद्दर्शनं प्रोवाच इत्येतस्याविष्करणाय इयं प्रसिद्धिः प्रदर्श्यते स्तुत्यर्थमेव। **यस्मात् इन्द्रस्य विश्वामित्रस्य च विद्यासंप्रदानग्रहणनिमित्तः संबन्ध आसीत्, तस्मात् अद्यत्वेऽपि स इन्द्रः तेन बन्धुना बन्धनेन संबन्धेन यज्ञेषु सुब्रह्मण्यायां हूयते आहूयते** *कौशिक ब्राह्मण* इति॥

बृहती सहस्रस्य पुरुषायुष्ट्वम्

तद्वा इदं बृहतीसहस्रं संपन्नं तस्य वा एतस्य बृहतीसहस्रस्य संपन्नस्य षट्त्रिंशतमक्षराणां सहस्राणि भवन्ति तावन्ति शतसंवत्सरस्याह्नां सहस्राणि भवन्ति व्यञ्जनैरेव रात्रीराप्नुवन्ति स्वरैरहानि॥ २॥

८२. तद्वा इदमित्यादि बृहतीसहस्रस्य यथोक्तविशेषणानुवाद उत्तर-विशेषसंबन्धार्थः। तस्यैतस्य बृहतीसहस्रस्य यथोक्तविशेषणस्य षट्त्रिंशतं

सहस्राणि अक्षराणि गण्यमानानि। तावन्ति षट्त्रिंशदक्षरा बृहती। सा तावत्सहस्रगुणिता अक्षरशः षट्त्रिंशत्सहस्रा प्रसिद्धैव। तावन्त्येव अक्षरैस्तुल्यसंख्यातान्येव पुरुषायुषः शतसंवत्सरस्य अह्नां सहस्राणि भवन्ति। *शतं वर्षाणि पुरुषायुषः* इति हि (?) चोक्तम्। तत्र अक्षराणि स्वरव्यञ्जनभेदेन द्विधा विभज्यन्ते पुरुषायुषोऽहोरात्रसंख्यातुल्यत्वाय। तत्र व्यञ्जनैरेव रात्रीराप्नुवन्ति। शतसंवत्सरस्य संख्यासामान्यात्, अव्यक्तत्त्व सामान्याच्च व्यञ्जनानां रात्रीणां च। स्वरैरहानि। व्यक्तत्वसामान्यात् संख्यायाश्च। तत्रैवं सति बृहतीसहस्रसंपत्त्या षट्त्रिंशत्सहस्रा अग्नयोऽर्का-श्चिता भवन्ति। सहस्रसङ्ख्यायां सर्वसङ्ख्याया अन्तर्भावात् प्राण इव सर्वस्य जगतः सर्वं संपन्नं भवति। बृहती च प्राणः साक्षात्। प्राणश्च सर्वम् इत्युक्तं वक्ष्यमाणं च॥

प्राणबृहतीसहस्रसम्बन्धः

तद्वा इदं बृहतीसहस्रं संपन्नं तस्य वा एतस्य बृहतीसहस्रस्य संपन्नस्य परस्तात् प्रज्ञामयो देवतामयो ब्रह्ममयोऽमृतमयः संभूय देवता अप्येति य एवं वेद॥ ३॥

८३. *तद्वा इदम्* इत्यादि पूर्ववत्। तस्यैतस्य बृहतीसहस्रस्य एव संपन्नस्य प्रज्ञामयः। प्रज्ञया आत्मभूतया नित्यम् अविमुक्तः प्राणः इत्यभिप्रायः। यथा च कौषीतकिनां *प्राणोऽस्मि प्रज्ञात्मा यो वै प्राणः सा प्रज्ञा या वै प्रज्ञा स प्राणः* (कौ.३-४)इति च विज्ञायते। देवतामयः अग्न्यादिमयः। प्राणस्य सर्वात्मत्वादेव। ब्रह्ममयः वेदमयः। तथा चोक्तम्

सर्वा ऋचः (ऐ.आ.२-२-२)इत्यादि। अमृतमयः अमरणप्रायः स्वेनैव प्राणरूपेण। उक्तं च *अमृतैषा देवता* (ऐ.आ.२-१-८)इति। एते चत्वार आत्मानो बृहतीसहस्रस्य संपन्नस्य। यस्तु एवं बृहतीसहस्रसंपादनमुक्तं वक्ष्यमाण विशेषणं वेद स एतांश्चतुरः प्रज्ञादिमयान् इहैव आत्मत्वेन उपगम्य प्रज्ञादिमयः संभूय शरीरपतनस्य परस्तादपि देवता आत्मत्वेन अप्येति। *देवो भूत्वा देवानप्येति* (बृ.४-१-२)इति हि वाजसनेयके॥

प्राणस्य सूर्यात्मत्वम्

तद्योऽहं सोऽसौ योऽसौ सोऽहम्। तदुक्तमृषिणा-सूर्य आत्मा जगतस्तस्थुषश्चेति एतदु हैवोपेक्षेतोपेक्षेत॥ ४॥

८४. तत् तत्र दर्शनोपसंहारोऽयमुच्यते। योऽहं देहे शरीरे प्रज्ञात्मा प्राणोऽध्यात्मम्, सोऽसौ आदित्यो मण्डलाभिमानी, नान्यः। यश्चासावादित्ये स एवाहं, नान्यः। तथा चोक्तम् *एष इमं लोकमभ्यार्चत्* (ऐ.आ.२-२-१) इत्यादिना। तदेतत् सर्वं प्राणादित्यात्मैकत्वम् उक्तमृषिणा मन्त्रेणापि। कथम्?[1] चित्रं चायनीयं दर्शनीयम्। किं तत्? अनीकं मुखं द्वारम् इत्येतत्। केषां तन्मुखमिति? उच्यते। देवानां मित्रस्य वरुणस्याग्नेः। सर्वेषां हि देवानां प्रदर्शनार्थं मित्रावरुणाग्नीनां ग्रहणम्। सर्वासां हि देवतानां द्वारभूतः सविता। सर्वात्मकत्वात्। तस्मिन् दृष्टे सर्वा देवता दृष्टा भवन्ति।

---

1. चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः। आप्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च (ऋ.१-१०५-१) अयं मन्त्रो मूलभाष्ये एव स्थितो लोखकप्रमादात् त्रुटित इत्यनुमीयते। सर्वत्रापि मन्त्रोदाहरणपूर्वकमेव व्याख्यानदर्शनात् भाष्ये॥

तदव्यतिरेकात् सर्वदेवानाम् । तच्च उदगात् उद्गतम् उदितं *मां पश्य* इति ब्रुवदिव प्रतिपुरुषम् । किं च चक्षुः । चष्टे पश्यत्यनेनेति सर्वस्य । तेन हि सर्वो लोकः पश्यति । यदि नोदियात् सविता, सर्वं जगत् अन्धमभविष्यत् । किं च आ प्रा आपूरितवान् द्यावापृथिवी अन्तरिक्षं च त्रीन् लोकान् स्वेनैवात्मना । कोऽसौ सूर्यः? स्वीकरणात् रसरश्मिप्रज्ञाप्राणानां सूर्यः । स च आत्मा सर्वप्राणिनाम् । प्राणो जीवो जगतो जङ्गमस्य तस्थुषः स्थितवतः स्थावरस्य च इत्येतत् । **मन्त्रप्रकाशितं प्राणादित्यात्मैकत्वं बृहतीसहस्रात्म-रूपं यथा संपादितम् आत्मभावेन उपेत्य ईक्षेत, उपेक्षेत प्राकृतदर्शनान्तरितं निर्वातप्रदीपसमं तैलधारावच्च अच्छिन्नं दर्शनं कुर्यात् आ प्राणस्य विमोचनात् इत्यर्थः । द्विर्वचनम् उक्तवक्ष्यमाणबृहतीसहस्रसर्वसंपदुप-संहारप्रदर्शनार्थम् अध्यायसमाप्त्यर्थं च ॥**

॥ इति द्वितीयोऽध्यायः ॥

अथ तृतीयोऽध्यायः

अथ प्रथमः खण्डः

८५. यो ह वेत्यादि उक्थस्य पाञ्चविध्यगुणविशेषसंबन्धार्थम्। *उक्थमुक्थम्* (ऐ.आ.२-१-२) इत्यत आरभ्य उक्थस्य प्राणस्य अन्नाद्यालोककालदेवताच्छन्दोवेदगार्ह्यनेकगुणसंबन्ध उक्तः। तस्यैव प्राणस्य सर्वात्मनः पाञ्चविध्यादिगुणविशेषसंबन्धप्रदर्शनार्थं यो ह वेत्यादि ग्रन्थरूपम् आरभ्यते॥

प्राणस्योक्थस्य पञ्चविधत्वम्

यो ह वा आत्मानं पञ्चविधमुक्थं वेद यस्मादिदं सर्वमुत्तिष्ठति स संप्रतिवित् पृथिवी वायुराकाश आपो ज्योतींषीत्येष वा आत्मोक्थं पञ्चविधमेतस्माद्धीदं सर्वमुत्तिष्ठत्येतमेवाप्येत्ययनं ह वै समानानां भवति य एवं वेद॥ १॥

८६. यो ह वै कश्चित् आत्मानं स्वकार्यकरणसङ्घातरूपं पञ्चविधं पञ्चप्रकारम् उक्थं वेद। *अहमुक्थमस्मीति विद्यात्* (ऐ.आ.२-१-२) इति विधिः अनुवर्तत एव सर्वत्र। पाञ्चविध्यगुणविशेषसंबन्धमात्रम् इह *वेद* इत्युच्यते। यो वेद स किम्? संप्रतिवित् सम्यग्दर्शी इत्यर्थः। **सम्यग्दर्शनं हि सर्वत्र सर्वपुरुषार्थसाधनकारणं न विपर्ययः इत्या गोपाङ्गनादि प्रसिद्धम्।** अतः प्रलोभनार्थं स संप्रतिवित् इत्याह पञ्चविधस्य उक्थत्वप्रदर्शनार्थं विशेषणम्। यस्मात् पञ्चविधात् उक्थात् सर्वमिदं स्थावरं जङ्गमं च उत्तिष्ठति तदुक्थं यो वेद स संप्रतिवित् इति प्रलोभ्य अभिमुखीभूताय

आह। पृथिवी वायुराकाश आपो ज्योतींषीत्येष भूतानां संङ्घातः प्राणिनां प्रत्यात्मभूतत्वात् आत्मा च उक्थं च तत् इति आत्मोक्थं पञ्चविधम्। उक्थस्यैव हेतुत्वप्रदर्शनार्थं *एतस्माद्धीदं* उत्पत्तिरेवैतस्मात्, विनाशकालेऽपि एतमेव भूतसङ्घातमप्येति अपिगच्छति एतस्मिन्नेव प्रलीयत इत्यर्थः॥

एवम् उत्पत्तिस्थितिलयैः आत्मभूतः अयनं ह वै समानानां तुल्य-जातीयानां सम्बन्धिनां वा भवति॥

पञ्चविधे उक्थे अन्नान्नादरूपत्वम्

तस्मिन् योऽन्नं चान्नादं च वेदाहास्मिन्नन्नादो जायते भवत्यस्या-न्नमापश्च पृथिवी चान्नमेतन्मयानि ह्यन्नानि भवन्ति ज्येतिश्च वायुश्चान्नादमेताभ्यां हीदं सर्वमन्नमत्त्यावपनमाकाश आकाशे हीदं सर्वं समोप्यत आवपनं ह वै समानानां भवति य एवं वेद॥२॥

८७. पूर्ववत् पञ्चविधेऽप्युक्थे तस्मिन् योऽन्नं चान्नादं च वेद तस्यैतत्फलमाह। अस्मिन् उक्थे अन्नादो जायते ह दीप्ताग्निर्जायत एवेत्यर्थः। आमयावित्ववर्जित इत्येतत्। अन्यथा किं स्याद् विद्याफलम्? सर्वो लोकोऽन्नादो भवत्येव। अन्नादत्वमप्यनर्थकमेव स्याद्यदि वा अनामयाविनोऽन्नं स्यात् इत्यत आह। भवत्यस्यान्नं इच्छातः इत्याभिप्रायः। फलेन प्रलोभ्य आह पूर्ववत् इदं तदन्नम् अन्नादं चेति। आपश्च पृथिवी चान्नम् अपां पृथिव्याश्च संयोगे व्रीहियवादीनि अन्नानि भवन्ति। अतः प्रसिद्धमेतत् इति हिशब्देन हेत्वर्थतां द्योतयन्। एतन्मयानि पृथिव्यब्विकाराणि

हि अन्नानि भवन्तीत्याह | ज्योतिश्च वायुश्च अन्नादम् | वायुना हि संयुक्तं ज्योतिर्दीप्यते | दीप्तं ज्योतिरन्नम् अत्तुं समर्थं भवति इत्यत आह | एताभ्यां वायुज्योतिर्भ्याम् | हि शब्दो हेत्वर्थ एव | इदं सर्वं प्राणिजातम् अन्नमत्ति इदं वा सर्वमन्नम् एताभ्यामत्ता लोकः ||

तत्र अब्भूम्योरन्नत्वेन वायुज्योतिषोरत्तृत्त्वेन विनियोग उक्तः, नाकाशास्येत्यतः इदमुच्यते | आवपनम् उप्यते अस्मिन् आधीयते इत्यावपनम् आकाशः | प्रसिद्धमाधारत्वम् आकाशस्य इत्यत आह हिशब्देन | आकाशे हि इदं सर्वं समोप्यत इति | सर्वस्य हि अत्तुराद्यस्य च अवकाशदातृ आकाशम् | *आकाशे वै सूर्याचन्द्रमसौ* (?) इति स्मृ(श्रु?)त्यन्तरात् | आकाशस्य आवपनगुणविज्ञानफलमिदमुच्यते | आवपनम् आश्रयः ह वै समानानां भवति य एवं वेद ||)

अन्नान्नादोपासनफलम्

तस्मिन् योऽन्नं चान्नादं च वेदाहास्मिन्नन्नादो जायते भवत्यस्यान्नमोषधिवनस्पतयोऽन्नं प्राणभृतोऽन्नादमोषधिवनस्पतीन् हि प्राणभृतोऽदन्ति || ३ ||

८८. भूतविषये अन्नान्नादत्वमुक्तम् | भूतविकारे इदानीमुच्यते | प्राणिजाते *अस्मिन् योऽन्नं चान्नादं च वेद* इत्युक्तार्थः | तत्र ओषधिवनस्पतयः | सर्वं स्थावरम् अन्नम् इत्यभिप्रायः | चक्षुरादिप्राणव्यक्तिं बिभ्रतीति प्राणभृतः | सर्वे जङ्गमाः प्राणभृतः | ते हि बहिस्संज्ञत्वात्

अन्नमत्तीत्यन्नादम् । अन्तःसंज्ञत्वात् स्थावरा अन्नम् । प्रसिद्धं ह्येतत् । ओषधि-वनस्पतीन् हि प्राणभृतोऽदन्ति कृष्यादिनोत्पाद्य ॥

अन्नादेषु पुरुषस्य श्रैष्ठ्यम्

तेषां य उभयतोदन्ताः पुरुषस्यानुविधा विहितास्तेऽन्नादा अन्नमितरे पशवस्तस्मात्त इतरान् पशूनधीव चरन्त्यधीव ह्यन्नेऽन्नादो भवति । अधीव ह समानानां जायते य एवं वेद ॥ ४ ॥

८९. तेषाम् अन्नादानामपि मध्ये ये तु उभयतोदन्ताः अश्वादयः । तेषां च विशेषणं पुरुषस्य अनुविधाः पुरुषस्य अनुकारितां विहिताः । पुरुषस्य अनुवर्तित्वेन विहिता इत्यर्थः । ते अन्नादाः । अन्नम् इतरे आरण्यादयः पशवः । यस्माच्च पुरुषानुवर्तिनोऽन्नादाः तस्मात् ते इतरान् आरण्यादीन् अधीव उपरीव पूज्यमाना रक्षमाणाः चरन्ति वर्तन्ते । प्रसिद्धं चैतत् अधीव उपर्येव । इवशब्दोऽवधारणार्थः । हि यस्मात् अन्ने अन्नादो भवति । अधीव ह समानानां जायते य एवं वेद इति पूर्ववत् ॥

॥ इति प्रथमः खण्डः ॥

अथ द्वितीयः खण्डः

पुरुषे आत्मविभूतिः आविस्तरा

तस्य य आत्मानमाविस्तरां वेदाऽश्नुते हाऽऽविर्भूयः ॥ १ ॥

९०. यस्मात् स्थावरत्वादारभ्य उपर्युपरितया अत्तृत्वं प्रस्तुतं तत् पुरुषावसानमेवोक्तम्, न ऋषिदेवतादिषु । यस्तु तद्विधानादेव कर्तव्यताप्राप्तौ

अपि फलेन प्रलोभ्यमानः सुतरां प्रवर्तत इति फलेन उपर्युपरि प्रलोभयन्नाह तस्य य आत्मानं इत्यादिना। अथवा पुरुषं प्रत्येव - *अयमेव महान् प्रजापतिः* (ऐ.आ.२-१-२) *अहमुक्थमस्मीति विद्यात्* (ऐ.आ.२-१-२) इति ज्ञानकर्मकर्तव्यताविधिः। नेतरान् पशून् प्रति। तत्किन्निमित्तमिति ? उच्यते। तस्य अन्नात्मत्वसमुदायस्य आत्मानं आविः प्रकाशः। प्रकाशादपि प्रकाशतरं आविस्तरं आत्मानं यो वेद तस्येदं फलं प्रलोभयति। अश्नुते व्याप्नोति ह व्याप्नोत्येव आविः भूयः बहुतरम्। यस्य तु जगतः स्रष्टा सोऽव्याकृते नामरूपे व्याकुर्वन् पञ्चभूतानि सर्वारम्भकसमर्थानि उत्पाद्य भौतिकं च स्थावरजङ्गमम् अत्तात्तृत्वविभागार्थं (अन्नात्तृत्वाविभागार्थं) तदेव प्राविशत्। तत् प्रविश्य आविरभूत् आत्मप्रकाशनाय। तथा च मन्त्रवर्णः *रूपं रूपम्* (ऋ.सं.६-४७-१८) इत्यादिः। तत्र च स्थावराद्यारभ्य उपर्युपरि आविस्तरत्वमात्मनः। यथा यथा आविस्तरत्वम् तथा तथा अत्तृत्वमपि॥

आविस्तरत्वस्य विवरणम्

ओषधिवनस्पतयो यच्च किञ्च प्राणभृत् स आत्मानमाविस्तरां वेदौषधिवनस्पतिषु हि रसो दृश्यते चित्तं प्राणभृत्सु॥ २॥

९१. ओषधिवनस्पतयो यच्च किं च प्राणभृत् तत्रानुप्रविश्य आविर्भूत आत्मा इति यो वेद स आत्मानम् आविस्तरां वेद। ओषधिवनस्पतिषु दर्शनाद्यभावात् नाविरात्मेत्याशङ्काहेतुमाह। हि यस्मात् ओषधिवनस्पतिषु रसो दृश्यते। यत्र रसः तत्र चित्तम् अनुमीयते। यत्र चित्तं यावन्मात्रम् तत्र

तावदेव आविरात्मा। बहिः संज्ञाभावेऽपि अन्तस्संज्ञत्वेन। तस्मात् ओषधिवनस्पतिषु आत्मन आविष्ट्वे न संशयः। चित्तं प्राणभृत्सु अधिकम् आविस्तरे हेतुः। रसश्च न चित्तमितरेषु स्थावरेषु ॥

प्राणभृत्सु आविस्तरत्वम्

प्राणभृत्सु त्वेवाऽऽविस्तरामात्मा तेषु हि रसोऽपि दृश्यते न चित्तमितरेषु ॥ ३ ॥

९२. तस्मात् प्राणभृत्सु त्वेव आविस्तरामात्मा। यस्मात् तेषु हि रसोऽपि दृश्यते। यद्यपि रसचित्तयोः स्थावरेष्वभावः, तथापि बृहद्विस्तार दर्शनात् न चित्तमितरेषु इत्याह ॥

पुरुषस्य आविस्तरत्वम्

पुरुषे त्वेवाऽऽविस्तरामात्मा स हि प्रज्ञानेन संपन्नतमो विज्ञातं वदति विज्ञातं पश्यति वेद श्वस्तनं वेद लोकालोकौ मर्त्येनामृत-मीप्सत्येवं संपन्नः। अथेतरेषां पशूनामशनापिपासे एवाभिविज्ञानं न विज्ञातं वदन्ति न विज्ञातं पश्यन्ति न विदुः श्वस्तनं न लोकालोकौ त एतावन्तो भवन्ति यथाप्रज्ञं हि संभवाः ॥ ४ ॥

९३. प्राणभृत्यपि पुरुषे त्वेव आविस्तरामात्मा। तत्र हेतुरुच्यते। स हि पुरुषो यस्मात् (प्रज्ञानेन) प्रकृष्टं ज्ञानं प्रज्ञानं तेन संपन्नानामपि प्राणभृतां संपन्नतमः। अतिशयेन संपन्नः। कथमतिशायनमिति? उच्यते। यत् पूर्वं विज्ञातं तद्वदति। इदमहमज्ञासिषमिति। तथैव विज्ञातं पश्यति।

न केवलम् अतीतस्मरणमेव। भविष्यदपि श्वो मे इदं भविष्यतीति वेद श्वस्तनम्। किं च वेद लोकालोकौ। लोको दर्शनादिविषयः प्राप्तव्यः। तद्विपरीतोऽलोकः। तौ च जानाति। किं च मर्त्येन विनाशिना कर्मज्ञानसाधनेन अमृतं नित्यं प्राप्तुं ईप्सति इच्छति। एवं प्रज्ञानेन अतिशयेन संपन्नः पशुत्वेऽपि पुरुषः॥

९४. अथ इतरेषां पुरुषादन्येषां पशूनाम् अशनापिपासे एव अभि प्रति विज्ञानं भवति। न तु विज्ञातवदनादि तेषाम्। यस्मादेवम् तस्मात्ते पशव एतावन्तः एतावन्मात्राविर्भूतात्मान एव भवन्ति। न पुरुषवत् अन्नादाः। नाऽपि देहान्तरफलेप्सवः। यस्मात् यथाप्रज्ञं यथाप्रज्ञानरूपमेव संभवा-संभवनानि उत्पत्तयः प्राणिनाम्। तस्मात् एतावन्त एव ते भवन्ति इत्युक्तम्। पुरुषस्य प्रज्ञानातिशययोगात् सर्वफलार्थित्वाच्च तमेवाधिकरोति शास्त्रं कर्मज्ञानयोरिति युक्तम्। *सुकृतं बतेति* (ऐ.आ.२-४-२) *पुरुषो वाव सुकृतं* (ऐ.आ.२-४-२) इति च वक्ष्यति॥

॥ इति द्वितीयः खण्डः ॥

अथ तृतीयः खण्डः

पुरुषस्य समुद्रत्वम्

स एष पुरुषस्समुद्रस्सर्वं लोकमति यद्ध किंचाश्नुतेऽत्येनं मन्यते यद्यन्तरिक्षलोकमश्नुतेऽत्येनं मन्यते यद्यमुं लोकमश्नुवीतात्येवैनं मन्येत॥ १॥

९५. इतश्च पुरुष एव ज्ञानकर्मानुष्ठाने समर्थः। स हि सर्वान् कामान् उपायैर्व्याप्नुवन् अतिशेते। तत्कथमिति? उच्यते। स एष पुरुषः समुद्रः समुद्र इव अनन्तत्वात्। *कामः समुद्रमाविश* (तै.आ.३-१०-२) इति मन्त्रलिङ्गात् समुद्र इव अनन्तः कामः। तमत्येष पुरुषः कामी उपायैर्व्याप्नुवन् अतिशेते यस्मात् तस्मात् समुद्र इव अनन्तत्वात् पुरुषः समुद्रः। तमेतमर्थं प्रसिद्धं दर्शयन् आह। सर्वं लोकं कामयितव्यम् अतिक्रम्य वर्तते। प्रसिद्धं चैतत् यत् क्षेत्रं धनं वा यत्किञ्च अश्नुते व्याप्नोति यच्च तद्व्याप्तं स्वीकृतं धनराज्यादि ततोऽयम् अतिशेते। यस्मात् अन्यमपि प्रार्थयते तस्मात् अत्येनं स्वीकृतात् अधिकतरमेव एनं मन्यते लोकः। यदि पृथिवीराज्यं प्राप्य अन्तरिक्षं लोकम् अश्नुते व्याप्नोति केनचिदुपायेन ततोऽत्येव एनं मन्यते। इच्छाया अपरिसमाप्तत्वात्। तथा यद्यमुं लोकं तृतीयमपि वशीकरोति अश्नुवीत प्राप्नुयात् कथञ्चन। ततोऽपि इच्छाया अपरिसमाप्तत्वात् अथोऽप्यधिकतरं प्राप्तुं योग्य इत्येवैनं मन्यते लोकः एवमेव यावत् कामा अपरिसमाप्ता भूतभौतिकविषयाः। तावत् इच्छा अस्य अपरिसमाप्तैव, तेनासौ समुद्रः पुरुषः ॥

पुरुषस्य पञ्चविधत्वम्

स एष पुरुषः पञ्चविधस्तस्य यदुष्णं तज्ज्योतिर्यानि खानि स आकाशोऽथ यल्लोहितं श्लेष्मा रेतस्ता आपो यच्छरीरं सा पृथिवी यः प्राणः स वायुः ॥ २ ॥

९६. कानि पुनस्तानि भूतानि येषु कामाः सर्वे परिसमाप्ताः। यान्ययं काममान उपायैरात्मभावमापादयति तानीमानि पञ्चभूतानि पञ्च-विधोक्थशब्देन प्रस्तुतानि अन्नान्नादिविभागेन परिणतानि तैरात्मभावपरिणतैः। स एष पुरुषः पञ्चात्मकत्वेन विभज्यमानः पञ्चविधो भवति। तत्कथमिति? उच्यते। तस्य पुरुषस्य यदुष्णं तज्ज्योतिरग्निर्देहे। यानि खानि सुषिराणि तान्याकाशः। अथ यल्लोहितं श्लेष्मा रेतः ता आपः। द्रवात्मकत्वात् अब्विकाराणि तान्येतानि। यच्छरीरं काठिन्यात् सा पृथिवी। यः प्राणः स वायुः। प्राणस्य प्रसिद्धं वायुस्वाभाव्यम्। एवं पञ्चविधः पुरुषः। तन्मयाः सर्वे कामाः। तस्मात् प्रतिपुरुषम् आत्मभूता अपि नापयन्ति। उपायानभिज्ञात्वात् पुरुषस्य॥

वायोः पञ्चविधत्वम्

स एष वायुः पञ्चविधः प्राणोऽपानो व्यान उदानः समानस्ता एता देवताः प्राणापानयोरेव निविष्टाश्चक्षुः श्रोत्रं मनो वागिति प्राणस्य ह्यन्वपायमेता अपि यन्ति॥ ३॥

९७. कः पुनः स उपायः? ज्ञानं कर्म च। किमात्मकं तदुभयमिति? उच्यते। वाय्वात्मकमिति। तत्प्रदर्शयन्नाह। तत्र *पुरुष एवोक्थम्* (ऐ.आ.२-१-२) कथम्? यत् प्रपदाभ्यां प्रापद्यत ब्रह्म, यच्च तत् प्रापद्यत तस्याप्रविभज्यैवोक्थस्योभयस्य बाह्यान्तर्भेदेन शरीरप्राणात्मकतया प्रविभागः कथ्यते। तत्र शरीरप्रविभागस्य पञ्चभूतात्मकत्वेन पाञ्चविध्यमुक्तम्। इदानीं तदभ्यन्तरस्य प्राणस्य पाञ्चविध्यमुच्यते॥

९८. स एष वायुः पञ्चविधः सर्वज्ञानकर्मणामाश्रयभूतः सर्वपुरुषाणाम् आत्मत्वेन पञ्चधा निविष्टत्वात् पञ्चविधः। कथम्? प्राणः प्रणयनात्। मुखनासिकावृत्तिः हृदयस्थानः। अपानः अपनयनात् मूत्रपुरीषादेः। अपसर्पणहेतुश्च। नाभिस्थानोऽधोवृत्तिः। व्यानो व्यापनकर्मा प्राणापानयोः सन्धिर्व्यानः शरीरस्य सर्वशरीरस्थानः। उदान ऊर्ध्ववृत्तिः उत्कर्षहेतुः पादतलमस्तकस्थानः ऊर्ध्वारोहणादिकर्मा। समानः समं नयनात् अशित-पीतादीनाम् उदरस्थानेऽन्नपक्ता। एवं पञ्चविधः सर्वक्रियाहेतुः॥

९९. किं च याश्च ताः सर्वज्ञानहेतुभूताः चक्षुः श्रोत्रं मनो वागित्येताः। चक्षुरादिचतुष्टयग्रहणं सर्वकरणोपलक्षणार्थम्। स्वविषयक्रीडनात् द्योतनाच्च देवताः। प्राणापानयोरेव निविष्टाः प्राणापानवृत्तिजीवनं (नाः)। तदनुवृत्तयः इत्यर्थः। प्राणस्य हि अन्वपायम् अपगमनमनु इत्येतत्। एता देवता-श्चक्षुराद्या अपियन्ति प्राणमेवापिगच्छन्ति। तदेतद् दर्शितं प्राणसंवादे॥

यज्ञस्य पञ्चविधत्वम्

स एष वाचश्चित्तस्योत्तरोत्तरक्रिमो यद्यज्ञः स एष यज्ञः पञ्चविधोऽग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यानि पशुः सोमः स एष यज्ञानां संपन्नतमो यत्सोम एतस्मिन् ह्येताः पञ्चविधा अधिगम्यन्ते यत् प्राक्सवनेभ्यः सैका विधा त्रीणि सवनानि यदूर्ध्वं सा पञ्चमी॥ ४॥

१००. कथं पुनरस्य प्राणस्य ज्ञानकर्महेतुत्वमिति। उच्यते। स एष

यज्ञः वाचः मन्त्रोच्चारणादिव्यापृतायाः चित्तस्य चान्तःकरणस्य चोदनात् यथालोचनव्यापृतस्य उत्तरोत्तरिक्रमः उत्तर (उत्तरोत्तर) क्रमशः उत्तरोत्तर-व्यापारमात्रो यद्यज्ञः यो यज्ञः इत्यर्थः। तस्मात् प्राणतन्त्रवाक्चित्त-व्यापाररूपवान् प्राणहेतुः। तदुच्यते। स एष यज्ञः पञ्चविधः। प्राण-कार्यत्वात् पञ्चविधः। कथं पञ्चप्रकारत्वमिति? उच्यते। अग्निहोत्रम्। दर्शपूर्णमासौ, चातुर्मास्यानि, पशुः, सोमः। प्रकृतीनां पञ्चत्वात् सर्वो यज्ञः पञ्चविधः। सहस्रसंवत्सरसत्रान्त एतद्विकार एवेति अत्रैवान्तर्भवति। स एष सोमोऽग्निहोत्रादीनां यज्ञानां संपन्नानामपि संपन्नोऽतिशयेन यस्मात् यास्ताः पञ्चविधा अपि सोमेऽधिगम्यन्ते एकस्मिन्। कथम्? यत् प्राक् पूर्वं प्रातस्सवनादिभ्यो दीक्षणीयादिकर्मजातम्, सा एका विधा। त्रीणि सवनानि तिस्रो विधाः। यदूर्ध्वं सवनेभ्यः उदवसानीयान्तम् सा पञ्चमी विधा॥

॥ इति तृतीयः खण्डः॥

अथ चतुर्थः खण्डः

यज्ञे यज्ञं प्रतिष्ठितम्

यो ह वै यज्ञे यज्ञं वेदाहन्यहर्देवेषु देवमध्यूळ्हं संप्रतिविदेष वै
यज्ञो यज्ञोऽहन्यहर्देवेषु देवोऽध्यूळ्हो यदेतन्महदुक्थम्॥ १॥

१०१. स एष यज्ञः पञ्चविधः इत्यादि यत्स्तुतिपरं वाक्यम्, पृथिव्यां नैमिषम् (?) इत्यादि वाक्यवद् अन्नतीर्थस्तुतिपरं यद्वत् तमिह स्तुतिपूर्वकमेव

उपन्यस्यति । यो ह वै यज्ञे इत्यादि । यः कश्चिद्ध वै यज्ञे यज्ञम् अध्यूळ्हं अधिरूढम् यथा हस्तिपृष्ठे रूढं राजानमिति यद्वत् । तथा देवेषु देवमध्यूळ्हं यो वेद स किम् ? संप्रतिवित् इत्युक्तार्थम् । कः पुनरसौ एवं महीयमान इति ? उच्यते । एष वै यज्ञे सर्वस्मिन् सहस्रसंवत्सरसंक्रान्तकर्मणि श्रेष्ठतया हस्तिपृष्ठगतराजवत् अध्यूळ्हः । स एव च सर्वाहस्सम्पन्ने महाव्रतीये अहनि अहरध्यूळ्हम् । तथा देवेषु वागादिषु अग्न्यादिषु च श्रेष्ठतया अध्यूढो देवः । कोऽसौ । यदेतत् महदुक्थं शस्त्रम् । प्राणसंस्तुतत्वात् । *प्राण उक्थ इत्येव विद्यात्* (ऐ.आ.२-१-४) इति ह्युक्तुम् ॥

उक्थस्य पञ्चविधत्वम्

तदेतत् पञ्चविधं त्रिवृत् पञ्चदशं सप्तदशमेकविंशं पञ्चविंशमिति स्तोमतो, गायत्रं रथन्तरं बृहद् भद्रं राजेनमिति सामतो, गायत्र्युष्णिग्बृहती त्रिष्टुब्द्विपदेति छन्दस्तः, शिरो दक्षिणः पक्ष उत्तरः पक्षः पुच्छमात्मेत्याख्यानम् ॥ २ ॥

१०२. तदेतदुक्थं पञ्चविधम् । कारणानुविधायि हि कार्यम् । पञ्चविधं प्राणतन्त्रवाक्चित्तोत्तरोत्तरव्यापारनिष्पन्नयज्ञाधिरूढं तदित्युक्तम् । कथं पञ्चविधत्वमिति? आह । त्रिवृत्, पञ्चदशम्, सप्तदशम्, एकविंशम्, पञ्चविंशम् - इति स्तोमतः । कतिपयानां मन्त्राणां समुदायस्य स्तोम इत्याख्या छान्दोग्ये सामान्येन । तत्र विशेषसंज्ञा त्रिवृदाद्या । त्रिवृच्छिरः, पञ्चदशं दक्षिणः पक्षः । सप्तदशमुत्तरः पक्षः । एकविंशं पुच्छम् । पञ्चविंशम्

आत्मा। यद्यपि क्रत्वात्मनोऽग्नेः शस्त्रप्राधान्येन उक्थसंज्ञस्य पाञ्चविध्यं प्रस्तुतम्, तथापीह उक्थद्वारेण ऋग्यजुस्सामात्मकं समस्तकर्म संपिपादयिषितमिति स्तोमसामछन्दःस्तोभतोऽपि पाञ्चविध्यमुच्यते। सर्वोऽयम् अकारलक्षणाया वाचः परमो विकार इति हि वक्ष्यति। सर्वं च कर्म *वाचश्चित्तस्य उत्तरोत्तरविक्रियामात्रम्* (ऐ.आ.२-३-३)। तथा *तस्य वाक्च मनश्च वर्तन्यौ* (?) इति चोक्तम्, वाङ्मनसे नामरूपे। तदाश्रयत्वात् कर्मणस्ताभ्यामेव वर्तनम्। अतोऽपि स्तोमसामादिना पाञ्चविध्यमुक्थस्य युक्तमेव। गायत्रम्, रथन्तरम्, बृहत्, भद्रम्, राजनम् - इति सामतः पाञ्चविध्यं पूर्ववच्छिर आदिक्रमेण। गायत्री, उष्णिक्, बृहती, त्रिष्टुप्, द्विपदा इति छन्दसः पाञ्चविध्यम्। शिरआदिरेव क्रमः। तथा चाह त्रिवृत्स्तोमादीनां क्रमप्रदर्शनार्थम्। शिरो दक्षिणः पक्षः उत्तरः पक्षः पुच्छमात्मेति आख्यानम्। ब्राह्मणस्य चयनाकृत्याख्यानम्। आकृतिवचनम् इत्यर्थः ॥

राजानि साम्नि पञ्चविधत्वम्

पञ्च कृत्वः प्रस्तौति पञ्च कृत्व उद्गायति पञ्च कृत्वः प्रतिहरति पञ्च कृत्व उपद्रवति पञ्च कृत्वो निधनमुपयन्ति तत् स्तोभसहस्रं भवति ॥ ३ ॥

१०३. किं च राजनि साम्नि स्तोभसहस्रकल्पनयापि पञ्चविधैव। तत्कथम् ? पञ्च कृत्वः प्रस्तौति। पञ्च कृत्व उद्गायति। पञ्च कृत्वः

प्रतिहरति। पञ्च कृत्व उपद्रवति। उद्गातृणां त्रयाणां एकैकस्य चतुर्षु व्यापारः। सर्वे पञ्चकृत्वो निधनमुपयन्ति। बहुवचनसामर्थ्यात्। तच्चैतत् पाञ्चविध्यं यथोक्तं स्तोभसहस्रं भवति ब्राह्मणतः सूत्रतश्च अन्वेष्टव्यम्॥

बृहतीसहस्रं पञ्चविधम्

एवं ह्येताः पञ्चविधा अनुशस्यन्ते यत् प्राक् तृचाशीतिभ्यः सैका विधा तिस्रस्तृचाशीतयो यदूर्ध्वं सा पञ्चमी॥ ४॥

१०४. यथेयं कल्पना एवमेका अपि पञ्चविधा अनुशस्यन्ते होत्रापि बृहतीसहस्रे। कथम् ? यत् प्राक् तृचाशीतिभ्यः शस्यन्त ऋचः सैका विधा। गायत्री बार्हती उष्णिक् इति तिस्रस्तृचाशीतयस्तिस्रो विधाः। यदूर्ध्वं शंसनम् सा पञ्चमी विधा। एवं बृहतीसहस्रं शंसता पञ्चविधा एव अनुशस्यन्ते॥

बृहतीसहस्रविवरणम्

तदेतत् सहस्रं तत्सर्वं तानि दशदशेति वै सर्वमेतावती हि संख्या दशदशतस्तच्छतं दश शतानि तत्सहस्रं तत्सर्वं तानि त्रीणि च्छन्दांसि भवन्ति त्रेधा विहितं वा इदमन्नमशनं पानं स्वादस्तदेतै-राप्नोति॥ ५॥

१०५. यदेतत् सहस्रस्तोभतो बृहत्युक्थं च तत्किम् ? तत् सर्वं क्रियाकारकफलभूतं नामरूपकर्मात्मकं द्वैतम्। संख्यासंख्येयत्वेन हि द्विधा विभक्तं तत्सर्वं संपन्नं सहस्रम्। तस्मिन् हि सहस्रे सर्वं संख्याजातम् अन्तर्भवति। संख्याद्वारेण संख्येयं चान्तर्भवति। तस्मात् तदेतत् सहस्रं

तत्सर्वं तानीति परामर्शभाजां प्रकृतीनाम् अभावात् वक्ष्यमाणानां च त्रयाणां छन्दसाम् अशनपानखादनां च अन्नप्रकाराणां व्यवहितत्वात् तत्परामर्शा-संभवे प्रकृतसंख्यान्तर्गतदशशतसहस्राणि सर्वसंख्यापर्वरूपाणि तानीति परामृश्यन्ते। तानि दशदशेत्येव सर्वं व्याप्नुवन्तीत्यर्थः। वैशब्दः प्रसिद्धानुस्मारकः। प्रसिद्धं हि लोके दशदशेत्यावर्तमानायां संख्यायां सर्वसंख्यासंख्येयं च व्याप्यते इति। अत आह। एतावती हि संख्या इति। कथं पुनस्तानीति परामृष्यैस्त्रिभिः संख्यारूपैः सर्वं व्याप्तम् इति। एतमर्थं दर्शयन्नाह श्रुतिः। एकाधिकायाः संख्यायाः आवर्तमानायाः प्रथमं पूर्वरूपं दश। दशसंख्यायाः पुनरावर्तमानायाः दशकृत्वः दशदशतः यद् द्वितीयं पूर्वरूपं तत् शतम्। सा च शतसंख्या दशावृत्ता दशशतानि, तत् सहस्रम्। यत् प्रतिज्ञातं सहस्रं तत्सर्वमिति दशावृत्तिप्रकारैः सर्वव्याप्तिं दर्शयित्वा उपसंहरति। तत्सहस्रं तत्सर्वमिति यथाप्रतिज्ञातमेव। तानि त्रीणि छन्दांसि भवन्ति यत्तद्बृहतीसहस्रं सर्वात्मकं दशशतसहस्रप्रविभक्तं त्रीणि छन्दासि भवन्ति। गायत्र्यादीनि त्रिधा विभक्तत्वसामान्यात्। किं च त्रेधा विहितं बृहती सहस्रात्मना इन्द्रेण प्राणेन अद्यमानमन्नमिदं लोकप्रसिद्धम्। कथम्? अशनम् ओदनादि, पानं पानीयादि, खादो लड्डुकादि। तच्चैतत् सर्वमन्नं दशशतसहस्रैः गायत्र्यादितृचाशीतिप्रकारैः एतैराप्नोति। संख्यासामान्यात् सर्वस्य चान्नत्वं दशसंख्याव्याप्तविराट्संपत्तेः॥

॥ इति चतुर्थः खण्डः ॥

अथ पञ्चमः खण्डः

बृहतीसहस्रसंपादने पक्षान्तरम्

तद्वा इदं बृहतीसहस्रं संपन्नम् ।। १ ।।

१०५. तद्वा इदं बृहतीसहस्रं संपन्नमिति पूर्ववदुत्तरसंबन्धार्थम् ।।

तद्धैतदेके नानाच्छन्दसां सहस्रं प्रतिजानते किमन्यत् सदन्यद्ब्रूयामेति । त्रिष्टुप्सहस्रमेके जगतीसहस्रमेके अनुष्टुप्सहस्रमेके । तदुक्तमृषिणा - अनुष्टुभमनु चर्चूर्यमाणमिन्द्रं निचिक्युः कवयो मनीषेति वाचि वै तद्धैन्द्रं प्राणं न्यचायन्नित्येतत्तदुक्तं भवति । स ईश्वरो यशस्वी कल्याणकीर्तिर्भवितोः ।। २ ।।

१०६. तत्र बृहतीसहस्रं संपादयितव्यम् इत्येवं स्थिते बृहतीसहस्रपक्षसंस्तुत्यर्थं पक्षान्तरमुपन्यस्योपन्यस्य निन्दयति । तत्र हशब्दः पक्षान्तरद्योतनार्थः । एतत् सहस्रम् एके शाखिनो नानाच्छन्दसां ऋचां व्यामिश्रमपि संपादयितव्यमिति प्रतिजानते । तत्र सहस्रसंपादने ह्यर्थः न छन्दोनियमः इति मन्यन्ते । सहस्रसंपादने सर्वसंपद् भवतीति स्थितिः । किमन्यत् पक्षान्तरं सत् शोभनं प्रकृतादन्यत् द्वितीयोऽन्यच्छब्दः सच्छब्देन संबध्यते । इतरत् शोभनतरमन्यत् किं ब्रूयामे (वे) त्यर्थः । त्रिष्टुप्सहस्रम् एके शाखिनः प्रतिजानते केवलम् । तथा जगतीसहस्रमेके । अनुष्टुप्सहस्रमेके । एते चत्वारः पक्षाः बृहतीसहस्रस्तुत्यर्थम् उपन्यस्य अपविविदिषिताः । तत्र अनुष्टुप्सहस्रसंपादनम् ऋषिणा मन्त्रेणाप्युक्तम् । मन्त्रब्राह्मणबद्धत्वात्

अनुष्टुप्पक्षं दृढतरं मन्यमानामाहुः | बीभत्सूनां[1] संबन्धं कर्तुमिच्छन्तीनाम् अपां दिव्यानां दिवि भवानाम् | द्युलोकस्था हि आपः सर्वप्राणिबन्धनभूता द्युलोकेन अन्तरिक्षं पार्थिवं चेमं लोकं स्वेन वृष्ट्यात्मना संबन्धमिच्छन्त्यो मध्यमस्थानं मेघाश्रयम् आपद्यन्ते | तासाम् अपां बीभत्सूनां सयुजं सहयुज्यमानं मेघभेदनं कुर्वन्तम् | बीभत्सूनां सहयुजं हंसमाहुरपां दिव्यानां सख्ये चरन्तम् | इन्द्रं मध्यस्थानं वाय्वात्मानं हंसम् अध्वनो गमनात् सख्ये समानख्याने समानस्थाने तुल्याभिव्यक्ताश्रये चरन्तं वायुभेदेन आहुः ब्रह्मवादिनः | अनुष्टुभं स्तनयित्नुलक्षणं वाचम् अनुचर्चूर्यमाणं चञ्चूर्यमाण-मित्यर्थः | चारयन्तम् इन्द्रं प्राणं निचिक्युरिति दृष्टवन्तः | कवयो मेधाविनः | मनीषा विवेकज्ञानेन | अत्र अनुष्टुभमनु चर्चूर्यमाणं इन्द्रं निचिक्युः इति एतावदुदाहरणम् | अस्यार्थमाह तिरोहितो मन्त्राणामर्थ इति | अनुष्टुभमिति | *वाग्वा अनुष्टुप्* (तै.सं.५-४-५) इति श्रुतेः | वाचि वै स्तनयित्नुलक्षणायां तद्धैन्द्रं प्राणं निचिक्युः न्यचायन् इत्येतदुक्तं भवतीति | अध्यात्ममपि वाचमीरयन्तम् इन्द्रं निचिक्युः इति व्याख्येयम् ||

१०७. एवंविदः फलमुच्यते | स विद्वान् ईश्वरः समर्थः | किं निमित्तम्? यशस्वी ख्यातिमान् | कल्याणा शोभना कीर्तिर्यस्य सोऽयं कल्याणकीर्तिः | यशस्वी कल्याणकीर्तिश्च भवितोः भवितुम् | स ह ईश्वर इति संबन्धः |

---

1. बीभत्सूनां सयुजं हंसमाहुरपां दिव्यानां सख्ये चरन्तम् | अनुष्टुभमनु चर्चूर्यमाणमिन्द्रं निचिक्युः कवयो मनीषा | (ऋ.सं.१०-१२४-९) इति पूर्णो मन्त्रः |

बृहतीसहस्रमेव संपादयेत्

ईश्वरो ह तु पुराऽऽयुषः प्रैतोरिति ह स्माऽऽहाकृत्स्नो ह्येष आत्मा यद्वागभि हि प्राणे न मनसेऽस्यमानो वाचा नानुभवति। बृहतीमभि-संपादयोरेष वै कृत्स्न आत्मा यद्बृहती। सोऽयमात्मा सर्वतः शरीरैः परिवृतस्तद्यथाऽयमात्मा सर्वतः शरीरैः परिवृत एवमेव बृहती सर्वतश्छन्दोभिः परिवृता मध्यं ह्येषामङ्गानामात्मा मध्यं छन्दसां बृहती। स हेश्वरो यशस्वी कल्याणकीर्तिर्भवितोरीश्वरो ह तु पुरायुषः प्रैतोरिति ह स्माऽऽह कृत्स्नो ह्येष आत्मा यद्बृहती तस्माद्बृहती-मेवाभिसंपादयेत्॥ ३॥

१०८. किञ्च पुरा पूर्वं नियतादायुषः (प्रैतोरिति) प्रैतुं मर्तुम् ईश्वरो ह तु वश्यमृत्युश्च भवतीत्यर्थः। इत्येवम् आह स्म अनुष्टुप्संपद्वादी। तस्मादनुष्टुप्सहस्रं प्रशस्तमेव इत्येके मन्यन्ते॥

१०९. तन्न तथा। कुतः? दण्डापूपिकान्यायेन अनुष्टुप्पक्षनिराकरणेन बृहतीवर्जम् अन्ये पक्षाः निराकृता वेदितव्या इत्याह। अकृत्स्नः असंपूर्णः हि यस्मात् एष इन्द्रः प्राणः आत्मा। यत् यतो वागभि हि वाचम् अनुष्टुभम् अभि प्रतिलक्ष्यमाणो भवतीत्यर्थः। समस्तं हि इन्द्रस्य दर्शनं प्रशस्तम् नाकृत्स्नस्य। वाचि प्राणस्य अकृत्स्नत्वे हेतुमाह। प्राणेन केवल-वाक्संयुक्तमात्रेण मनसा च इस्यमानः अस्यमानः प्रेर्यमाणः वदनाय लौकिकः पुरुषो वाचा वक्तुं नानुभवति वदनक्रियां नानुभवतीत्यर्थः।

यदा पुनः स्वात्मस्थेन स्वतन्त्रेण प्राणेन प्रेर्यमाणा वाक् तया मनसा वाचा अस्यमानः वदनक्रियां अनुभवत्येव। इस्यमानः इष्यमाणो वा। न हि देवदत्तेन कृत्स्नेन यत्कार्यम् प्राणसंयुक्तयाप्यङ्गुल्या शक्यं तत् कर्तुम्। बृहतीरूपः पुनः प्राणः कृत्स्नो भवतीत्याह। बृहतीमभिसंपादयेत्। यस्मात् एष वै कृत्स्न आत्मा यत् बृहती। येयं बृहती प्राणसंस्तुता हि सा। प्राणश्च कृत्स्नः॥

११०. किं च आत्मत्वाच्च कृत्स्नत्वं बृहत्याः। कथमात्मत्वमिति? उच्यते। सोऽयमात्मा शरीरं पिण्डः सर्वतः समन्ततः शरीरैः शरीरावयवैः। हस्तादिभिः इत्यर्थः। परिवृतः परिवेष्टितोऽवयवी मध्यमं शरीरम्। प्रसिद्धो दृष्टान्तत्वेन उपादीयते। तद्यथा अयमात्मा सर्वतः शरीरैः परिवृतः एवमेव यथायं दृष्टान्तः सर्वतश्छन्दोभिः स्वावयवभूतैः गायत्र्यादिभिः मध्ये। मध्ये भवन्ती परिवृता भवति बृहती। मध्यं हि यस्मात् एषां हस्तादीनाम् अङ्गानामात्मा मध्यमं शरीरम् अवयवी प्रसिद्धः। तथा मध्यं छन्दसां गायत्र्यादीनां चतुर्थत्वात् बृहती। त्रीणि गायत्र्यादीनि पूर्वाणि, त्रीणि पङ्क्त्यादीन्युत्तराणि मध्ये भवन्ती स्वयम् इतराणि छन्दांसि व्याप्नुवन्ती आत्मसादृश्यात् आत्मेव भवति। तस्मात् युक्तं कृत्स्नत्वं बृहत्याः॥

१११. अपि च प्राणश्चात्मा लोमादीनां बाह्यानां लोमादिसंस्तुतानां च उष्णिगादीनां (ऐ.आ.२-१-६) छन्दसाम् आत्मा प्राणो बृहतीत्युक्तम्। आकाशमिव। आकाशेनेव सर्वाणि भूतानि प्राणेन बृहत्या विष्टब्धानि

(ऐ.आ.२-१-६) इति च। अत आत्मत्वात् कृत्स्ना बृहतीत्येवं यो वेद तस्यैवैतत् फलम्। स हेश्वरो यशस्वीति उक्तार्थम्। इति ह स्माह महिदास ऐतरेयः (ऐ.आ.२-१-८) विशेषादर्शनात्। कृत्स्नो ह्येष आत्मा यद् बृहती। तस्माद् बृहतीमेव अभिसंपादयेत् इत्युपसंहारवचनं निगमनस्थानीयम्। हेतूक्तेः परं निगमनमिति हि न्यायवित्समयः॥

॥ इति पञ्चमः खण्डः॥

अथ षष्ठः खण्डः

बृहतीसहस्रस्य वाचः व्यापकत्वम्

तद्वा इदं बृहतीसहस्रं संपन्नं तस्य वा एतस्य बृहतीसहस्रस्य संपन्नस्यैकादशानुष्टुभां शतानि भवन्ति पञ्चविंशतिश्चानुष्टुभ आत्तं वै भूयसा कनीयः। तदुक्तमृषिणा वाचमष्टापदीमहमित्यष्टौ हि चतुरक्षराणि भवन्ति। नवस्रक्तिमिति बृहती संपद्यमाना नवस्रक्तिः। ऋतस्पृशमिति सत्यं वै वागृचा स्पृष्टा। इन्द्रात् परितन्वं मम इति तद्यदैवैतद् बृहतीसहस्रमनुष्टुप्संपन्नं भवति तस्मात्तदैन्द्रात् प्राणाद्बृहत्यै वाचमनुष्टुभं तन्वं संनिर्मिमीते॥ १॥

११२. किञ्च बृहतीसंपादने अयं चापरो लाभः। अनुष्टुबपि वाक् संपादिता भवति। कथम् ? तद्वा इदम् इत्यादि पूर्ववत् उत्तरसंबन्धार्थम्। कथमनुष्टुप् संपन्ना भवतीति ? उच्यते। तं बृहतीसहस्रमस्य संपन्नस्य अनुष्टुप्त्वमापद्यमानस्य एकदश शतानि अनुष्टुभां भवन्ति। पञ्चविंशश्च

अनुष्टुभः अप्यधिका भवन्ति । यत् सहस्रादूर्ध्वं पञ्चविंशोत्तरशतम् अनुष्टुभां तत् बृहतीसहस्रे संपाद्यमाने बृहतीसहस्र एव अन्तर्भवति । तदेतदुच्यते । आत्तं परिगृहीतं भूयसा महता कनीयः । अल्पतरं भवतीति वै प्रसिद्धम् । सहस्रे शतम् । शते दशादिनवत्यन्तम् । दशसु एकादिनवान्तम् आत्तं भवतीति ॥

११३. तदेतद्वाचः संपादनं बृहतीसहस्र उक्तम् ऋषिणा मन्त्रेणापि । वाचम्[1] अनुष्टुभम् अष्टापदीम् । सा हि अनुष्टुप् चतुरक्षरत्वेन विभज्यमाना अष्टापदी भवति । तमष्टापदीम् अहं मम इति व्यवहितेन भवति । पुनश्चतुरक्षरप्रक्षेपेण सा वाग् बृहती संपद्यमाना नवस्रक्तिर्भवति । स्रक्तयः कोणाः । नव चतुरक्षराणि स्रक्तय इव वाचोऽनुष्टुभो भवन्ति । तेन वाचम् अष्टापदीम् अहं नवस्रक्तिम् । ऋतस्पृशं यदा बृहती संपद्यमाना तदर्चा बृहती स्पृष्टा वाक्यत्वं (वाक्सत्यं?) संपद्यते । यथा रसेन स्पृष्टं लोहम् सुवर्णत्वमापद्यते । ऋतं सत्यं मूर्तामूर्ताख्यं प्राणः । तं तदा स्पृशति । तां वाचमष्टापदीं नवस्रक्तिम् ऋतस्पृशम् । किम्? इन्द्रात् प्राणात् बृहत्यात्मनः इव उपादाय तस्यैव इन्द्र (स्य?) तन्वं तनुं शरीरम् अहं परिममे अहं परिनिर्ममे निर्मितवान् परिकल्पितवानस्म्यहम् इत्यर्थः ॥

११४. *वाचमष्टापदीमहमित्यष्टौ हि चतुरक्षराणि भवन्ति* इति ।

---

1. वाचमष्टापदीमहं नवस्रक्तिमृतस्पृशम् । इन्द्रात् परितन्वं ममे ॥(ऋ.सं.८-७६-१२)

व्याख्यातमेतत् *नवस्रक्तिमिति बृहती संपद्यमाना* इति व्याख्यातमेव। ननु *ऋतस्पृशम्* इत्येतस्मिन् पदे व्याख्येये किमर्थं व्याख्यातस्य पुनर्नवस्रक्तेर्ग्रहणम्? एवं हि अर्थं संबद्धतरं मन्यते ब्राह्मणम्। कथम्? नवस्रक्तित्वं बृहतीत्वं संपद्यमानैव वाक् ऋतं प्राणं स्प्रष्टुं शक्नोति न केवला। यथा रसस्पृष्टं लोहं सुवर्णं प्राप्तुं शक्नोति न केवलमिति। अत आह। *नवस्रक्त्यृतस्पृशम्* इति। अथवा नवस्रक्तिम् इत्यस्य पदस्य व्याख्यानं बृहतीत्वं संपद्यमाना नवस्रक्तिर्भवतीति। यथा *ऋतस्पृशमिति सत्यं वै वागृचा स्पृष्टेति। तथा च व्याख्यातम्॥*

११५. इन्द्रात् परितन्वं मम इति तद्यदैवैतद् बृहतीसहस्रम्। आत्तं वै भूयसा कनीयः इत्यनेन न्यायेन अनुष्टुप्संपन्नं भवतीत्युक्तम्। तत्र यद् बृहतीसहस्रेऽन्तर्भूतं प्राण इन्द्रे पञ्चविंशोत्तरं शतम् अनुष्टुभम्। तस्मादेव ऐन्द्रात् प्राणात् बृहत्या अपादाय वाचम् अष्टापदीं नवस्रक्तिम् ऋतस्पृशम् अनुष्टुभं तस्यैवेन्द्रस्य तन्वं शरीरं सन्निर्मिमीते विद्वान् निर्मितवान्। कोऽसौ? योऽहंकारेण *अहंनिर्ममे* इत्यब्रवीत्। तथा (च?) व्याख्यातम्॥

महदुक्थं पञ्चविधम्

स वा एष वाचः परमो विकारो यदेतन्महदुक्थं तदेतत् पञ्चविधं मितममितं स्वरः सत्यानृते इति। ऋग्गाथा कुम्भ्या तन्मितं यजुर्निगदो वृथावाक्तदमितं सामाथो यः कश्च गोष्णः स स्वर ओमिति सत्यं नेत्यनृतम्॥ २॥

११६. इन्द्रस्य प्राणस्य शरीरत्वेन कल्पिता अनुष्टुब्वाच्या वाक् | तस्या वाचः एष परमो विकारः प्रकृष्टः सारभूतः इत्यर्थः | कः ? यदेतत् महदुक्थम् | तथा च व्याख्यातम् *स एष वाचश्चित्तस्योत्तरोत्तरक्रमो यद्यज्ञः* (ऐ.आ.२-३-३) | यज्ञस्य वाग्विकारत्वम् | ततोऽप्यस्य परमत्वम् | *एष वै यज्ञे यज्ञोऽहन्यहर्देवेषु देवोऽध्यूळ्हो यदेतन्महदुक्थम्* (ऐ.आ.२-३-४) इति च | तदेतत् पञ्चविधं यदेतन्महदुक्थम् | यः सारिष्ठो वाग्विकारः तस्योक्थस्य पञ्चविधत्वम् त्रिवृत् पञ्चदशम् इत्यादिना व्याख्यातं *यदूर्ध्वं सा पञ्चमी* (ऐ.आ.२-३-४) इत्येवमन्तेन विशेषतः | सामान्यतश्च सर्वं वाग्व्याप्तिरूपेण वक्ष्यमाणेन पञ्चविधमेव | कथम्? मितममितं स्वरः सत्यानृते इति ||

११७. मितादीनां स्वरूपं स्वयमेवाह श्रुतिः | ऋक् पादबद्धा *अग्निमीळे* (ऋ.सं.१-१-१) इत्याद्या | गाथा *प्रातः प्रातरि*त्याद्या (?) | कुम्ब्या *य आचार्यं पर्युपासीनो बुद्धिमादत्ते / धीरो धर्मनित्यः* (?) इत्याद्या | तन्मितम् | पादाक्षरशः परिमितत्वात् | एषैका विधा | यजुः | अनियताक्षरावसानम् | *इषे त्वा* (तै.सं.१-१-१) इत्यादि | निगदः *ता अध्वर्यो इन्द्राय सोमम्* (?) इत्यादिः | सर्वं वा ब्राह्मणम् | वृथावाक् असंबद्धप्रलापितम् | तदनियतपादाक्षरावसानत्वात् न मीयत इत्यमितम् | साम पाञ्चभक्तिकं वा | अथो अपि यः कश्च गेष्णः सामसन्धिः पर्वाख्यः | स स्वरः | सर्वस्य हि षड्जादेः अत्रैवान्तर्भावः | ओमिति सत्यम् |

ओमित्योङ्कारः सत्यम् | सर्वात्मकत्वात् सर्ववाग्व्याप्तेः | न इति प्रतिषेधरूपं नञ् प्रयुज्यते | पञ्चसु विधासु वर्णलक्षणाया ध्वनिलक्षणायाश्च वाचोऽन्तर्भावः | तथा हि सर्वा वाचो वदन्ति इति विज्ञायते महाव्रते | एवं पञ्चविधं महदुक्थम् ||

११८. एषा विकारलक्षणा सर्वा हि वाग्विधा विभज्यते अर्थवशात् | द्विरूपं हि अर्थजातं सच्चासच्च | सत् सत्यं प्राणादिकारणम् | असत् अनृतं विकारजातम् तत्तदात्मत्वव्यभिचारात् ||

सत्यकथनस्य अनृतकथनस्य च फलम्

तदेतत् पुष्पं फलं वाचो यत् सत्यं स हेश्वरो यशस्वी कल्याणकीर्तिर्भवितोः पुष्पं हि पलं वाचः सत्यं वदति | अथैतन्मूलं वाचो यदनृतं तद्यथा वृक्ष आविर्मूलः शुष्यति स उद्वर्तत एवमेवानृतं वदन्नाविर्मूलमात्मानं करोति स शुष्यति स उद्वर्तते तस्मादनृतं न वदेद्दयेत त्वेनेन || ३ ||

११९. तदेतदोमिति यदुक्तं वाचो विकाररूपम् तत्पुष्पं फलं यज्ञदैवते | कर्म च तत्फलं च देवतारूपं पुष्पफले वाङ्मयस्य वृक्षस्य परिकल्प्येते | वाङ्मयो हि वृक्षो मन्त्रचोदनादिलक्षणो यज्ञकर्मत्वमापद्यते यदा तदा पुष्पवानिव भवति | यदा तद्यज्ञकर्म देवतारूपं फलं प्रयच्छति तदा वाङ्मयो वृक्षः फलिष्यतीव | तच्चैतदुभयं सत् प्राणात्मकत्वात् सत्यं तद् विपर्ययेण देवताध्यात्मे (ध्याने) वा पुष्पफले | सोऽयमोङ्कारः सत्यम्?

यज्ञं कर्म ज्ञानं समुच्चितं पुष्परूपम्, यच्च तस्य फलं देवताप्ययलक्षणमिति यो वेद विदित्वा च सत्यमोमिति। वदति ध्यायति कर्म च करोति स उभयं पुष्पं फलं च वदति स वाग्वृक्षस्य। किं च स हेश्वरो यशस्वी कल्याणकीर्तिर्भवितोः इत्युक्तार्थम्॥

१२०. अथ अन्यत् वाचो वाग्वृक्षस्य यदनृतं नेत्युक्तम् तन्मूलम्। ततः किमिति? आह। तत् तत्र यथा लोके वृक्षः तरुः आविर्मूलः प्रकाशमूल इत्येतत्। तदुद्धृतो यदा भवति वृक्षः तदा प्रकटीकृतमूलः सन् शुष्यति शोषम् उपैति। न केवलं शुष्यति उद्वर्तते च विनश्यति च। एवमेव वाग्विकाररूपं वृक्षमात्मानम् आविर्मूलम् करोति। अनृतं वदन् नञ्रूपं नास्ति नास्तीति वदन् प्रयुञ्जानः अनृतरूपस्य संसारवृक्षस्य मूलम् अविद्यालक्षणं तेन नेत्यनृतं वदता प्रकटं कृतं भवति। परमार्थतः सत्य प्राणादिलक्षणं सर्वं, तद्विपर्ययात्। स च तेन अनृतवदनदोषेण न शुष्यति नञा। उद्वर्तते च। यस्मादेष दोषोऽनृतं वदतः तस्मादनृतं न वदेत्। अनृतं हि वदन् सत्यं प्राणात्मानम् अपह्नुवीत। अतो दयेत रक्षेत अनृतवदनदोषत आत्मानम्। तुशब्दोऽवधारणार्थः। रक्षेतैवेत्यर्थः। कथम्? अनेन अनृत-वदनेन एतेन सत्यवदनेन चेत्यर्थः॥

ब्रह्मणो ओंकारवाचकत्वम्

पराग् वा एतद्रिक्तमक्षरं यदेतदो३मिति तद्यत्किञ्चोमित्याहात्रैवास्मै तद्रिच्यते स यत्सर्वमोङ्कुर्याद्रिञ्च्यादात्मानं स कामेभ्यो नालं स्यात्। अथैतत्

पूर्णमध्यात्मं यन्नेति स यत् सर्वं नेति ब्रूयात् पापिकाऽस्य कीर्तिर्जायेत सैनं तत्रैव हन्यात्। तस्मात् काल एव दद्यात् काले न दद्यात् तत्सत्यानृते मिथुनीकरोति तयोर्मिथुनात् प्रजायते भूयान् भवति ।।४।।

१२१. परात्परं ब्रह्म अञ्चति गच्छतीति पराक् वै एतद् रिक्तं शुद्धमक्षरम्। किं तत् ? यदेतदोमिति। सर्ववाग्व्याप्तेः। सर्वं च परं ब्रह्म। सर्वात्मिकया वाचा ओमित्यनया अभिधीयते। तस्मात् परागेव तद्रिक्तमक्षरम् ओङ्कारः। यस्मादेव तत् तस्मात् यत्किंच वस्तु गृहक्षेत्रादि लक्षणं कामकर्तात्मनोऽविद्याकल्पितस्य पूरणाय तच्चेदोमिति अनुजानाति यथाभूतं ब्राह्मणो रूपं प्रतिपद्यते। सर्वमहत्वाच्च सर्वानुज्ञं परं ब्रह्म। तथैव ओमिति सत्यमेवानुजानतः अत्रैव अस्मिन्नेव काले अस्मै ओमित्यनुज्ञां कृतवते तद्गृहक्षेत्रादिलक्षणं कामात्मगर्तपूरणं सद् रिच्यते। दृत्यादेः पूरणमिव उदकादि स्वात्मपूर्णाभावात् पृथग्भवति यावदनुजानाति वस्तु ओमिति यः स तावता रिच्यते। तत्र एवं सति स यः कश्चित् यत् यदा आपूरणार्थं वस्तु सर्वम् ओङ्कुर्यात् ओम् इत्यनुजानीयात् सर्वत्वेन आत्मनः पूरणेन। रिञ्च्यात् रिक्तताम् आपादयेत् आत्मानम्। निःस्वं कुर्यात् इत्यर्थः। तस्मात् स्वात्मकामपूरणसर्ववस्तुविवेकात् स पुरुष ओमिति प्रतिपत्ता कामेभ्यो नालं न पर्याप्तः स्यात्। प्रसिद्धं हि लोके अपहृतसर्वस्वं स्वेन रिक्तो बुभुक्षितो भोजनकामेभ्यो नालमिति यस्मात् सर्वस्वेन रिच्यात् आत्मानम्।।

अदातुः अनृतवादिनो फलम्

१२२. अथैतत् पूर्णमध्यात्मं कामगर्तात्माभिमुख्येन अविद्याकल्पिता-सदात्मकम् अनृतम् । किं तत्? यन्नेत्यनृतं नञ्रूपम् । तद्धि कामगर्तात्मनो वस्तु पूर्णपरिपानरूपम् । तत्रैवं सति, बाह्यवस्तुना पूर्णः सन् यः कश्चित् यद्यत् प्रार्थितं केनचित् कालेऽपि प्राप्ते नेति आत्मनः पूर्णत्वं परिपालयन् तत्सर्वं नेति ब्रूयात् अनृतम्, आत्मरेचकभयात् । पापिका अस्य नेत्यनृतं ब्रुवतः कीर्तिः जायेत । लुब्धः खलु असौ प्राप्तेऽपि काले न ददाति, आत्मंभरिः पापात्मा इत्याद्या । सा पुनः पापिका कीर्तिः एनं नेत्यनृतवादिनं तत्रैव तस्मिन्नेव क्षणे यस्मिन् क्षणे उच्छ्रिता भवति हन्यात् विनाशयेत् *अविर्मूलम् आत्मानं करोति स शुष्यति स उद्वर्तते* इत्युक्तम् ॥

१२३. यस्मात् न केवलेन सत्येन नापि केवलेनानृतेन संसारस्थितिः किं तर्हि, व्यामिश्रायां सत्यानृताभ्यां, यथा वृक्षो मूलतूलाभ्यां युक्तः शश्वद् वर्धते तद्वत् संसारस्थितिम् अनुवर्तयन् काल एव दद्यात् । प्राप्ते काले प्राप्तेऽपि न दद्यात् सर्वमेव । सर्वरेचके हि उक्तो दोषः । स कामेभ्यो नालम् इति । अदाने च *पापिकाऽस्य कीर्तिर्जायेतेत्यादि / तत्र गुणान् समीक्ष्य यथाशक्ति देयम्* (?) इत्यादिस्मृतेः । तत्र एवं सति ओम् न इति सत्यानृते मिथुनीकरोति इतरेतरसंयुक्तत्वमापादयति । तयोः सत्यानृतयोः स्वात्मभूतयोः मिथुनात् मूलतूलपरिरक्षणादिव वृक्षस्य प्रजायते स्वयं संसारात्मा प्रजायत इत्यस्यार्थः । भूयान् भवति वर्धते पुत्रपौत्रादिभिरित्यर्थः ॥

वाचः महिमा

यो वै तां वाचं वेद यस्या एष विकारः स संप्रतिविदकारो वै सर्वा वाक् सैषा स्पर्शोष्मभिर्व्यज्यमाना बह्वी नानारूपा भवति ।। ५ ।।

१२४. वाग्विकारसत्यानृतगतो दोषविशेषः प्रसङ्गागत उक्तः । अधुना प्रकृतमेव आलम्ब्याह यदुक्तं *स वा एष परमो विकार* इति । यस्या वाचः परमो विकार उक्तः, यदेतन्महदुक्थम् यो वै कश्चित् तां वाचं वेद यस्य वा एष विकार उक्तः स संप्रतिवित् संसारस्य मूलपरिज्ञाता । विकारो हि कर्म । कर्ममूलश्च संसारः । तस्मात् स्यात् संप्रतिविदेवम् । का सा वागिति ? उच्यते । अकार इति सर्वेषां स्वराणां सामान्यम् आकाशकल्पम् यमाहुः स्फोट इति केचित् । बुद्धिस्थः सोऽकारः सर्वा वाक् । या काचित् श्रोत्रविषयायत्ता (?) । सा पुनरेकरूपा आकाशकल्पा सती कथं बह्वी अनेकरूपा भवतीति ? उच्यते । सैषा एका स्पर्शोष्मभिः । स्पर्शाश्च ऊष्माणश्च स्पर्शोष्माणः । ते च स्थानकरणधर्माः सन्तः तस्या वाचो व्यञ्जका भवन्ति । अतः तैः स्पर्शोष्मभिः व्यज्यमाना बह्वी अनेका नानारूपा भिन्नरूपा च विलक्षणोपाधिराकाशवदेव भवति । महच्छिद्रं तनुच्छिद्रम् इति यद्वत्, एवं हि – शब्दब्रह्मणि निष्णातः परं ब्रह्माधिगच्छति । एतद्विलक्षणं हि अशब्दं परं ब्रह्मेति ।।

वाचः प्राणरूपत्वम्

तस्यै यदुपांशु स प्राणोऽथ यदुच्चैस्तच्छरीरं तस्मात्तत्तिर इव तिर

इव ह्यशरीरमशरीरो हि प्राणोऽथ यदुच्चैस्तच्छरीरं तस्मात्तदाविराविर्हि शरीरम् || ६ ||

१२५. तस्यै तस्याः वाचः यदुपांशु स्थानकरणवशात् स प्राणः प्राणस्य रूपम् | अथ यदुच्चैः वाचो रूपं तच्छरीरम् | यस्मात् उपांशुरूपं वाचो यत्तत् तिर इव तिरोभूतमिव | अन्यदपि लोके तिर इव हि अशरीरं वाय्वभ्रादि | अशरीरो हि प्राणः | तस्य *योऽयमशरीरः प्रज्ञात्मा* (ऐ.आ.३-२-३) इति वचनात् | तस्मात् उपांशुप्राणयोः सामान्यात् तस्यै यदुपांशु स प्राणोऽथ यदुच्चैस्तच्छरीरमिति युक्तं वक्तुम् | तस्मात् शरीरत्वाद् हेतोः तदुच्चैर्घोषं हि एवम् आविः प्रकाशभूतं वाचो रूपम् | आविर्हि शरीरं प्रकाशमेव हि लोके शरीरं प्रसिद्धम् ||

|| इति षष्ठः खण्डः ||

अथ सप्तमः खण्डः

तद्वा इदं बृहतीसहस्रं सम्पन्नं तद्यशः स इन्द्रः स भूतानामधिपतिः स य एवमेतमिन्द्रं भूतानामधिपतिं वेद विस्रसा हैवास्माल्लोकात् प्रैतीति हस्माऽह महिदास एतरेयः प्रेत्येन्द्रो भूत्वैषु लोकेषु राजति || १ ||

१२६. *उक्थमुक्थम्* (ऐ.आ.२-१-२) इत्यारभ्य प्राणस्य उक्थत्वम्, वागाद्यात्मकत्वम्, नामरूपात्मकत्वं च इत्याद्यनेकगुणत्वम्, तस्यैव प्राणस्य वाचश्चित्तस्य च उत्तरोत्तरविकारमात्रं सर्वं श्रौतं कर्म तत्फलं च पुण्यफलसंस्तुते इत्युक्त्वा तस्यामेव च वाचि प्राणे च अशरीरे प्रज्ञात्मनि

कारणे पुनरुप (सं)हृतं बृहतीसहस्रसंपादनपूर्वकं *यो वै तां वाचं वेद* इत्यादिना। एवं विद्वान् बृहतीसहस्रसंपद्रूपं ज्ञानकर्ममयं रथम् आरूह्य प्राणं प्रज्ञात्मानं यथातिक्रान्तश्रुतिप्रकाशितं *तद्योऽहं सोऽसौ योऽसौ सोऽहम्* इत्यात्मत्वेनोपेत्य स्वमेव रूपं सर्वदेवताप्ययलक्षणं प्रतिपद्यत इत्युक्तम्॥

१२७. तस्यैव पुनरुपसंहरार्थम् इदमुच्यते। *तद्वा इदं बृहतीसहस्रम् एवं संपन्नम्* इति। यत्तत् फलरूपं संपन्नं परिनिष्पन्नम् तत्कथमिति। उच्यते। यमात्मानमापन्नो विद्यात् (विद्वान्) तद्यशः। यश इति आत्मनो नाम स (यश?) इति। आत्मेत्यर्थः। *यस्य नाम महद्यशः* (ऋ.सं., तै.म.ना.अनु-१) इति मन्त्रवर्णात्। किं च स इन्द्रः परमेश्वरः। अत एव स(र्व)भूतानां स्थावरजङ्गमानाम् अधिष्ठाय पालयिता अधिपतिः। एवमेव अधुनातनोऽपि यः कश्चित् एनं यथोक्तम् इन्द्रम् एतम् (भूतानाम्) अधिपतिं वेद *अहमस्मि सर्वभूतात्मा सर्वभूतानां वाक्पतिश्चक्षुष्पतिः श्रोत्रपतिर्विज्ञानपतिः। आकाशकल्पे मयि सर्वं जगत् नामरूपकर्मात्मिकम् आहितम्* इति स विद्वान् विस्रसा विस्रम्भेणैव अनाशङ्क्यैव इत्यर्थः। अस्माल्लोकात् शरीरात् प्रैति म्रियते इत्याह स्म महिदास ऐतरेयः। एवं विदुषः सर्वात्मभावं फलं प्रति संशयो न भवति इत्यभिप्रायः। तथा प्रेत्य इन्द्रो हिरण्यगर्भो भूत्वा एषु लोकेषु सर्वकर्मफलभूतेषु आत्मभावेनैव राजति दीप्यते॥

इन्द्रस्य प्राणस्य लोके मिथुनरूपत्वम्

तदाहुर्यदनेन रूपेणामुं लोकमभिसंभवतीँ३ अथ केन रूपेणेमं

लोकमाभवती ँ३ । तद्यदेतत् स्त्रियां लोहितं भवत्यग्नेस्तद्रूपं तस्मात्तस्मान्न बीभत्सेताथ यदेतत् पुरुषे रेतो भवत्यादित्यस्य तद्रूपं तस्मात्तस्मान्न बीभत्सेत सोऽयमात्मेममात्मानममुष्मा आत्मने संप्रयच्छत्यसावात्माऽमुमात्मानमिमस्मा आत्मने संप्रयच्छति तावन्योन्यमभिसंभवतोऽनेनाह रूपेणामुं लोकमभिसंभवत्यमुनो रूपेणेमं लोकमा भवति ॥ २ ॥

१२८. तदाहुर्ब्रह्मवादिनः यद्ययं पुरुषः सर्व एवेन्द्रः परमार्थतः अनेन स्वरूपेण प्रज्ञात्मना अमुं लोकम् अधिदैवतलक्षणम् अभिसंभवति यत्स्वरूपविज्ञाननिमित्तम् । तस्माद् भवितव्यं येन केनचिन्निमित्तेन इमं लोकम् अत्यन्तनिकृष्टम् अनेकसहस्रानर्थसंपातं आ एत्य आगत्य आत्मत्वेन भवति प्रतिपद्यते । तत्केन खलु ? इति विचारयन्तः पृच्छन्ति अथ केन रूपेण? इति । तत्र श्रुतिराह आचार्यभूता प्रतिवचनम् अविद्याकामकर्मबीजम् इति तदिति । तदाह । तत् तत्र यल्लोहितं स्त्रियाम् आर्तवम् ऋतुकाले अविद्याकामखजमथनोद्भूतं भवति अग्नेस्तद्रूपम् । रोहितो ह्यग्निः प्रसिद्धः । तस्मात् आग्नेयत्वाल्लोहितस्य तस्माल्लोहितात् अमेध्यबुध्या न बीभत्सेत घृणां न कुर्यात् ऋतौ भार्यां च गच्छन् । अथ पुनः यदेतत् पुरुषे रेतो भवति आदित्यस्य तद्रूपम् । शुक्लत्वसामान्यात् । यदादित्यरूपं तत्, तस्माद् हेतोः शुक्लात् अमेध्यमिति न बीभत्सेत । स्वभावतो नैव बीभत्सा । तथापि शुचेः कायदोषदर्शिनः पक्षे प्राप्ता निवार्यते न बीभत्सेत इति ।

सोऽयं पृथिव्यग्न्यात्मा इमं आत्मानं मातृजं पार्थिवम् आग्नेयं च त्वङ्मांस-रुधिरात्मकम् अमुष्मै पित्रात्मभूताय हि आदित्यात्मने संप्रयच्छति। यदा भार्या भर्तारं ऋतुकाले संगच्छति तदा असावपि आदित्यात्मा स्वम् आत्मरूपं स्नावास्थिमज्जात्मकम् अमुम् आत्मानं पितृजं शुक्लरूपेण इमस्मै पृथिव्यात्मने संप्रयच्छति। तौ द्यावापृथिव्यात्मनौ अधिष्ठातृभ्याम् अग्न्यादित्याभ्यां सहभूतौ अन्योऽन्यम् इतरेतरम् अभिसंभवतः मिथुनी-भवतः ॥

१२९. यत्तत् पृष्टं केन रूपेण इमं लोकम् आभवतीति, तद्व्याख्याय उपसंजिहीर्षन् आह। अनेनैव पृथिव्यग्निरूपेण मातृजेन पितृजं रूपं हि आदित्यात्मानम् अमुं लोकम् अभिसंभवति। अभिसंयुज्यते। अमुना हि आदित्यात्मना उक्तरूपेण पितृजेन त्रयेण इमं लोकं पार्थिवम् आग्नेयं पिण्डम् आभवति शुक्लादिक्रमेण आगत्य भवति। कोऽसौ ? इन्द्रः सर्वभूतात्मा। अविद्याकामकर्मखजनिर्मथनोद्भूतशुक्लशोणितमयं शरीरम् उपचयापचयधर्मकम् अशना(या)पिपासा शोकमोहजरामृत्व्याद्यनेको-पद्रवालयं षाट्कौशिकं प्रतिपद्यत इत्यर्थः। स यदा शास्त्राचार्योपदिष्टम् ऐन्द्रम् अशरीरं प्रज्ञा (ना)त्मानं वेत्ति तदा अनेनैव स्वेन रूपेण प्रेत्य इन्द्रो भूत्वा स्वेषु लोकेषु राजति इत्युक्तम् ॥

॥ इति सप्तमः खण्डः ॥

अथ अष्टमः खण्डः

प्राणस्य पञ्चविधस्य व्यापकत्वम्

तत्रैते श्लोकाः ।

यदक्षरं पञ्चविधं समेति युजोयुक्ता अभि यत् संवहन्ति । सत्यस्य सत्यमनु यत्र युज्यते तत्र देवाः सर्व एकं भवन्ति ॥ १ ॥

१३०. तत्र एतस्मिन् अर्थे एते वक्ष्यमाणाः श्लोकाः पादसंहननाद् मन्त्रा भवन्ति । यदक्षरं न क्षरतीति प्राणाख्यं ब्रह्म पञ्चविधं पृथिव्यादि-पञ्चकात्मकं भौतिकं शरीरं समेति पूर्वोक्तन्यायेन संगच्छते तत् पञ्चविधं विशिनष्टि युजः युज्यन्त इति इन्द्रियाणि युक्ताः रथे इव अश्वाः शरीरे यत् (अभि) संवहन्ति । दिग्देशान्तरेभ्यो यत् शरीरं सत्यस्य मूर्तामूर्तात्मनः प्राणस्य सत्यं परमात्मा क्षेत्रज्ञभूतः अनु प्राणप्रवेशमनु यत्र युज्यते संयुज्यते । प्राणप्रवेशात् आत्मापि इतरः प्रविष्टः इव सन् प्राणवत् अन्यत् पश्यन् शृण्वन् मन्वानो विजानन् विज्ञानक्रियाव्यापाररूढो यस्मिन् शरीरे लक्षितः इत्यर्थः । तत्रास्मिन्नेव शरीरे प्राणेन देवा वागाद्यभिमानिनोऽग्न्यादयः । सर्वे सह एकं भवन्ति अभिन्नरूपतां प्राप्नुवन्ति । स्वापमरणध्यानकालेषु । पुनस्तत एव अग्नेर्विस्फुलिङ्गा इव प्रविभज्यन्ते प्रबोधकाले च ॥

यदक्षरादक्षरमेति युक्तं युजो युक्ता अभि यत्संवहन्ति । सत्यस्य सत्यमनु यत्र युज्यते तत्र देवाः सर्व एकं भवन्ति ॥ २ ॥

१३१. यदक्षरं प्राणाख्यम् अक्षरात् स्वस्मात् आत्मन एति आगच्छति इन्द्रियैर्युक्तं शरीरम् । व्याख्यातमन्यत् ॥

प्राणस्य ऐश्वर्यम्

यद्वाचा ओमिति यच्च नेति यच्चास्याः क्रूरं यदु चोल्बणिष्णु ।
तद्वियूय कवयो अन्वविन्दन्नामायत्ता समतृप्यञ्छृतेऽधि ॥ ३ ॥

१३२. यद्वाचा ओमिति पुष्पफलरूपवाङ्मयस्य वृक्षस्य यच्च नेति मूलरूपम् यच्चास्या अकारात्मिकायाः वाचः यच्च क्रूरं छिन्धीभिन्धीलक्षणं[1] यदु च उल्बणिष्णु अत्युल्बणम् आक्रोशादि तत्सर्वम् वियूय परित्यज्य अनित्यं स्थानकरणादिधर्मजनितम् अपोह्य कवयो मेधाविनः अन्वविन्दन् अनुलब्धवन्तः । प्राणम् इति वाक्यशेषः । कथम्? तामेव सविशेषां वाचम् आलम्ब्य शनैस्तद्विशेषापोहक्रमेण केवलायाम् अकारलक्षणायाम् आकाशकल्पायां वाचि नाम्नि आयत्ताः नामायत्ताः नामात्मभावं गताः इत्येतत् । एवं नामायत्ता अनुलब्धारः स्वम् ऐन्द्रं प्रज्ञात्मानम् आकाशशरीरं समतृप्यन् तृप्तवन्तः समन्ततः शृते पक्वे विज्ञाने अधि ऐश्वर्यभावेन ॥

प्राणे सर्वमाश्रितम्

यस्मिन्नामा समतृप्यञ्छृतेऽधि तत्र देवाः सर्वयुजो भवन्ति । तेन
पाप्मानमपहत्य ब्रह्मणा स्वर्गं लोकमप्येति विद्वान् ॥ ४ ॥

१३२. यस्मिन्नामा नामायत्ताः समतप्यञ्छृतेऽधि तत्र तस्मिन् इन्द्रे प्रज्ञात्मनि देवा वागादयोऽग्न्यादयश्च सर्वयुजो युक्ता भवन्ति । तदात्मनैव च पृथगर्थान्तरत्वेन न सन्ति इत्यर्थः । *एतमग्नावध्वर्यवः* (ऐ.ब्रा. ३-२-

---

1. खट् फट् जहि । छिन्धी भिन्धी, हन्दी फट् । इति वाचः क्रूराणि । (तै.आ. ४-२७)

३) इत्यादिश्रुतेः | यथा अतिक्रान्ताः कवयो येन ब्रह्मणोक्तमार्गेण स्वं प्रज्ञात्मानम् अनुलब्ध्वा समतृप्यन् तथा अधुनातनोऽपि विद्वान् तेनैव मार्गेण नामायत्तः सन् पाप्मानम् अविद्यासङ्कृतम् अनर्थरूपम् अपहत्य विधूय ब्राह्मणा आत्मभूतेन स्वर्गं लोकम् अप्येति ऐन्द्रं हैरण्यगर्भम् आत्मानं प्रतिपद्यते इत्यर्थः ||

प्राणोपासकस्य विभूतिः

नैनं वाचा स्त्रियं ब्रुवन्नैनमस्त्री पुमान् ब्रुवन् | पुमांसं न ब्रुवन्नेनं वदन्वदति कश्चन || ५ ||

१३३. यं स्वर्गं लोकम् आत्मानं विद्वान् प्रतिपद्यते तमेनम् आत्मानं स्त्रीशरीरसंबन्धिनं स्त्रीशब्देन ब्रुवन् वदन्नपि न वदति कश्चित् कश्चिदपि | तथा नपुंसकदेहसंबन्धिनं न स्त्री नापि पुमान् नपुंसकोऽयमिति ब्रुवन्नपि एनं नपुंसकशब्देन न वदत्येव | तथा पुमांसमपि पुंशरीरसंबन्धित्वात् पुमानयम् इति ब्रुवन् वदन्नपि न वदत्येव कश्चन | **न हि देहधर्मैः सर्वैः तस्य देहस्थस्यापि कदाचिदपि संबन्ध इत्यर्थः ||**

प्राणस्य अहंनामत्वम्

अः इति ब्रह्म तत्राऽऽगतमहमिति || ६ ||

१३४. केन पुनरसौ शब्देन अभिधीयत इति? उच्यते | अकारात्मिका या वाक् यथोक्ता तयैव वाचा अः इत्युच्यते ब्रह्म | विसर्जनीयो निर्देशार्थः तत्र तस्मिन् नाम्नि अकारात्मिकायां वाचि आगतं संयुक्तं स्वगृहे प्राप्त इव अतिथिः अहं प्रत्ययवेद्यं सर्वस्य | तथा चोक्तम् *अहमुक्थमस्मीति विद्यात्*

(ऐ.आ.२-१-२) इति। अहंशब्दश्च अकारपूर्वकत्वात् अकार एव। तथा चोक्तम् *अकारो वै सर्वा वाक्* (ऐ.आ.२-३-६) इति। सर्वं च ब्रह्म। तस्मात् अ इत्येवं ब्रह्म उच्यते न केनचित् शब्दान्तरेण ॥

बृहतीसहस्रेण पुरुषायुषः प्राप्तिः

तद्वा इदं बृहतीसहस्रं संपन्नं तस्य वा एतस्य बृहतीसहस्रस्य संपन्नस्य षड्त्रिंशतमक्षराणां सहस्राणि भवन्ति तावन्ति पुरुषायुषोऽह्नां सहस्राणि भवन्ति जीवाक्षरेणैव जीवाहराप्नोति जीवाह्ना जीवाक्षरमिति ॥ ७ ॥

१३५. तत् प्रस्तुतं बृहतीसहस्रम् इदमेवम्प्रकारं संपन्नम्। यदेतत् स्वर्गलोकाप्ययफलमुक्तं तद् बृहतीसहस्रोक्थात्मविज्ञानकृतमेव, नान्य-निमित्तम् इत्येतमर्थं दर्शयन्नाह उक्तमेवार्थम्। तस्य वा एतस्येत्यादि। कथं पुनः एतद्विज्ञानकृतम् एवं फलमिति ? उच्यते। जीवाक्षरेणैव। सर्वप्राणिजीवनहेतुत्वात् *अशरीरः प्राणः प्रज्ञात्मा जीवः शरीर* (ऐ.आ.२-३-२) इति वचनात्। तथा *यावदस्मिञ्शरीरे प्राणो वसति तावदायुः* (७) इति कौषीतकिनाम्। तस्मात् प्राणो जीवः सर्वजन्तूनाम्। तस्याभिधानं नाम अक्षरम् अकाराख्यम्। उक्तं हि *अः इति ब्रह्म* इति। तेन जीवाक्षरेणैव महदुक्थाकारविकृतेन यस्मिन्नहनि महाव्रतीये सर्ववाग्रूपेण सह जीवः स्तूयते सर्वात्मा *सर्वा वाचो वदन्ति* (तै.सं.७-५-८) इति हि विज्ञायते। तेन जीवाक्षरेण अकारेण जीवाहः महाव्रताख्यं कृत्वा आत्मानम् आप्नोति। स एव हि तथा सर्वाभिर्वाग्भिः स्तूयते क्रत्वात्मभूतः स्वात्मभूताभिरेव। स एवं विद्वान् जीवाक्षरेणैव जीवाहः क्रतुम् आस्वा तेन जीवाहःक्रत्वात्मना

पुनरात्मन्येव विधूय सर्वान् विशेषान् अकारात्मानं जीवाक्षरम् आप्नोति ||

शरीररथे प्राणः स्वामी

अनकाममारोऽथ देवरथस्तस्य वागुद्धिः श्रोत्रे पक्षसी चक्षुषी युक्ते मनः संग्रहीता यदयं प्राणोऽधितिष्ठति || ८ ||

१३६. एवं स्वात्मप्राप्तो विज्ञानमयोऽयं रथः | तं परिकल्पयन् आह | अनकाममारः | मरणं मारः | कामतो म्रियत इति काममारः | न काममारः अकाममारः | अयं तु तद्विपरीतः अनकाममारः | अर्थात् काममार एव | अथ इत्यनर्थको निपातः | देवमयो वागग्न्यादियुक्तो रथः देवरथः | कथम्? तस्य रथस्य वाक् उद्धिः | ऊर्ध्वं नि(धी)यते अस्मिन् सर्वभारजातम् इति उद्धिः | संकोचसामान्याद्वा | श्रोत्रे पक्षसी रथचक्रे | अभितोऽवस्थान-सामान्यात् | शब्दसंबन्धाद् वा | चक्षुषी रथयुक्ते अश्वावित्यर्थः | ताभ्यां हि नीयते रथः | मार्गदर्शनहेतुत्वात् | मनः संग्रहीता सारथिः | तत् तत्र अयं प्राणो जीवः अधितिष्ठति | स हि रथी ईश्वरत्वात् ||

जीवरथवर्णनम्

तदुक्तमृषिणा - आ तेन यातं मनसो जवीयसा निमिशश्चि-ज्जवीयसेति जवीयसेति || ९ ||

१३७. तदेतत् एवं रथकल्पनारूपम् ऋषिणाप्युक्तम् |

आ तेन यातं मनसो जवीयसा रथं यं वामृभवश्चक्रुरश्विना |
यस्य योगे दुहिता जायते दिव उभे अहनी सुदिने विवस्वतः ||

(ऋ.सं.१०-३९-१२)

१३८ आ तेन रथेन यातम् आयातम् आगच्छतम्। किंविशिष्टेन ? मनसो जवीयसा वेगवत्तरेण। तस्यैव विशेषणं रथं यं वां युवाभ्याम् अर्थाय ऋभवो देववर्धकिनो देवाः चक्रुः कृतवन्तः। हे अश्विना तेन आयातम् इत्यर्थः। पुनरपि रथस्यैव विशेषणं यस्य रथस्य योगे योजने दुहिता दिवः द्युलोकस्य उषा जायते। किं च उभे अहनी। रात्र्यहनी इत्यर्थः। *अहश्च कृष्णमहरर्जुनं च* (ऋ.सं.६-९-१) इति मन्त्रवर्णात् रात्रिरपि अहरेवोच्यते.। सुदिने शोभनदिने प्रजानां सुखचेष्टासुखस्वप्नहेतुत्वात् भविष्यतः। विवस्वतः विवस्वत्कर्तृत्वात् तयोः॥ किं च अन्योऽपि मन्त्रोरथप्रकाशकः॥

निमिषश्चिज्जवीयसा रथेनाऽऽयातमश्विना।

अन्ति षद्भूतु वामवः॥ (ऋ.सं. ८-७३-२)

१४० निमिषश्चित् निमिष इव। चिन्निपातस्य उपमार्थत्वात्। जवीयसा रथेन आयातम् आगच्छतं हे अश्विनौ। अन्ति अन्तिके समीपे सद्भूतु भवतु अस्माकं वां युवयोः अश्विनोः अवः अवनं रक्षणम्। अस्मत्पुत्रपौत्रादीनाम्। अस्माद्यज्ञम् अस्मदनुग्रहायेव निमिषश्चित् जवीयसा रथेन आयातम्। द्विर्वचनम् उक्थप्रस्तावपरिसमाप्तिप्रदर्शनार्थम्॥

॥ इति अष्टमः खण्डः॥

॥ इति तृतीयोध्यायः॥

द्वितीयारण्यकस्य आद्यानां त्रयाणाम् अध्यायानां सारः

आत्मज्ञानात् न प्रमाद्येत। अप्रमत्तैः मुमुक्षुभिः आत्मज्ञानाय प्रयत्नः कर्तव्यः। तिस्रः प्रजाः स्थावराः लताः सर्पाः अस्मात् ज्ञानमार्गात् कर्ममार्गाच्च परिभ्रष्टा जायन्ते तस्मात् पापकर्मणः जुगुप्सेत्। प्राण एव इदं सर्वं, स एव इदं उक्थम्, पृथिवीरूपेण अन्नेन उक्थम्, अन्तरिक्षे वायुरूपेण दिवि आदित्यात्मना। पुरुषोऽपि उक्थम् अन्नं अशीतयः। तेन हि सर्वं अश्नुते। सर्वं अन्नान्नादरूपेण प्राणेन व्याप्तम्। पृथिवी अन्नम् द्यौः अत्री। प्रजापतेः रेतः देवाः तेषां सारः वर्षं तस्य ओषधयः तासां अन्नम् अन्नस्य रेतः रेतसः पुरुषः। अनेन क्रमेण प्रजानां सृष्टत्वात् पुरुषः प्रजापतिः। पुरुषः सोमात्मकः।

प्राणो ब्रह्म, यतः प्रपदेन प्रपन्नः अतः पादः, ऊर्ध्वम् उत्सर्प्य ऊरुः, ततः ऊर्ध्वं उदरम्, ततः ऊर्ध्वं उरः, अतः उदरे ब्रह्म वैश्वानरः, उरसि हृदये पुण्डरीके चिन्मयश्च वर्तते ततः ऊर्ध्वं शिरः इन्द्रियाणां श्रयणात् शिरः, सा श्रीः। प्राणे उत्क्रान्ते यस्मात् शरीरं पतितम्, प्राणे प्रविष्टे उत्थितञ्च शरीरोत्थानहेतुत्वात् प्राणः उक्थः, प्राणः कालात्मकः, प्राणः देवतात्मकः, सर्वात्मा प्राणः, प्राणः सत्यम्। एवं विद्वांसं अनृतदोषो न हिनस्ति।

तस्यास्य प्राणस्य वाक् तन्तिः, नामानि दामानि। लोकः वाचा सर्वं यदभिवदति तत् प्राणस्य भोज्यमिव। प्राणः बृहतीछन्दोरूपेण वेदात्मकः, सर्वगोपाः सर्वाधारः प्राण एव वाक् पृथिवी अग्निः, घ्राणवायू अन्तरिक्षम्, चक्षुरादित्यः द्यौः, श्रोत्रं दिशः चन्द्रमा, मन आपो वरुणः, प्राण एव शतर्चिः, गृत्समदः विश्वामित्रः वामदेवः अत्रिः भरद्वाजः वसिष्ठः, प्रगाथाः पावमान्यः महासूक्तं क्षुद्रसूक्तं सर्वं प्राण एव।

महाव्रतीयेऽहनि बृहतीसहस्रे शस्यमाने तिस्रस्तृचाशीतयो बृहतीसहस्रात्मन

इन्द्रस्य प्राणस्य अन्नमिति शंसनेन विश्वामित्रः प्राणस्य प्रियं धाम उपगतवान् | तस्मै तुष्ट इन्द्रः प्राणात्मनः स्वस्य तत्वम् उपदिदेश | प्राणो वा अहमस्मि इत्यादीनां पुनः ज्ञापने प्रयोजनम्-निष्कामेन यथावत् कृतं श्रौतं कर्म ज्ञानोत्पत्तिकारणमिति | प्राण एव बृहतीसहस्रम् | बृहतीसहस्राक्षराणि पुरुषस्य आयुः | ३६००० सहस्रं व्यञ्जनानि रात्रयः | ३६०००- स्वराः अहानि | प्राण एव सर्वं व्याप्य, प्रज्ञानमयः देवतामयः ब्रह्ममयः अमृतमयः सूर्यात्मा | अमृतो भवति य एवं वेद | प्राणः उक्थः पञ्चविधः अन्नान्नादः | मनुष्ये एव आविस्तरां आत्मा | अतः पशुत्वेपि पुरुषः अतिशयेन प्रज्ञानेन सम्पन्नः | पुरुषः समुद्रः | सर्वं पञ्चविधम् | पाङ्क्तं साम | सत्यकथनेन सर्वात्मको भवति अनृतकथने सर्वनाशः | ब्रह्म ओंकारः | प्राणे सर्वं आश्रितम् | तस्य विभूतिः | अहंनामा प्राणः, बृहतीसहस्रेण शतायुर्भवति | प्राणः स्वामी उक्थम् इत्युपसंहारः | |

म.सु.अश्वत्थनारायण अवधानी

मन्त्राणामनुक्रमणिका

अत्र मं. इति खण्डा यथाविभक्ता अस्माभिस्तथाभूतो मन्त्रभागः

भाष्यस्थमुख्यशब्दसूची

अत्र दत्ताः संख्या भाष्यभागपरामर्शिन्यः

(१) आत्मविद्या -	आत्मज्ञानम् - १
(२) अवगधाः -	क्षुद्रस्थावराः - ६
(३) आधात्री -	पृथिवीद्यौः - २५
(४) आवपनम् -	आकाशः - ८७
(५) अक्षरम् -	प्राणाख्यम् - १३१
(६) इन्द्रः -	परमेश्वरः - १२७
(७) इरपादः -	उरःपादाः सर्पादयः - ६
(८) इरामयः -	अन्नमयः - २९
(९) ईश्वरः -	समर्थः - १०७
(१०) उक्थम् -	श्रेष्ठं कर्मनाम च - २९
(११) ऋभवः -	देववर्धकिनः - १३८
(१२) काममारः -	कामतो म्रियते इति - १३६
(१३) निगमनम् -	हेतूक्तेः परम् - १११
(१४) प्रातायी -	अपालयत् - ३४
(१५) प्राणो - मृत्युः	अमृतश्च - ५७
(१६) प्रज्ञामयः -	प्राणः - ८३
(१७) प्रपदम् -	पादौ - (क्षुराः, शफाः) - २३
(१८) प्रजापतिः -	अयं प्राकृतः पुरुषः - १८
(१९) प्रजाः -	कर्मज्ञानात् प्रच्युताः - ५, ६

(२०) ब्रह्ममयः - वेदमयः - ८३

(२१) ब्रध्नस्य विष्टपम् - सुवर्गो लोकः - २३

(२२) ब्रह्म - प्राणः - २४, २५

(२३) महदुक्थम् - बृहतीसहस्रम् - ऋग्वेदस्तोत्ररूपशस्त्रविशेषः

(२४) महाव्रतम् - क्रतुविशेषः ७८

(२५) माध्यमाः - माध्यमानां मन्त्राणां द्रष्टारः - ६२

(२६) वङ्गाः - महान्तस्थावराः - ६

(२७) विश्वामित्रः - प्राणः - ६३, ६७

(२८) वामदेवः-अत्रिः-भरद्वाजः-वसिष्ठः-

(२९) वृथावाक् - असम्बद्धप्रलापितम् - ११७

(३०) हिरण्मयः - ब्रह्मलोकः - २०

Part II

द्वितीयः भागः

ऐतरेयद्वितीयारण्यके अध्यायाः ४,५,६

PREFACE

The present edition of Shri Shankaracharya's Bhashya on the Aitareya Upanishad, is intended for readers who wish to have the plain text of Shri Shankaracharya's work unencumbered by commentaries and sub-commentaries, but provided with such aids to study as a beginner is likely to need in appreciating the original.

The Aitareya Upanishad Bhashya edited by H.H. Sri Satchidanandendra Saraswati Swamiji has been published earlier by the Adhyatma Prakasha Karyalaya in Kannada script along with Swamiji's translation of the same into Kannada language and along with an introduction, short notes, summary of the Upanishad etc. The Kannada edition has since undergone several reprints. For the benefit of the readers not knowing Kannada, this edition of Aitareya Bhashya is brought out in Devanagari script for the first time by the Karyalaya.

The Aitareya Upanishad is one of the ten principal Upanishads which have been commented upon by Shri Shankara Bhagavatpadacharya. This Upanishad forms part of Aitareya Aranyaka of the Shakala school of the Rigveda. The Aitareya Aranyaka consists of five books each called an Aranyaka. Of these five, the Second book contains meditation on Prana (first three chapters), knowledge of the Self (next three chapters) and Shanti mantra (last chapter).The Third book contains meditation with regard to Samhita texts. According to Sayanacharya etc. the whole of the second and the third book compositely form the Upanishad, the third book being specifically called the Samhita Upanishad. However, the portion dealing with the knowledge of the Self i.e., the fourth, fifth and sixth chapter of the second book is what is

customarily called Aitareya Upanishad and the Shankara Bhashya in currency is for this portion. The Bhashya on these chapters is what is being taught and learnt, printed and published, discussed and discoursed upon. Certain points culled out from the scholarly and highly informative introduction provided by the Swamiji is briefly given hereinafter.

Is The Extant Bhashya Complete?

From this a pertinent question arises - What is the extent of the Upanishad for which Shri Shankaracharya has written his commentary? Does the original Bhashya commence from the fourth chapter of the Second book as is presently widely believed to be, or does it commence from the very start of the Second book?

The start of the extant Bhashya by way of contextual reference (परिसमाप्तं कर्म....) does not indicate the commencement of the Bhashya. Moreover, two sentences are found in the extant Bhashya which give sufficient room for inferring that the Acharya had probably commented on the preceding portion also, that is, from the very start of the Second book 'एष पन्था एतत्कर्म.....'-

i. 'तस्मात् एष पन्था एतत्कर्मैतद्ब्रह्मैतत्सत्यं यदेतत्परब्रह्मात्मज्ञानम्' - (Therefore, this knowledge of the Para-Brahmatman is verily the Path, is verily the Karma, is verily the Brahman, is verily the Truth) - Bhashya on (Ai. Ar.2.4.2). This is in the context of citing the text 'the Devatas also fall within the sphere of samsara' as the reason for the earlier text 'एष पन्था...' appearing at the beginning of the Second book. While commenting on this Bhashya sentence, the sub-commentator, generally believed to be Anandagiri (whose indentity is discussed later) says -'यद्यप्येतद्वाक्यव्याख्यानावसरे कर्ममार्गोऽपि पथिशब्दार्थत्वेनोक्तस्तथापि ज्ञानमार्गोपायत्वेन स उक्तो न प्राधान्येनेति भावः |' - (Though while explaining

this sentence (एष पन्था...) path of karma is also comprehended as the meaning for the word 'पन्थाः' (path), it is only in the sense of it being the means for the path of knowledge and not in a fundamental sense). From this it can be said that the subcommentator considers that the Bhashya commenced from 'एष पन्था' i.e., the start of the Second book itself.

ii. 'करणसंहतिरूपश्च प्राण इत्यवोचाम प्राणसंवादादौ' - (The Prana is the conglomerate of organs, so we said at the start of 'conversation amongst the organs' (Ai.Ar. 2.1.4) - Bhashya at part 86. This is the reference made to the acceptance of Prana, by all the organs, as the 'uktha' (literally the panegyric, contextually the principal) and their dependence on Prana. The words 'so we said' gives sufficient room to speculate that Acharya had commented upon that part of the Aranyaka also.

Moreover, in the extant Bhashya, the contextual relationship with the earlier three chapters is frequently discussed. Certain texts from this part are also cited in the Bhashyas of other Upanishads and Brahmasutras. This strengthens the view that Acharya has probably commented upon the earlier three chapters also.

Further, the Aitareya Upanishad is customarily referred to as 'आत्मषट्कम्' (Sextet of Atman). If one considers 'आत्मा वा इदमेक एवाग्र आसीत्' (Ai. Ar.2.4.1) as the commencement of the Upanishad, then, the appropriateness of the name 'आत्मषट्कम्' becomes questionable. Neither are there six chapters nor six khandas to justify that name. If it be said that the seventh chapter commencing from 'वाङ्मे मनसि' be also included to complete the sextet of khandas, then the question arises why not the Upanishad be named as (आत्मचतुष्टयम्) (Quadrapule on Atman) on the basis of four chapters; also why the

Acharya has not commented upon this concluding part needs to be answered. Therefore, in all fairness, it will be only appropriate to conclude that the earlier three chapters and the three chapters for which the extant Bhashya is there, together earned the name आत्मषट्कम् being devoted to the inquiry of the Para and Apara Brahman.

As if to support this, revered Swamiji states in his introduction to the Kannada translation of Aitareya Upanishad Bhashya that he has in his possession a hand written manuscript titled 'Shri Shankaracharya krita Bhashya' comprising Bhashya on the whole of the first six chapters of the Second book. In that manuscript, in addition to the Bhashya on the earlier three chapters, the extant Bhashya on the subsequent three chapters is also found. Shri Swamiji further states that he refrains from publishing the Bhashya on the earlier part in the hope of additional manuscripts from different sources[1].

However this may be, in light of whatever has been said above, in order to understand the Bhashya, it is essential to read all the six chapters as a whole. It is clear that Acharya in his discussion has considered the contents of the six chapters as a whole.

Salient Features of the Bhashya

Some of the salient features of this Bhashya as pointed out by Swamiji in his introduction to the Kannada version is presented briefly:

---

1. In the Aitareya Upanishad Bhashyam by Shri Upanishadbrahmendrayogin, published by the Adayar Library, Madras (in 1935) there is an opinion expressed that Sri Shankaracharya has commented the text of Aitareya Upanishad from the first chapter of the second Aranyaka, though on the basis of a different reasoning.

a. Atman unrelated to Karma is what is taught in this Upanishad. The propagators of the conjunction of the deeds and knowledge (ज्ञानकर्मसमुच्चयवादिनः) assert that since the Upanishad is contextually placed between the texts related to Karma, the knowledge of Atman taught in the Upanishad is necessarily related to Karma. In a detailed discussion, the various points raised by the Purvapaksha (the prima facie view) are effectively answered and the views of the Acharya ultimately stand unassailed. The prima facie view is that - in view of the contextual placing, the Upanishad teaches that the 'Prana' is the Atman (Self) of all and therefore Prana, that is, Brahman with characteristic properties is to be meditated upon as the creator etc. of the world; other such meditations are also prescribed; the Upanishad does not prescribe renunciation of Karma for self knowledge; man by his very birth is bound by three debts which have to be repaid by performance of the prescribed deeds so long as he lives, towards this end the Shruti has prescribed Karma.

These views are refuted by showing that the knowledge of attributeless Brahman, the Self of all is what is taught in the Upanishad and no meditation. At the dawn of such knowledge the very purpose of doing karma is lost and thus this knowledge is divorced from the one who performs Karma. Performance of deeds and clearance of debts is enjoined by the Shruti in respect of the not knower of Brahman. Moreover, the Shruti permits a not knower who is detached, to renounce the Karma and take up the path of knowledge. The highest fruit of combined practice of karma and meditation is the attainment of various Godhoods which is but shown to fall within the sphere of samsara. It is not the prescription of the Shruti that one and the same person undertakes karma and knowledge at the same time. Rather, the Shruti prescribes that a not

knower by performing Karma without expectation of the fruits therefrom, is purified and then by knowledge gets liberated from samsara. Performance of Karma being the outcome of not knowing the Self, karma and knowledge cannot co-exist.

The Prana dealt with in the earlier part is one with attributes and is of the nature of conglomerate of organs in all beings, whereas the Self, taught in the later part is attributeless, non-dual, pure consciousness alone. This Self is the real intrinsic nature of the Jivas. Therefore, though the knowledge that Prana is the self may be related to Karma, the knowledge taught in the later part is not related to Karma.

b. Atman is non dual, pure consciousness without any characteristic property - In this Upanishad it is said that Atman having created the whole world enters it in the form of Jiva, gets caught in the transmigratory cycle, then by means of inquiry knows himself to be nothing but Pure consciousness. In explaining this, the line of discussion followed by the Acharya in brief is - Atman is our very inherent nature; being devoid of attributes like sound etc., he is beyond the ken of sensuous perception or inference therefrom; to consider oneself as the Jiva possessed of characteristic properties like hearing, seeing, thinking, knowing, doing, enjoying etc. is nothing but wrong understanding of concepts of hearing etc, which really pertains to the inner-sense or the mind (अन्तःकरणम्); the mental concepts of the nature 'I heard' is ephemeral in contrast to the eternal conscious nature of the Atman; due to lack of discrimination between the Atman's awareness that is eternal and the ephemeral mental knowledge, men fancy over the nature of Self; this misunderstanding alone has led to attribution of qualities to Atman and to the distinction between the individual (Jiva), Iswara and Brahman; Atman being the innermost intrinsic nature of all, cannot be known through any

means of knowledge (Pramana); Atman is a self established entity prior to the very idea of objects and means of knowing them; therefore only by negating the not-self and its qualities which are superimposed on the Atman following the teaching of the Shruti, one knows himself to be the Atman, the pure consciousness alone: knowing thus is what is called Atmasakshatkara.

c. Shastra as the means of knowledge - The Shastra is considered as a Pramana only in as much as it negates the properties that are superimposed upon the Atman; the Shastra teaches that Paramatman is the real nature of the individual Jiva and therefore the Shastra which emanates from the Paramatman cannot enforce Paramatman himself (the Jiva who knows himself thus) to perform Karma; even if the view of the Mimamsakas that Vedas are eternal (do not emanate) is accepted, it will be a contradiction in as much as the Shastra considers the individual as a doer and the very same Shastra considers the very same individual as a non-doer, therefore it is incorrect to hold that knowledge is taught as subservient to Karma; since the Shastra teaches that the Jiva is nothing but Paramatman itself and since the resultant knowledge is never sublated, the validity of Shastra as a means of knowledge stands established.

d. Mahavakyas - The vedic texts that declare the unity of the individual self and the Paramatman are customarily called Mahavakyas; in this Bhashya, the word 'महावाक्य' appears at para 57 (Ai.Ar.2.4.3) according to certain readings as 'वेदान्तमहावाक्यभेर्याम्'; however, since there is a variant reading as - 'वेदान्तमहाभेर्याम्' and also since the word 'महावाक्य' does not find place in any other bhashya, it is improbable that the Acharya uses this terminology in a technical or definitional sense; though the texts declaring the cardinal tenet that is, the unity of Self and Brahman, in all fitness, can be called as

mahavakyas (great statements) it would be incorrect to restrict the number of mahavakyas to just four (तत्त्वमसि, अहं ब्रह्मास्मि, अयमात्मा ब्रह्म and प्रज्ञानं ब्रह्म) as some have indeed fancied. Every Upanishad teaches the unity of Self and therefore it will be only appropriate that all such texts are called Mahavakyas. Of late, some have even ventured to the extent of considering these texts as mantras to be uttered repeatedly (महावाक्यजपः) by the sanyasins as a part of their daily duties. However, there is no support for this either in the principal Upanishads or in the Bhashyas.

Glossator on the Bhashya

Revered Swamiji has also discussed about the identity of Anandagiri traditionally believed to be the author of the Gloss (tika) on this Bhashya. A free translation of the same is given here in below

'Many of us believe that Anandagiri is a direct disciple of Shri Shankaracharya. The colophon at the end of the sub-commentary on the Aitareya Upanishad Bhashya published by Anandashrama, Pune, reads as - 'इति श्रीमत्परमहम्सपरिव्राजकाचार्यश्रीमच्छङ्करभगवच्छिष्यानन्दज्ञानविरचितायामैतरेयोपनिषद्भाष्यटीकायां प्रथमोऽध्यायः |' at the end of the first chapter and 'इति श्रीमद्भगवत्पूज्यपादशिष्यानन्दज्ञान कृतावैतरेयोपनिषद्भाषटीकायां द्वितीयोऽध्यायः |' at the end of second chapter. It has been shown elsewhere (Introduction to the Bhashyas on Kena, Mundaka, Taittiriya Upanishads published by the Adhyatma Prakasha Karyalaya) that all the Tikas going by the name of Anandagiri are not from the pen of one and the same author. It will be interesting to note that in the Tika on the Aitareya Upanishad Bhashya 'Deepika of Sayana' is referred to (page nos. 25, 27, 28 and 42 of Anadashrama Edition-1980). At certain places the latter's views are concurred with and at others, own opinion is stated. However, according to the English Introduction to the book

Anandagiri Krita Tarka Sangraha (Gaikwadi Oriental Series), the authorship of this Tika is attributed to 'Abhinava Narayanendra Saraswati' as per the manuscripts found in Raghunatha Devalaya of Kashmir[1]. Some of the manuscripts in the possession of Anandashrama contain evidence to show that the Tika on Prashna Upanishad Bhashya is authored by this same Abhinava Narayanendra Saraswati. In that Tika, Upanishad Deepika of Shankarananda is cited. From these it becomes clear that the author of the Tika is of recent origin very much farther away in time than Shri Shankaracharya.

The Aitareya Bhashya alone is sufficient to prove how hazardous it is to proceed to ascertain the purport of the Bhashya merely based on the Tika, on the false presumption that the Tikas on the Bhashyas have been written by one and the same Ananadagiri and that that Ananadagiri is a direct disciple of Shri Shankaracharya. This is so because instances are not found wanting where the author of the Tika substitutes his own readings for that of the Bhashya and explains the same in a way to turn the very views of the Acharya topsy-turvy. Though in certain instances his explanations to the Bhashya and the reasoning advanced are praiseworthy, at some other places going off the track he falls head downwards. Wherever his explanations are found to be unacceptable to me, I have indicated them in the footnotes (Tippani) to the Bhashya.'

---

1. Adding strength to this view, is the Aitareya Upanishad Bhashya with tika published by Sri Babu Varanasi Prasad of Varanasi, printed in his Kashi Sanskrit Mudrayantra in the Samvat year 1941 (A.D 1884) wherein the colophon at the end of the Tika reads as 'इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीकैवल्येन्द्रपूज्यपादशिष्यश्रीमज्ज्ञानेन्द्रपूज्यपादशिष्यश्रीमदभिनवनारायणेन्द्रसरस्वति विरचितायामैतरेयोपनिषद्भाष्यटीकायां षष्ठोऽध्यायः समाप्तः ।'. The Tika referred to here is the same as that published by the Anandashrama under the name of Anandajnana. A critical study of this text reveals many interesting findings.

Text of the Bhashya and the notes thereon

In view of what has been stated above with regard to the glossator, Swamiji felt it incumbent to bring out the inconsistencies in the gloss so as to present the school of Shankaracharya unmaligned by the commentators on the Bhashya. Therefore, this edition of the Bhashya is brought out. The text of the Bhashya though is primarily based on the Anandashrama edition, publication of Vani Vilas Srirangam and Vedanta Vidya Vilas, Madras etc. have also been compared for variant readings. Short notes (Tippani) on points of special interest, references to parallel passages in the other works of the great Acharya, a summary of the Upanishad, and an index as provided by the Swamiji in the Kannada version, have all been translated into Sanskrit and provided here.

It is hoped that the systematic division of the text into paragraphs with indication of important various readings, the tracing of quotations to their originals, the summary etc, will all combine to make this edition specially convenient for the earnest reader.

PUBLISHERS

भूमिका

उपनिषदः स्थानम्

ऐतरेयोपनिषद् ऋग्वेदे अन्तर्गता। ऋक्संहिता द्विधा प्रख्याता शाकलसंहिता, शाङ्खायनसंहिताचेति। शाकलसंहितामन्त्राणां विवरणभाग एव ऐतरेयब्राह्मणं नाम। शाङ्खायनसंहिता संप्रति नोपलभ्यते। शाङ्खायनब्राह्मणं तु आनन्दाश्रमसंस्थया प्रकाशितमस्ति। ब्राह्मणभागानां परिशिष्टानि आरण्यकानि भवन्ति। प्रकृतोपनिषद् ऐतरेयब्राह्मणस्य आरण्यके विद्यते। अत एवास्या ऐतरेयोपनिषदिति नाम। तत्र इतरानाम्न्याः पुत्रेण महिदासेन संप्रदायप्रवर्तकेन ऋषिणा दृष्टत्वाद् ऐतरेयनाम्नी एषा। ऐतरेयारण्यकं पञ्चभागात्मकम्। प्रथममारण्यकं महाव्रतकर्मविषयकम्। द्वितीय आरण्यके प्राणोपासनम्, आत्मविचारश्च विद्येते। तृतीय आरण्यके संहिताविषयकोपासनं विहितम्। चतुर्थे पञ्चमे चारण्यकयोर्महाव्रतस्य विस्तर उपलभ्यते।

भाष्येण व्याख्यातभागः

आरण्यकस्य यथोक्तविभागानुसारम् औपनिषदर्थो विवक्षितः आत्मविचारो द्वितीय आरण्यक एव केवले विद्यत इति ज्ञायते। अत एवायं भागो भगवता शङ्कराचार्येण विरचितेन भाष्येणालङ्कृतोऽस्ति। तथापि तत्र कस्माद्ग्रन्थभागादारभ्य तैर्भाष्यं विरचितमित्यत्रास्ति शङ्कावकाशः। यतः संप्रति मुद्रितत्वेनोपलभ्यमानेषु ग्रन्थेषु अवतरणिकाभागे विद्यमान-

मुपनिषत्संबन्धभाष्यं भाष्यारम्भं न सूचयति। वर्तते चात्र वाक्यद्वयं यदतीतानन्तरभागस्यापि भाष्यं तैर्विरचितमित्यभ्यूहस्य अवकाशद्योतकम्। तद्यथा-

१. 'तस्मात् एष पन्था एतत्कर्मैतद्ब्रह्मैतत्सत्यं यदेतत्परब्रह्मात्मविज्ञानम्' (भा. भा. ३७) - अत्र पूर्वोक्तस्य (तस्मात् एष पन्था ... (ऐ.आ. २-१-१) इत्यस्य) हेतुत्वेन देवता अपि संसारिण इति वाक्यार्थस्य संबन्धो दर्शितः। अस्य वाक्यस्य व्याख्यानसन्दर्भे टीकाकार एवं लिखति- 'यद्यप्येतद्वाक्यव्याख्यानावसरे कर्ममार्गोऽपि पथिशब्दार्थत्वेनोक्तः, तथापि ज्ञानमार्गोपायत्वेन स उक्तः, न प्राधान्येनेति भावः' इति। अनेन 'एष पन्थाः' इति वाक्यप्रभृति एव भाष्यमारब्धमिति टीकाकारस्याभिप्राय आसीदिति वक्तव्यं भवति।

२. 'करणसंहतिरूपश्च प्राण इत्यवोचाम प्राणसंवादादौ' (भा.भा. ८६)- अतीते मूलग्रन्थे (ऐ.आ. २-१-४ इत्यत्र) इतराणि करणानि 'प्राण एव उक्थः' इति, 'सर्वाणि करणानि प्राणमेवावलम्बन्ते' इति चाभ्युपगतवन्तः इति परामर्शो वर्तते। 'इत्यवोचाम' इत्यनेन भाष्यकारप्रयोगेण अस्यातीतोपनिषद्भागस्यापि भाष्यमाचार्यैर्विरचितं स्यादित्यूहो लब्धावकाशो भवति।

अतीताध्यायत्रयस्य सम्बन्धोऽस्मिन्सम्प्रतितने भाष्ये पुनःपुनः चर्चितो दृश्यते। तदध्यायान्तर्गतानि कानिचन वेदवाक्यानि उपनिषदन्तरभाष्येषु, सूत्रभाष्ये च तत्र तत्रोदाहृतानीत्येतत् आचार्याः तस्याध्यायत्रयस्यापि भाष्यं व्यरचयन्निति तर्कमुपोद्बलयति।

ऐतरेयोपनिषदियम् 'आत्मषट्कम्' इति नाम्नापि क्वचित् प्रसिद्धा। यदि 'आत्मा वा इदमेक एवाग्र आसीत्' इत्यत एवोपनिषदारभ्यत इत्यभ्युपगमः, तर्हि उपनिषद यत् एतन्नाम आत्मषट्कमिति तत् किंनिमित्तमित्युपपादनं क्लिष्टं भवति। न ह्यस्मिन् ग्रन्थे षडध्यायाः, षट् खण्डाः वा सन्ति। 'भवन्ति च षट् खण्डाः सह 'वाङ्मे मनसि' इत्यग्रिमखण्डेन' इति वादिनां तु तावान्ग्रन्थभागो चतुर्भिरध्यायैर्विभक्तः इति 'आत्मचतुष्टयम्' इति नाम कुतो न प्रसिद्धमिति शङ्का, कुतो पञ्चमखण्डान्तेनैव भाष्यं पर्यवसितमिति शङ्का च दुष्परिहार्ये। तस्मादतीताध्यायत्रयं सम्प्रतितनाध्यायत्रयं च संभूय परापरब्रह्मरूपस्य परमात्मनो विचारणादस्य आत्मषट्कमिति संज्ञानिमित्तमिति युक्ततरः पक्षः।

एतदनुगुणं 'श्रीशङ्कराचार्यकृतभाष्यम्' इति नाम्ना हस्तलिखितमातृकैका मया प्राप्ता यत्र षण्णामप्येतेषामध्यायानां संभूय भाष्यं वर्तते। तस्यां मातृकायां प्रथमाध्यायत्रयस्य भाष्येण सह संप्रति मुद्रितं प्रचारितमध्यायत्रयभाष्यमपि विद्यते। मातृकान्तरस्य कुतश्चिल्लाभप्रत्याशया पूर्वभागमिमं न प्राकाश्यं नीतो मया। भवतु वेदं यथा तथा। इदं तु वाचकैरवधेयं यदधस्ताद्दर्शितेभ्यो हेतुभ्य ऐतरेयोपनिषद्भाष्यार्थावगमाय षण्णामप्यध्यायानां संभूयावलोकनमावश्यकमिति। आचार्याः षण्णामप्येतेषामध्यायानामभिप्रायं संभूयैव विचारं प्रतानितवन्त इति स्पष्टमेव।

भाष्ये मुख्यांशाः

भाष्येऽस्मिन् विषयद्वयं प्राधान्येनोपात्तं विचारणाय- अस्यामुपनिषदि कर्मासंबद्धस्यात्मनो विचार एव मुख्यतया प्रतिपादितमिति, आत्मा अद्वितीयनिर्विशेषचिन्मात्र इति च। इमौ विषयौ सिद्धान्तस्य मूलस्तम्भभूतावित्यत एतयोर्विषये भाष्यकृद्भिर्या विचारसरणिरनुसृता तस्याः संक्षेपेण निरूपणं प्रयोजनवत्स्यात्।

(अ) केवलात्मज्ञानम्

तत्र तावत् ज्ञानकर्मसमुच्चयवादिन एवं कल्पयन्ति- द्वितीय आरण्यके (आद्येनाध्यायत्रयेण) प्राणाख्यस्यापरब्रह्मण उपासनस्योक्तत्वात्, तस्य चोपासनस्य कर्मसंबन्धत्वेनैवोपदिष्टत्वात्, अस्या उपनिषदः समनन्तरग्रन्थेन संहितोपासनादीनां कथनाच्च मध्यवर्तिन्यामुपनिषदि वर्तमानमात्मज्ञानमपि कर्मसंबद्धमेवेति। इत्थं च पूर्वपक्षिणोऽभिप्रायः-यथातीतेन ग्रन्थेन प्राण एव सर्वात्मेत्युपसंहृतमेवमेवात्रापि आत्मा सर्वेषामात्मेत्युपसंहृतम्। यथा तत्र सूर्यान्तर्गतः प्राणः, अस्माकं शरीरस्थः प्रज्ञात्मा चैक एवेत्युक्तम्, तथैवात्रापि यत् प्रज्ञानं तत् ब्रह्मेत्युच्यते। संहितोपनिषदाख्य उपनिषदुत्तरग्रन्थे च सर्वेषामात्मभूतं ब्रह्म प्राण एवेत्युक्तम्। तस्मात् सगुणब्रह्म जगज्जन्मादिकारणमित्युपासनाविधानार्थम्, अथवा कर्मानुष्ठानच्छिद्रकाले केवलस्यात्मन उपासनाविधानार्थम्, अथवा एष आत्मा स्वात्मनोऽनन्य इत्युपसनाविधानार्थमियमुपनिषत् प्रवृत्ता। नैव चात्र कर्मत्यागपूर्वकमात्मज्ञानं प्रतिपत्तव्यमिति विहितम्। कर्मणा सहैव आत्मोपासनीय इति

तात्पर्यमुपनिषदः । पुरुषो यावज्जीवं कुर्वन्नेव कर्माणि वर्तेत इति, जातमात्रेण सर्वोऽपि ऋणत्रयमपाकुर्यादेवेति च कर्म विदधती श्रुतिरप्येतमभिप्राय-मेवोपोद्बलयति इति ।

तत्र सिद्धान्ती परिहरति- अत्र सर्वेषामात्मभूतस्य ब्रह्मणो ज्ञानमुपदिष्टम्, न तूपासनम् । न ह्येतदात्मज्ञानानन्तरं कर्मसाध्यस्य प्रयोजनस्याकाङ्क्षा भवति । अतो न कर्मविषयकमेतज्ज्ञानम् । कुर्वन्नेव कर्माणि जिजीविषेदिति विधानम्, ऋणत्रयमपाकुर्यादेवेति च विधान-मविदुषामेव । अविद्वानपि यदि विरक्तश्चेत्, स कर्माणि संन्यस्य आत्मज्ञानं प्रतिपद्येतेति श्रुतावुपलभ्यते । तस्माद्येऽविद्वांसोऽमुमुक्षवश्च तेषामेव कर्म विहितमिति ज्ञेयम् । कर्मोपासनानां समुच्चयस्य 'देवताप्ययः' परमं फलम् । ता अपि देवताः संसारक्षेत्र एव भवन्तीत्यतः समुच्चयेन मुक्तिर्न प्राप्या । कर्माण्यनुष्ठाय सत्त्वशुद्धिपूर्वकं ज्ञानप्राप्तिद्वारेण मोक्षः प्राप्तव्य इत्येव श्रुतेरभिप्रायः, न तु एकः पुरुष एकस्मिन्नेव काले कर्म ज्ञानं च समुच्चित्यानुतिष्ठेदिति । न हि कर्म ज्ञानं चैकस्मिन्नेव काले एकस्मिन्नेव पुरुषे सहैव संभवेतामात्माज्ञाननिमित्तत्वात्कर्मणः । अतीतेन ग्रन्थेन प्रतिपादितः प्राणः सविशेषभूतः । स सर्वेषां भूतानां करणात्मा । अस्मिन्नुपनिषद्भागे प्रतिपादित आत्मा तु निर्विशेषचिन्मात्रः । स जीवानां परमार्थस्वरूप एव । तस्मात् आरण्यकभागद्वयेन (आद्येनाध्यायत्रयेण अपरेणाध्यायत्रयेण च) उक्ते आत्मज्ञाने, सर्वात्मभावरूपे, तत्फले च परस्परविलक्षणे । तस्मात् यद्यपि अतीतग्रन्थोक्तमात्मज्ञानं कर्मसंबन्धि, अत्रोक्तं ज्ञानं तु न कर्मसंबन्धि - इत्येव निश्चेतव्यमिति ।

(आ) निर्विशेषचिन्मात्रवादः

आत्मा सृष्ट्वेदं सर्वं जगत् जीवरूपेण तस्मिन् प्रविश्य संसारमनुभूय ततो विचारेण चिन्मात्रस्वरूपोऽहमिति साक्षादनुभवतीत्यस्यामुपनिषदि वर्णितमस्ति। अस्याभिप्रायस्य स्पष्टीकरणार्थमाचार्यैरनुसृतप्रतिपादनक्रमस्यायं सारः–आत्मेति सर्वेषां नः स्वरूपमेव। शब्दादिसर्वगुणराहित्यात्तस्य, न स प्रत्यक्षेण ज्ञातुं शक्यते नाप्यनुमानेन। अहं जीव इति, श्रवणमननविज्ञानादिधर्मवानिति चास्माकं ज्ञानमन्तःकरणस्य श्रवणादिरूपवृत्तिभिर्जनिता भ्रान्तिः। या अवगतिः श्रवणादिना जायमानेवावभासते सास्माकं स्वरूपमेव इत्यतो नित्या। 'अहमश्रौषमि'ति अनित्यत्वेन भासमाना या, सा अन्तःकरणवृत्तिः, न त्वात्मनः प्रज्ञानम्। प्रज्ञानं नित्यभूतम्, वृत्तिस्तु अनित्यभूता–इत्येतयोर्विवेकाभावादेवात्मनि विविधं कल्पयति लोकः। आत्मनि गुणानां कल्पनं जीवेश्वरब्रह्मभेदकल्पनं चैतदज्ञानकृतमेव। न ह्यस्ति वस्तुतः प्रमाणमेकमपि साधनभूतं येन आत्मा, तद्भेदाः, तद्धर्मा वा ज्ञायन्ते। यतः प्रमाणं प्रमेयमेव विषयीकरोति, न तु तत् कदाचिदपि प्रमातृस्वरूपं विषयीकर्तुमलम्। यद्यात्मनैव स्वस्वरूपं ज्ञातव्यं तर्हि स्वस्मिन्नंशद्वयं प्रकल्प्येत। अथवा, यदि स्वात्मानं ज्ञातुं स्वस्मादन्यत्पृथग्ज्ञानमस्तीति कल्प्यते चेत्, तज्ज्ञातुमन्यज्ज्ञानं तदपि ज्ञातुमन्यदित्येवमनवस्था ज्ञानसंततेः स्यात्। तदेवमनुपपन्नत्वादुभयोरपि कल्पनयोः नित्यचैतन्यस्वरूपभूतमात्मानं ज्ञातुं नान्यत्प्रमाणमपेक्षत इति निश्चेतव्यम्। आत्मनि कल्पितस्य अनात्मनः, तद्धर्माणां च प्रतिषेधपरेण शास्त्रेण प्रमाणेन आत्मा निर्विशेषचिन्मात्र एवेत्यवगन्तव्यः। एष एव

आत्मसाक्षात्कारः- इति ।

(इ)शास्त्रप्रामाण्यम्

एवम्, आत्मन्यविद्यमानानां धर्माणां निवर्तनमात्रेण शास्त्रमात्मविषये प्रमाणमित्युच्यते । केचित्तु शास्त्रं तु विधिपरं तच्च ज्ञानिनमपि विधिना नियोजयतीति मन्यन्ते । तन्न समीचीनम् । यतः शास्त्रं जीवस्य परमार्थस्वरूपं परमात्मैवेति बोधयति । परमात्मन एवोत्पन्नं सत् शास्त्रं परमात्मानमेव कर्मणि नियोजयतीत्यनुपपन्नम् । मीमांसकमतानुसारेण शास्त्रस्य नित्यत्व-पक्षेऽपि एकस्मिन्नेव पुरुषे कर्तृत्वमकर्तृत्वं च बोधयतीति शास्त्रस्य विरुद्धार्थबोधकत्वमापद्यते । तस्मात् ज्ञानोपदेशानन्तरं कर्माणि विधत्ते शास्त्रमिति तु असमीचीनम् । शारीरस्य परमात्मस्वरूपत्वमेवेति शास्त्रेणोप-दिश्यमानत्वात्, तेनोपदेशेन जायमानस्य विज्ञानस्याबाध्यमानत्वाच्च शास्त्रप्रामाण्यस्य न कापि हानिरिति - इत्येवं शास्त्रप्रामाण्यं भाष्यकारैरुपपादितमत्र ।

(ई) महावाक्यम्

विज्ञानात्मपरमात्मैक्यबोधकवाक्यानां महावाक्यानीत्यभिधान-मर्वाचीनवेदान्तग्रन्थेषु रूढम् । यद्यपि महावाक्यशब्दोऽस्मिन्नुपनिषद्भाष्य एकत्र (भा.भा. ५७ 'वेदान्तमहावाक्यभेर्याम्' इत्यत्र) उपलभ्यते क्वचित् कोशेषु । तथापि तत्र 'महाभेर्याम्' इति पाठान्तरस्य विद्यमानत्वात्, इतरेषु भाष्येषु कुत्रचिदपि महावाक्यशब्दस्यानुपलभ्यमानत्वाच्चायं शब्द आचार्यैः पारिभाषिकत्वेनाभिप्रेत इत्यत्राधारो नोपलभ्यते । परन्तु, आत्मैकत्वबोधन

एवोपनिषदां महत्तात्पर्यमिति स्थिते, एतादृशवाक्यानां महावाक्यानीत्याख्या न दोषाय। किं तु एकैकस्य वेदस्य एकैकमिति 'तत्त्वमसि', 'अहं ब्रह्मास्मि', 'अयमात्मा ब्रह्म', 'प्रज्ञानं ब्रह्म' इत्येवं चत्वार्येव महावाक्यानीति केषांचित्कल्पनं न साध्वित्येव वक्तव्यम्। प्रत्येकमुपनिषद्यात्मैकत्वं बोधितम्। तादृशाभिप्रायबोधकवाक्यानां सर्वेषामपि महावाक्यानीत्यभिधानं स्थाने एव। महावाक्यानि मन्त्ररूपाणि इति भावयित्वा जपार्थं विनियोक्तव्यानीत्यपि केचनेदानींतना अभिप्रयन्ति। न ह्येतस्याभिप्रायस्य प्रमाणमाचार्याणां भाष्येषु, प्रधानासूपनिषत्सु वोपलभ्यते।

किं च, अस्ति व्याख्यानकारेषु मध्ये द्विधा भिन्नाभिप्रायः- ज्ञानस्य किं महावाक्यं करणम्, आहोस्विदन्तःकरणं करणमिति विषये। न ह्याचार्यभाष्येष्विदं विषयचिन्तनं गौरवं वहति। यतो वाक्यस्य साहाय्यमन्तरेण केवलेनान्तःकरणेन वा, अन्तःकरणस्य संबन्धं विना केवलेन वाक्येन वा ज्ञानमुत्पद्यत इति न वक्तुं शक्यते। 'शास्त्राचार्यसंस्कृतं मनः करणम्', 'शास्त्रमेव प्रमाणं श्रवणमनन-निधिध्यासनैर्युक्तम्' इत्यादिवाक्यानामाकारमात्रेण भेदो, न तु तात्पर्येण। तस्मात्, 'शास्त्रयोनित्वात् (ब्र.सू. १-१-३)' इति बादरायणसूत्रम्, बहुवाद्यभ्युपगमं चानुसृत्य वाक्यं ब्रह्मात्मज्ञानाय करणमित्यास्थातुं क्लेशो नास्ति।

भाष्यस्य व्याख्यानकारः

अत्यावश्यकं चात्र वक्तव्यमस्ति किञ्चित् आनन्दगिरिमस्योपनिषद्भाष्यस्य व्याख्यानकारमधिकृत्य। अस्ति चास्मासु बहुषु विश्वासः

आनन्दगिरिः श्रीशङ्कराचार्याणां साक्षाच्छिष्य इति। मुद्रितं चास्ति पुष्पिकावचनम् आनन्दाश्रममुद्रणालयप्रकाशिते ग्रन्थे 'इति श्रीमद्भगवत्पूज्यपादशिष्यश्रीमदानन्दज्ञानकृतावैतरेयोपनिषद्भाष्यटीकायां द्वितियोऽध्यायः' इति। यद्यप्येवम्, तथापि आनन्दगिरिकृतत्वेन प्रख्याताः सर्वा अपि टीकाः नैकस्यैव पुरुषस्य कृतिरिति केनकाठकाद्युपनिषद्भाष्याणां (अध्यात्म-प्रकाशकार्यालयेन मुद्रितानाम्) भूमिकासु दर्शितं मया। ऐतरेयोपनिषद्भाष्यस्य टीकाकारः सायणाचार्यस्य दीपिकामुदाहृत्य (आनन्दाश्रमेण १९८० ख्रिस्ताब्दे मुद्रिते पुस्तके - पृ. २५,२७,२८,४२) क्वचित् स्थलेषु सम्मतिमपरत्र क्वचित् स्वस्याभिप्रायं च दर्शयति। इयं टीका अभिनवनारायणेन्द्रसरस्वतिना विरचितेति काश्मीरस्थरघुनाथदेवालयस्य हस्तलिखितमातृकासु विद्यत इति 'आनन्दगिरिकृततर्कसंग्रहः' इति ग्रन्थे (Gaikwad's Oriental Series) आङ्ग्लभूमिकायामुल्लिखितम्। प्रश्नोपनिषद्भाष्यटीकाकारोप्ययमेव अभिनवनारायणेन्द्रसरस्वतीति आनन्दाश्रममुद्रणालये विद्यमानासु कासुचिद्धस्तलिखितमातृकासु प्रमाणमुपलभ्यते। अस्यां प्रश्नोपनिषद्भाष्यटीकायां शङ्करानन्दस्य उपनिषद्दीपिका उदाहृता। एतेनायं टीकाकारः श्रीशङ्कराचार्येभ्योऽत्यन्तमर्वाचीन इति स्पष्टम्। भाष्यस्य टीकाकार आनन्दगिर्याख्य एकैव पुरुष इति, स च आनन्दगिरिः श्रीशङ्कराचार्यस्य साक्षाच्छिष्य इति च भ्रान्त्याभ्युपगमेन भाष्यस्य तात्पर्यनिर्णयार्थं टीकाया एव केवलायाः साहाय्यत्वेनावलम्बनं दोषावहमित्यत्र ऐतरेयोपनिषद्भाष्यमेव पर्याप्तं प्रमाणम्। यतो नास्त्यत्राभावः सन्दर्भाणां यत्रायं व्याख्यानकारो भाष्ये पाठान्तरं प्रकल्प्यार्थविवरणेन भाष्यप्रक्रियामेव विपर्यस्तामकरोत्। क्वचित्स्थलेषु

तेन दर्शिता युक्तयो भाष्यव्याख्याश्चातिश्लाघनीया वर्तन्ते। क्वचित्स्थलेषु तु मार्गात्कात्स्न्र्येन प्रच्याव्य नीचमुखेन पतनमेव फलितम्। यत्र यत्र तस्याभिप्रायो न मम संमतस्तत्र तत्र टिप्पण्यां सूचितवानस्मि (प्रश्नचिह्न द्वयं यत्र सूचितं तत्र पूर्णतया भाष्यबाह्यं युक्तिबाह्यं चेत्यर्थो गाह्यः)। अनेन किंकारणमहमेकान्तेन टीकामेव नानुसृतवान् यथान्येऽनुवादका इति वाचकानां स्पष्टमिति विश्वसिमि। तथापि मम भाष्यानुवादः प्रस्थानत्रयभाष्यप्रक्रियां पादमात्रेणापि त्यक्त्वान्यत्रेतस्ततो न गच्छेदिति जागरूकता आस्थिता।

भाष्यस्य भाषान्तरानुवादः

अस्या उपनिषदो भाषान्तरानुवादः ईशकेनकाठकानामिव श्रीजय-चामराजेन्द्रग्रन्थरत्नमालाया अनुरूपमेव गीर्वाणभाष्यमूलसमेतो रचितः। अनुवादार्थं यद्यपि आनन्दाश्रममुद्रितग्रन्थः प्रधानाधारत्वेन गृहीतः, तथापि वाणीविलासः श्रीरङ्गम्, वेदन्तविद्याविलासः मद्रास् इत्यादिभिर्मुद्रितप्रतयोऽपि तुलनार्थं स्वीकृताः। अनुवादकार्येऽस्मिन् यद्यपि न केवलस्य व्याख्यानस्य, किं तु त्रयाणामाङ्ग्लानुवादानामपि (Shri R.G.Bhadkamkar, Shri D.Venkataramaiah, Shri V.C.Sheshachari महोदयैः कृताः) साहाय्यं स्वीकृतम्, तथापि शाङ्करसिद्धान्तस्यानुगुण्यो योऽर्थः प्रस्थानत्रय-भाष्यानुगुणेनावगतः तमेवानुसृत्य स्वतन्त्रतया कन्नडीकृतमित्यतोऽस्या-नुवादस्याहमेव प्रतिभूः। पाठान्तरैः शब्दस्खालित्यैश्च युक्तत्वाद्दुरवगाह्यत्वेन भासमानस्य भाष्यार्थस्यार्थावगमाय अयमनुवादो जिज्ञासूनामल्पेनापि साहाय्यं करोति चेत् कृतकृत्यः स्याम्। परमेश्वरकृपया अस्यारण्यकस्या-तीताध्यायत्रयस्य भाष्यस्य प्रकाशनसुयोगो यदि भविष्यति, तर्हीतोऽपि

कांश्चन विचारान् तत्र भूमिकायां प्रस्तोष्यामि। अस्यानुवादस्य श्रैष्ठ्यतापादनार्थमनुकूलाः सूचनाः प्रेषयितॄणां गुणज्ञानामधमर्णो भूत्वा पुनर्मुद्रणावसरे तेषामुपकृतिं लिप्से।

सच्चिदानन्देन्द्रसरस्वतीभिक्षुः

[य.सुब्रह्मण्यशर्मा इति पूर्वाश्रमनाम्ना १९३० शकाब्दे कन्नडभाषया प्रकाशितायाः भूमिकायाः भाषान्तरानुवादः। संस्कृतभाषया अनुवादकर्ता ब्र.श्री. अश्वत्थनारायणः अवधानी. मत्तूरु.]

विषयानुक्रमणिका

अवतरणिकाभाष्यम्

अथ प्रथमाध्याये प्रथमः खण्डः

(लोकलोकपालानां सृष्टिः)

प्रथमाध्याये द्वितीयः खण्डः

(देवतानां संसारबन्धः)

सङ्केताक्षराणां विवरणम्

(ईशकेनकाठकाद्युपनिषदामिवात्रापि उपनिषदां भगवद्गीतानां च परामर्शः तेषां प्रथमाक्षरेण तत्तद्भाष्याणां 'भा. इत्यक्षरयोजनेन कृतः। केषांचिदेव सङ्केताक्षराणां विवरणमत्र दीयते।)

आ.।।	आनन्दाश्रममुद्रितपुस्तकस्य पाठः आनन्दज्ञानस्य व्याख्यानम्
आ.ध.	आपस्तम्बधर्मसूत्रम्
उप.सा.	उपदेशसाहस्री
ऋ.	ऋग्वेदः
ऐ.आ	ऐतरेयारण्यकम्
ऐ.ब्रा.	ऐतरेयब्राह्मणम्
का.।।	काशीस्थद्दितचिन्तकमुद्रणालयमुद्रितपुस्तकस्य पाठः
कौ.	कौषीतकिब्राह्मणोपनिषत्
गी.	श्रीमद्भगवद्गीता, गोरखपुरस्थगीताप्रेसमुद्रितपुस्तकस्य पाठः
गौ.ध.	गौतमधर्मसूत्रम्
तं.वा.	तन्त्रवार्तिकम्, आनन्दाश्रममुद्रणालयपुस्तकम्
तै.सं.	तैत्तिरीयसंहिता
तै.ना.	तैत्तिरीयके नारायणोपनिषत्
न्या.सू.	न्यायशास्त्रसूत्राणि
ब्र.सू.	ब्रह्मसूत्राणि
भा.भा.	भाष्यभागः, अस्योपनिषद्भाष्यस्य प्रघट्टस्य संख्या
मां.का.	माण्डूक्योपनिषद विवरणात्मकाः कारिकाः श्रीगौडपादाचार्यैः कृताः
वा.।।	श्रीरङ्गस्थवाणीविलासमुद्रणालयपुस्तकस्य पाठः
वि.पु.	विष्णुपुराणम्
वे.वि.	मद्रासस्थवेदान्तविद्याविलासमुद्रित पुरस्तकस्य पाठः
वै.सू.	वैशेषिकसूत्राणि
सू.भा.	सूत्रभाष्यम्, ब्रह्मसूत्राणां श्रीशङ्कराचार्यकृतं भाष्यम्

ऐतरेयोपनिषत्

(ऐतरेयद्वितीयारण्यके अध्यायाः ४,५,६)

अवतरणिकाभाष्यम्

पूर्वग्रन्थेन अस्य उपनिषद्भागस्य संबन्धः[1]

१. परिसमाप्तं कर्म सहापरब्रह्मविषयविज्ञानेन[2] | सैषा कर्मणो ज्ञानसहितस्य परा गतिः उक्थविज्ञानद्वारेण[3] उपसंहृता | *एतत् सत्यं ब्रह्म प्राणाख्यम्* (ऐ.आ.२-१-५) *एष एको देवः, एतस्यैव प्राणस्य सर्वे देवा विभूतयः* (ऐ.आ.२-१-७) *एतस्य प्राणस्य आत्मभावं गच्छन् देवता अप्येति* (ऐ.आ.२-२-४) इत्युक्तम्[4] ||

२.सोऽयं देवताप्ययलक्षणः परः पुरुषार्थः | एष मोक्षः | स चायं यथोक्तेन ज्ञानकर्मसमुच्चयेन साधनेन प्राप्तव्यः | नातः परमस्ति - इत्येके[5] प्रतिपन्नाः | तान् निराचिकीर्षुः उत्तरं केवलात्मज्ञानविधानार्थम् *आत्मा वा*

---

1. ऋग्वेदस्य संहिता, ब्राह्मणम्, आरण्यकस्य प्रथमो भागः, आरण्यकस्य द्वितीयभागस्य अध्यायत्रयम्- इत्येतत् सर्वम् अस्य ग्रन्थस्य पूर्वभागः | अत्र तु द्वितीयारण्यकस्य अध्यायत्रयमेव प्राधान्येन स्वीकृत्य संबन्धः उक्तः | भूमिका द्रष्टव्या ||

2. उपासनासहितेन | 3. द्वितीयारण्यकस्य प्रथमाध्यायस्य द्वितीयखण्डप्रभृति तृतीयाध्यायपर्यन्तमुक्थविचार एव विद्यते | उक्थं नाम स्तोत्रार्थमुपयुज्यमानः सूक्तविशेषः | ईदृशं सूक्तं शस्त्रमिति कथयन्ति याज्ञिकाः |

4. श्रुत्यर्थोऽत्रोदाहृतः | मूलं तु *'तत्सत्यं सदिति प्राणस्तीत्यन्नम्'* (ऐ.आ.२-१-५) *'अथातो विभूतयोऽस्य पुरुषस्य'* (ऐ.आ. २-१-७) *'संभूय देवता अप्येति य एवं वेद'* (ऐ.आ.२-२-४) इति ||

5. ज्ञानकर्मसमुच्चयवादिनः |

इदम् (१-१.ऐ.आ.२-४-१) इत्याद्याह[1] ॥

३. कथं पुनरकर्मसम्बन्धिकेवलात्मविज्ञानविधानार्थ उत्तरो ग्रन्थ इति गम्यते? अन्यार्थानवगमात् । तथा च पूर्वोक्तानां[2] देवतानाम् अग्न्यादीनां संसारित्वं दर्शयिष्यति अशनायादिदोषवत्त्वेन *तमशनायापिपासाभ्या-मन्ववार्जत्* (१-२.ऐ.आ.२-४-२) इत्यादिना । अशनायादिमत् सर्वं संसार[3] एव । परस्य तु ब्रह्मणोऽशनायाद्यत्ययश्रुतेः[4] ॥

समुच्चयवादिनां पूर्वपक्षः

(अ)कर्मिण एवात्मज्ञानेऽधिकारः

४. भवत्वेवं केवलात्मज्ञानं मोक्षसाधनम् । न त्वत्र अकर्म्येवा-धिक्रियते । विशेषाश्रवणात् । अकर्मिण आश्रम्यन्तरस्येहाश्रवणात् । कर्म च बृहतीसहस्रलक्षणं[5] प्रस्तुत्य अनन्तरमेवात्मज्ञानं प्रारभ्यते । तस्मात्

---

1. अत्र पूर्वसंख्यानिर्देश उपनिषद्गताध्यायखण्डयोः, अपर आरण्यकाऽध्याय-खण्डानाम् । एवमेवोदर्केऽपीति ज्ञेयम् ।

2 ऐ.आ.२-१-७ प्रभृति उक्तानां विभूतिरूपाणां देवतानामशनायादिसंसार-दोषवत्त्वस्योक्तत्वात् देवताप्यय एव परमपुरुषार्थ इति पक्षो न समीचीन इत्यर्थः ।

3. *'संसारे'* इति सप्तमीपाठस्वीकारे संसारान्ते वर्तते इत्यर्थो भवति ॥

4. *ब्रह्मणोऽशनायाद्यत्ययः* इति विसर्गयुक्तः पाठश्चेत् 'परब्रह्म केवलमशनायाद्यतीत्य वर्तते, यतः श्रुतेः' इत्यर्थः कल्पनीयः । अत्रोदाहृता श्रुतिः बृ.३-५-१ ।

5. बृहतीसहस्राख्ये शस्त्रे षट्त्रिंशत्सहस्राणि अक्षराणि भवन्ति । महाव्रताख्ये कर्मणि निष्केवल्यमिति शस्त्रं विद्यते । तस्य शस्त्रस्य पक्षिरूपकल्पनया पक्षिणः शस्त्रस्य च दशभिरवयवैः सामान्यमुक्त्वा भागशः अनेकानि सूक्तानि विनियुक्तानि । तानि

कर्म्येव[1] अधिक्रियते ॥

(आ)आत्मज्ञानं कर्मसम्बन्धि एव

५. न च कर्मासम्बन्धि आत्मविज्ञानम्[2] । पूर्ववदन्ते[3] उपसंहारात् । यथा कर्मसम्बन्धिनः पुरुषस्य सूर्यात्मनः[4] स्थावरजङ्गमादिसर्वप्राण्यात्मत्वमुक्तं ब्राह्मणेन मन्त्रेण[5] च *सूर्य आत्मा* (ए.आ.२-२-४) इत्यादिना, तथैव *एष ब्रह्मैष इन्द्रः* (३-१,ऐ.आ.२-६-१)इत्याद्युपक्रम्य सर्वप्राण्यात्मत्वम् *यच्च स्थावरं सर्वं तत् प्रज्ञानेत्रम्* (३-१, ऐ.आ.२-६-१)

सूक्तानि यद्यपि नानाछन्दस्कानि, तथापि षट्त्रिंशदक्षरा एका बृहती इति गण्यमाने सर्वेषामक्षराणामाहत्य एकसहस्रं बृहत्यः सम्पन्ना भवन्ति, ऐ.आ.२-२-३ इत्यस्य सायणभाष्यं द्रष्टव्यम् ।

1. प्रथमं न अकर्म्येव केवलोऽधिकारीत्युक्तम् । इदानीमकर्म्यप्यधिकारीति अभ्युपगतं परित्यज्य कर्म्येवाधिकारीत्युच्यते ॥ 2. प्रथमं ज्ञानं कर्मरहितमपि स्यादिति पक्षोऽभ्युपगतः । इदानीं तमङ्गीकारं परित्यज्य ज्ञानकर्मसमुच्चय एव भवेदिति पूर्वपक्षिवादः ।
3. पूर्वस्मिन् आरण्यके कर्मसंबद्धम् आत्मानमुक्त्वा तस्यैव सर्वात्मत्वं यथा प्रतिपादितम्, तथैव अत्रापि प्रतिपादितम् । अतोऽत्रापि कर्मसंबद्धस्य आत्मनो ज्ञानं वर्तत इत्येव युक्तम् ॥ 4. प्राणः सूर्यात्मा, स च सूर्यात्मा सर्वात्मा इति च २-२-१ इत्यत्रोक्तम् । सोऽयं पुरुषः उक्थेन संबद्ध इत्यतः कर्मसंबद्ध एव ।
5. आरण्यके न केवलं प्राणस्य सूर्यात्मत्वं सर्वात्मत्वं चोक्तम्, किं तु ऋक्संहितामन्त्रश्च (१-११५-१) २-२-४ इत्यत्रोदाहृतः । स च मन्त्रः कर्मणा संबद्धः । एवमेवात्रापि सर्वात्मत्वमुदाहृतम् । अतो ब्रह्मेन्द्रादिसर्वभूतानामात्मेति अस्यामुपनिषदि यदुक्तं तत् कर्मसंबद्धस्य आत्मनो ज्ञानमेवेत्यभिप्रायः ।

इत्युपसंहरिष्यति। तथा च संहितोपनिषदि[1] *एतं ह्येव बह्वृचा*[2] *महत्युक्थे मीमांसन्ते* (ऐ.आ.३-२-३) इत्यादिना कर्मसम्बन्धित्वमुक्त्वा *सर्वेषु भूतेष्वेतमेव ब्रह्मेत्याचक्षते* (ऐ.आ.३-२-३) इत्युपसंहरति। तथा तस्यैव *योऽयमशरीरः प्रज्ञात्मा* (ऐ.आ.३-२-३) इत्युक्तस्य *यश्चासावादित्य एकमेव तदिति विद्यात्* (ऐ.आ.३-२-३) इत्येकत्वमुक्तम्[3]। इहापि *कोऽयमात्मा* (३-१,ऐ.आ.२-६-१) इत्युपक्रम्य प्रज्ञात्मत्वमेव[4] *प्रज्ञानं ब्रह्म* (३-१,ऐ.आ.२-६-१)इति दर्शयिष्यति।तस्मात् नाकर्मसम्बन्धि आत्मविज्ञानम्॥

(इ)अतीतारण्यकभागस्य अस्य उपनिषद्भागस्य च वैषम्यम्

६. पुनरुक्त्यानर्थक्यमिति चेत्। कथम्? *प्राणो वा अहमस्म्यृषे*[5] (ऐ.आ.२-२-३) इत्यादिब्राह्मणेन *सूर्य आत्मा* (ऐ.आ.२-२-४) इति च मन्त्रेण निर्धारितस्य आत्मनः *आत्मा वा इदम्* (१-१, ऐ.आ.२-४-१)

---

1. अस्या उपनिषदोऽनन्तरं संहितोपनिषत् वर्तते॥
2. यज्ञे बह्वीनाम् ऋचामुपयोक्तारो होतारः, ऋग्वेदिनः।
3. प्रज्ञात्मा प्राण एव जीवे आदित्ये च स्थित इति ऐक्यं संहितोपनिषदि उक्तम्।
4. ब्रह्मेन्द्रादिषु, सर्वभूतेषु च स्थितः प्रज्ञात्मा एवेत्यत्राप्युक्तम्। आरण्यकस्य पूर्वोत्तरभागेष्वपि कर्मसंबन्ध्यात्मन एव प्रतिपादितत्वाच्च अत्रोक्तमात्मस्वरूपं तदेवेत्यत इहापि कर्मसंबद्ध आत्मैवोक्त इति युक्तमिति समुच्चयवादिनोऽभिप्रायः।
5. इदं विश्वामित्राय इन्द्रेणोक्तं वचनम्। अहम्, त्वम्, सूर्यः, सर्वाणि भूतानि इत्येतत्सर्वं सूर्यात्मा प्राण एवेत्यस्मिन्वाक्य उक्तम्।

इत्यादिब्राह्मणेन[1] *कोऽयमात्मा* (३-१, ऐ.आ.२-६-१) इति प्रश्नपूर्वकं पुनर्निर्धारणं पुनरुक्तमनर्थकमिति[2] चेत्। न। तस्यैव[3] धर्मान्तरविशेष-निर्धारणार्थत्वात् न पुनरुक्ततादोषः। कथम्? तस्यैव कर्मसम्बन्धिनो जगत्सृष्टिस्थितिसंहारादिधर्मविशेषनिर्धारणार्थत्वात्[4]। केवलोपास्त्य-र्थत्वाद्वा। अथवा, *आत्मा* (१-१, ऐ.आ.२-४-१) इत्यादिः परो ग्रन्थसन्दर्भः आत्मनः कर्मिणः कर्मणोऽन्यत्र उपासनाप्राप्तौ कर्म-प्रस्तावेऽविहितत्वात्[5] केवलोऽप्यात्मा उपास्यः[6] इत्येवमर्थः। भेदा-भेदोपास्यत्वाद्वा। एक एवात्मा कर्मविषये भेददृष्टिभाक्। स एव

1. मन्त्रः, ब्राह्मणम्-इति द्विधैव वेदो विभक्तः। एषोपनिषत् ऐतरेयारण्यकाख्ये ब्राह्मणभागे वर्तते।

2. सूर्यात्मा प्राण एव सर्वात्मा-इति अतीतारण्यकभागे विद्यमाने सति स एव विषय उपनिषद्यपि प्रतिपाद्यतेचेत् उपनिषद्भागस्य पौनरुक्त्यं भवेत्। अतोऽयं कर्मासंबन्धिनो निर्विशेषात्मनो विचार इति सिद्धान्तिनः शङ्कां परिकल्प्य पूर्वपक्षी तामग्रे परिहरति।

3. सविशेषस्य प्राणात्मनः॥ 4. न ह्यतीते ग्रन्थभाग आत्मकर्तृकं सृष्ट्यादि-कर्मोक्तम्। तत्प्रतिपादनार्थमितरविषयाणामनुवादः कृत इत्यतो न पुनरुक्तिदोष इति भावः॥ 5. अतीत आरण्यके महाव्रतनाम्नः कर्मणः प्रस्ताव उक्थविज्ञानस्य विहितत्वात् तदुपासनं कर्मणा सहैवानुष्ठेयम्। इह पुनः कर्मप्रस्तावं विनैवोक्तत्वात् केवलमप्युपासनं कर्तुं शक्यमित्युक्तमिति प्राप्तम्। उपास्यः सविशेषं आत्मा तु प्राणात्मा एव इति भावः। 'कर्मप्रस्तावे विहितत्वात्' इति पदच्छेदं कृत्वा पूर्वेणान्वये कृतेऽप्येषोऽर्थो लभ्यते॥ 6. अद्वैतदृष्टिः कर्तृत्वबुद्धियुक्तेन कर्मणा विरुध्यते इति सिद्धान्ती मन्येत। किन्तु कर्माकरणकाले परमेश्वरो मम आत्मैवेत्युपासितुं न किमपि बाधकमस्ति - इति पूर्वपक्ष्याशयः।

अकर्मकाले अभेदेनाप्युपास्यः इति । एवम् अपुनरुक्तता[1] ॥

(ई)कर्मज्ञानसमुच्चय एव श्रुतिविहितः

७. *विद्यां चाविद्यां च यस्तद्वेदोभयं सह । अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते* (ई.११), *कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः* (ई.२) इति च[2] वाजिनाम् । न च वर्षशतात् परम् आयुर्मर्त्यानाम्, येन कर्मपरित्यागेन आत्मानमुपासीत । दर्शितं च *तावन्ति पुरुषायुषोऽह्नां सहस्राणि भवन्ति*[3] (ऐ.आ.२-३-८) इति । वर्षशतं च आयुः कर्मणैव व्याप्तम् । दर्शितश्च मन्त्रः *कुर्वन्नेवेह कर्माणि* (ई.२) इत्यादिः । तथा *यावज्जीवमग्निहोत्रं जुहोति* (?) *यावज्जीवं दर्शपूर्णमासाभ्यां यजेत* (?) इत्याद्याश्च । *तं*

1. अतीत आरण्यके उक्तः प्राणाख्य आत्मैवात्राप्युच्यत इति वक्तुमुभयत्रापि समानोपसंहार इति लिङ्गं दर्शितम् । एवं तर्ह्युभयत्र समानविषयत्वमिति पुनरुक्तिदोषः प्रसज्यत इत्याक्षेपस्य परिहारत्रयं दर्शयति पूर्वपक्षी । समानविषयस्यानुवादत्वं भवतु; किन्तु सृष्ट्यादिधर्मकथनम्, केवलात्मोपासनाकथनम्, अथवा अभेदोपासनाकथनमिति उपनिषदोऽपूर्वविषया इति पूर्वपक्ष्यभिप्रायः । पक्षत्रयेऽपि कर्म्येवोपासनायामधिकृतः । द्वितीयतृतीयपक्षयोः कर्माकरणकाल उपासना कर्तव्येति पूर्वपक्षसारः ।

2. एताः श्रुतयः समुच्चयप्रतिपादनपरा इति पूर्वपक्ष्याशयः ।

3. बृहतीसहस्रस्य षट्त्रिंशत्सहस्राण्यक्षराणि भवन्ति । पुरुषायुषः शतानां वर्षाणां तावन्त्येव दिनानि भवन्ति । तस्मात् अक्षरगतेषु तावत्संख्याकेषु व्यञ्जनेषु तावत्संख्याकरात्रिदृष्टिं कुर्यात् । तथा स्वरेष्वहर्दृष्टिं कुर्यात् । अनेन प्राणदेवतामप्येति (ऐ.आ.२-२-४), बृहतीसहस्रगतानामक्षराणां मध्येऽनुगतेन अकाराख्येन जीवाक्षरेण महाव्रताख्यं जीवाहः प्राप्नोति (ऐ.आ.२-३-८) इति पूर्वत्रोक्तम् । पुरुषायुः शतं वर्षाण्येव । तानि सर्वाण्यपि कर्मणा युक्तान्येवेत्यस्येदं प्रमाणमिति भावः ।

यज्ञपात्रैर्दहन्ति (?) इति च। ऋणत्रयश्रुतेश्च[1] । तत्र पारिव्राज्यादिशास्त्रं *व्युत्थायाथ भिक्षाचर्यं चरन्ति* (बृ.३-५-१) इत्यात्मज्ञानस्तुति-परोऽर्थवादो[2]ऽनधिकृतार्थो[3] वा ॥

सिद्धान्तः (अ)ज्ञानिनः कर्मणः प्रयोजनं नास्ति।

८. न। परमार्थात्म[4]विज्ञाने फलादर्शने क्रियानुपपत्तेः। यदुक्तं "कर्मिण एव चात्मविज्ञानं कर्मसम्बन्धि च" इत्यादि, तन्न। 'परं ह्याप्तकामं सर्वसंसारदोषवर्जितं ब्रह्माहमस्मि' इत्यात्मत्वेन विज्ञाते[5] कृतेन कर्तव्येन वा प्रयोजनम् आत्मनोऽपश्यतः फलादर्शने[6] क्रिया नोपपद्यते ॥

(आ) ज्ञानिनः श्रुतिनियोगोऽपि नास्ति

९. फलादर्शनेऽपि नियुक्तत्वात्[7] करोति-इति चेत्। न। नियोगा-विषयात्मदर्शनात्। इष्टयोगमनिष्टवियोगं चात्मनः प्रयोजनं पश्यन् तदुपायार्थी यो भवति स नियोगस्य विषयो दृष्टो लोके, न तु तद्विपरीतनियोगाविषयब्रह्मा-

---

1. तै.सं.६-३-१०-५ इत्यत्र जायमानाः सर्व ऋणत्रयेणैव जायन्त इत्युक्तम्। ऋणत्रयापाकरणाय कर्म कर्तव्यम्।

2. कर्म त्यक्त्वापि ज्ञानं सम्पादयेदिति ज्ञानस्य स्तुतिरेषा न तु कर्म त्यक्तव्यमिति विहितमिति भावः ॥ 3. कर्मानुष्ठानेऽनधिकृतानामन्धपङ्गुमूकबधिरादीनां संन्यासो विहित इति तन्त्रवार्तिकम्-१-३-२ ॥ 4. अयं वा.॥ 5. अयं वा. ॥

6. क्रियाकारकफलभेदरहितं ब्रह्मैवाहमस्मीति ज्ञाने फलविषयं ज्ञानं न भवति। फलरहितं कर्म प्राकृता अपि न चिकीर्षन्ति इति भावः।

7. श्रुतौ विधिवाक्यानि एवं कर्तव्यमिति अधिकारिणः नियोजयन्ति इति नियोगवादिनां मीमांसकानां मतम्।

त्मत्वदर्शी । ब्रह्मात्मत्वदर्श्यपि संश्चेन्नियुज्येत नियोगाविषयोऽपि[1] सन् न कश्चिन्न नियुक्त इति सर्वं कर्म सर्वेण सर्वदा कर्तव्यं प्राप्नोति[2] । तच्चानिष्टम् ॥

१०. न च स नियोक्तुम् शक्यते केनचित् । आम्नायस्यापि तत्प्रभवत्वात्[3] । न हि स्वविज्ञानोत्थेन वचसा स्वयं नियुज्यते । नापि बहुवित् स्वामी अविवेकिना भृत्येन । आम्नायस्य नित्यत्वे सति स्वातन्त्र्यात्[4] सर्वान् प्रति नियोक्तृत्वसामर्थ्यम् इति चेत् । न । उक्तदोषात् । तथापि[5] सर्वेण सर्वदा सर्वम् अविशिष्टं कर्म कर्तव्यम् इत्युक्तो दोषो अपरिहार्य एव ॥

(इ) शास्त्रं विरुद्धार्थं न बोधयेत्

११. तदपि शास्त्रेणैव विधीयते इति चेत् । यथा कर्मकर्तव्यता

---

1. फलेच्छाभावात् ज्ञानी कर्मणि न प्रवर्तते । अतः स श्रुतिनियोगस्याविषयः ।

2. गृहस्थमुद्दिश्य विहितं कर्म ब्रह्मचारिणापि कार्यमिति भवेत् । ब्राह्मणविहितं कर्म क्षत्रियेणापि कार्यं भवेत् । नियोगवादीनोऽप्येतन्नेष्टम् ।

3. वेदः परमात्मनो निश्श्वास इति श्रुतिः (बृ.२-४-१०) । परमात्मैवाहमस्मीति यो जानाति स कथं वेदकिङ्करो भवेदिति भावः ।

4. वेद ईश्वरोक्त इति नैयायिकानां मतम् । तदनुसारेण पूर्वपक्षे दोषो दर्शितः । परन्तु वेदो नित्योऽपौरुषेयश्चेति मीमांसकानुयायिनां पक्षे को दोष इति पूर्वपक्षिणो भावः ।

5. वेदः फलप्राप्त्युपायमात्रं ज्ञापयति न तु कमपि पुरुषमेवं कुरु इति नियोजयति । नियोजयतीत्यङ्गीकृतेऽपि पूर्वपक्षिमते दोषोऽस्त्येवेति भावः ।

शास्त्रेण कृता तथा तदप्यात्मज्ञानं तस्यैव कर्मिणः शास्त्रेण विधीयते इति चेत्। न। विरुद्धार्थबोधकत्वानुपपत्तेः[1]। न ह्येकस्मिन् कृताकृत-[2] सम्बन्धित्वं तद्विपरीतत्वं[3] च बोधयितुं शक्यम्। शीतोष्णतामिवाग्नेः। न च इष्टयोगचिकीर्षा आत्मनोऽनिष्टवियोगचिकीर्षा च शास्त्रकृता। सर्वप्राणिनां तद्दर्शनात्। शास्त्रकृतं चेत्[4] तदुभयं गोपालादीनां न दृश्येत। अशास्त्रज्ञत्वात् तेषाम्। यद्धि स्वतोऽप्राप्तं तच्छास्त्रेण बोधयितव्यम्[5]। तच्चेत् कृतकर्तव्यताविरोध्यात्मज्ञानं शास्त्रेण कृतं कथं तद्विरुद्धां कर्तव्यतां पुनरुत्पादयेत् शीततामिवाग्नौ तम इव च भानौ?

(ई) शास्त्रमकर्त्रात्मज्ञानं न बोधयतीत्यपि न सम्यक्

१२. न बोधयत्येवेति[6] चेत्। न। *स म आत्मेति विद्यात्* (ऐ.आ.

---

1. विरुद्धार्थबोधकत्वे शास्त्रमप्रमाणं स्यात्। अतः पूर्वपक्षिणा यदुक्तं न स शास्त्रार्थः। गी.भा.१८-६६ इत्यत्रस्थम् 'न हि श्रुतिशतमपि' इति वाक्यमत्रानुसन्धेयम्।

2. अग्रे करिष्यमाणस्येत्यर्थः॥ 3. अकर्तृस्वरूपत्वम्।

4. न हि शास्त्रं कर्म कर्तव्यमेवेति बोधयति। फलप्रेप्सूनां फलप्राप्त्युपायभूतं कर्म बोधयति। इच्छा तु स्वाभाविकी। अतः शास्त्रं कर्म बोधयति इत्येतावता कर्तृत्वं वास्तविकं भवेदिति वादो न साधुः।

5. यद्धि स्वतः प्राप्तं, ज्ञातं वा न तच्छास्त्रेण ज्ञाप्यम्। छां.भा.२-२३-१ इत्यत्र 'तच्च निमित्तं न शास्त्रकृतम्' इति वाक्यम्, बृ.भा.३-३-१ इत्यस्यावतरणिकायाम् 'न च प्रमाणान्तरविरुद्धार्थविषये' इति वाक्यं च द्रष्टव्यम्।

6. शास्त्रमकर्तृस्वरूपं ब्रह्मैवात्मेति न बोधयति। कर्मसंबन्ध्यात्मन उपासनं केवलं बोधयतीति भावः।

३-२-४) इति *प्रज्ञानं ब्रह्म* (३-१,ऐ.आ.२-६-१) इति चोपसंहारात्। *तदात्मानमेवावेत्* (बृ.१-४-१०) *तत्त्वमसि* (छां.६-८-७) इत्येवमादि-वाक्यानां तत्परत्वात् उत्पन्नस्य च ब्रह्मात्मविज्ञानस्य अबाध्यमानत्वात् नानुत्पन्नं भ्रान्तं वा इति शक्यं वक्तुम्[1] ॥

(उ) ज्ञानिनः कर्मत्यागो न प्रयोजनापेक्षः

१३. त्यागेऽपि प्रयोजनाभावस्य तुल्यत्वम् इति चेत्। *नाकृतेनेह कश्चन* (गी.३-१८) इति स्मृतेः। य आहुर्विदित्वा ब्रह्म व्युत्थानमेव कुर्यात् इति, तेषामप्येष समानो दोषः प्रयोजनाभाव इति चेत्[2]। न। अक्रियामात्रत्वात् व्युत्थानस्य। अविद्यानिमित्तो हि प्रयोजनस्य भावः, न वस्तुधर्मः। सर्वप्राणिनां तद्दर्शनात्[3]। प्रयोजनतृष्णया च प्रेर्यमाणस्य

---

1. तत्त्वमसीत्यनेन वाक्येन ज्ञानं चेन्नोत्पद्यते, उत्पन्नमपि ज्ञानं बाधितं भवेत् चेत्तदा शास्त्रमप्रमाणं स्यात्। किंतु न तथास्ति। गी.भा.२-२१, सू.भा.२-१-१४ इत्यत्र आत्मज्ञानविषयविचारो द्रष्टव्यः ॥

2. कर्मणस्त्याग एव खलु संन्यासो नाम। तस्य त्यागस्य प्रयोजनवत्त्वं स्यादन्यथा नैकोऽपि कर्म त्यजेत्। ब्रह्मज्ञानानन्तरं ज्ञानिनः कर्मानुष्ठानेन न किञ्चित् प्राप्यं प्रयोजनमस्तीति यदि दोष उद्भाव्यते, तर्हि कर्मत्यागेनापि न प्राप्यं किञ्चित् प्रयोजनमस्तीति सोऽपि दोष एवेति पूर्वपक्षिणो भावः।

3. 'तद्दर्शनात्' इति पाठः अस्माभिरादृतः। विवेकरहिताः पश्वादयः प्रत्येकप्रयोजनार्थं यथा प्रवर्तन्ते, तथैव विवेकिनोऽपि प्रवर्तन्त इत्यतः प्रयोजनस्य भावः अविद्याकृत इति निश्चित इत्यर्थः। गोपालादिष्वपि इच्छाया दृष्टत्वात् न सा इच्छा शास्त्रकृता इति पूर्वं यदुक्तं तत्समानमिदम्। व्याख्यानकारास्तु 'तददर्शनात्' इति पाठं प्रकल्प्य प्रयोजनतृष्णाया वस्तु धर्मत्वे विदुषामविदुषां सुसमूर्छितादीनां च सा स्यात्, न तु

वाङ्मनःकायैः प्रवृत्तिदर्शनात्। *सोऽकामयत जाया मे स्यात्* (बृ. १-४-१७) इत्यादिना पुत्रवित्तादिपाङ्क्तलक्षणं[1] काम्यमेवेति *उभे ह्येते साध्यसाधनलक्षणे एषणे एव* [2], इति वाजसनेयिब्राह्मणेऽवधारणात्। अविद्याकामदोषनिमित्ताया वाङ्मनःकायप्रवृत्तेः पाङ्क्तलक्षणाया विदुषोऽविद्यादिदोषाभावादनुपपत्तेः क्रियाभावमात्रम् व्युत्थानम्, न तु यागादिवदनुष्ठेयरूपं भावात्मकम्। तच्च विद्यावत्पुरुषधर्मः इति न प्रयोजनमन्वेष्टव्यम्। न हि तमसि प्रविष्टस्य उदित आलोके यद् गर्तपङ्ककण्टकाद्यपतनम् तत् किंप्रयोजनम् इति प्रश्नार्हम्॥

(ऊ) ज्ञानी गृहस्थ एव भवत्विति नियमो न सम्यक्

१४. व्युत्थानं तर्हि अर्थप्राप्तत्वान्न[3] चोदनार्हमिति। गार्हस्थ्ये चेत् परब्रह्मविज्ञानं जातं तत्रैवास्त्वकुर्वत आसनम्, न ततोऽन्यत्र[4] गमनम् इति चेत्। न। कामप्रयुक्तत्वात् गार्हस्थ्यस्य। *एतावान् वै कामः* (बृ.१-४-१७), *उभे ह्येते एषणे एव* (बृ.३-५-१) इत्यवधारणात्। कामनिमित्त-

---

एतदस्ति इति अर्थं दर्शितवन्तः।

1. पत्नी, यजमानः, पुत्रः, दैववित्तं, मानुषवित्तं चेति पञ्च कर्मपेक्षितं पाङ्क्तम्।

2. मूले (बृ. ३-५-१) 'साध्यसाधनलक्षणे' इति नास्ति। इदं 'उभे' इत्यस्यार्थः।

3. संन्यासो न एक आश्रमः किन्तु एषणात्यागमात्र इति स्थिते गृहस्थोऽपि एषणात्यागं कर्तुं शक्नुयादिति स त्यागः कुतो विधातव्यः ?

4. आश्रमान्तरम्। आश्रमान्तरगमनं संन्यासस्यावश्यकमिति सिद्धान्तिनोऽभिप्राय इति पूर्वपक्षी भावयति।

पुत्रवित्तादिसम्बन्धनियमाभावमात्रम्, न हि ततोऽन्यत्र गमनं[1] व्युत्थानमुच्यते। अतो न गार्हस्थ्य एवाकुर्वत आसनम् उत्पन्नविद्यस्य। एतेन गुरुशुश्रूषा-तपसो[2]रप्यप्रतिपत्तिर्विदुषः सिद्धा॥

१५. अत्र केचित् गृहस्था भिक्षाटनादिभयात् परिभवाच्च त्रस्यमानाः सूक्ष्मदृष्टितां दर्शयन्त उत्तरमाहुः। भिक्षोरपि भिक्षाटनादिनियमदर्शनात्[3] देहधारणमात्रार्थिनो गृहस्थस्यापि साध्यसाधनैषणोभयविनिर्मुक्तस्य देहमात्रधारणार्थम् अशनाच्छादनमात्रमुपजीवतो गृह एवास्तु आसनम् इति। न। स्वगृहविशेषपरिग्रहनियमस्य कामप्रयुक्तत्वात् इत्युक्तोत्तरमेतत्। स्वगृहविशेषपरिग्रहाभावे च शरीरधारणमात्रप्रयुक्ताशनाच्छादनार्थिनः स्वपरिग्रहविशेषाभावे[4] अर्थाद् भिक्षुत्वमेव[5]॥

---

1. एषणारहितस्य गृह एवासनमिति नियमो न युक्तः। आश्रमान्तरगमनस्य नियमाभावेऽपि गृहमेव भवत्वित्यस्य कामनिमित्तत्वादाश्रमान्तरगमनमर्थप्राप्तमेव विदुषः। (गी.भा. ४-२०,२१)॥ 2. गुरुशुश्रूषा इति ब्रह्मचर्याश्रमग्रहणम्, तप इति वानप्रस्थाश्रमग्रहणम् (छां.२-२३-१)। विद्वानेतयोरेवाश्रमयोस्तिष्ठत्विति पूर्वपक्षिमतस्यापीदमेवोत्तरम्। यद्यपि अज्ञसंन्यासिनो गुरुशुश्रूषातपआदिकमावश्यकं तथापि ज्ञानिनो नावश्यकम्। तान्यप्यविद्यारूपाण्येवेत्युदर्के (२६-भाष्यभागे) दर्शयिष्यति।

3. स्मृतिषु भिक्षाटनजपध्यानस्नानशौचसुरार्चनादिसाधनानि संन्यासिनां विहितानि।

4. स्वस्येत्यभिमानसत्त्वे एषणात्यागो न कृतः स्यात्। एषणापरित्यागे सति स्वस्येत्यभिमानाभावात् तस्यैकं विशिष्टं गृहमिति नियमोऽनुपपन्नः। अर्थात् स गृहस्थो न भवितुमर्हति। अत्र 'स्वपरिग्रहविशेषभावे' इति मुद्रितपाठः 'स्वपरिग्रहविशेषाभावे' इति परिवर्त्य स्वीकृतः।

5. तदाशनाच्छादनानि भिक्षयैव प्राप्तव्यानि भवन्ति। कुतश्चिन्निमित्तात् तस्य संन्यासाश्रमस्वीकाराभावेऽपि स कर्मिभूतो गृहस्थ इति न

१६. शरीरधारणार्थायां भिक्षाटनादिप्रवृत्तौ यथा नियमो भिक्षोः शौचादौ[1] च, तथा गृहिणोऽपि विदुषोऽकामिनोऽस्तु नित्यकर्मसु नियमेन प्रवृत्तिः, यावज्जीवादिश्रुतिनियुक्तत्वात् प्रत्यवायपरिहाराय इत्येतन्नियोगाविषयत्वेन विदुषः प्रत्युक्तम्, अशक्यनियोज्यत्वाच्च[2] इति। यावज्जीवादिनित्यचोदनानर्थक्यम्[3] इति चेत्। न। अविद्वद्विषयत्वेनार्थवत्त्वात्॥

१७. यत्तु भिक्षोः शरीरधारणमात्रप्रवृत्तस्य प्रवृत्तेर्नियतत्वम् तत् प्रवृत्तेर्न प्रयोजकम्[4]। आचमनप्रवृत्तस्य पिपासापगमवत् नान्यप्रयोजनार्थत्वम्[5] अवगम्यते[6]। न चाग्निहोत्रादीनां तद्वदर्थप्राप्तप्रवृत्तिनियतत्वोपपत्तिः[7]।

मन्तव्यः। गी. भा. ४-२० अवतरणिका द्रष्टव्या।

1. सप्तसु गृहेष्वेव भिक्षा, मृज्जलाभ्यां हस्तपादशौचं गृहस्थेभ्यो चतुर्गुणमित्यादयः संन्यासिनां नियमाः। 2. श्रुतिः ज्ञानिनं नियोजयितुं न शक्नोति इत्यतो ज्ञानिनो भिक्षाटनशौचादिनियमा न विधिप्रयुक्ताः। अतः तान् नियमान् दृष्टान्तत्वेन स्वीकृत्य ज्ञानी गृहस्थ एव भवतु इति नियमयितुं न शक्यते। ज्ञानिनः प्रत्यवायो न भवति - छां.भा.२-२३-१, बृ.भा.४-४-६॥ 3. श्रुतिरन्यथा नोपपद्यत इति श्रुतार्थापत्तिप्रमाणेन ज्ञान्यपि कर्म कुर्यादिति भावः॥ 4. न हि संन्यासी भिक्षाटनादिविधिना नियुक्तस्सन् भिक्षाटनादौ प्रवर्तते॥ 5. यद्यप्याचमनेन पिपासापगच्छति तथापि न तदर्थमाचम्यते, प्रायत्यर्थं कुर्वन्ति। विशिष्टोद्देशेन क्रियमाणस्य कर्मणः प्रयोजनान्तरं दृष्टमपि तदवान्तरप्रयोजनाय कर्म कुर्वन्तीति वक्तुं न शक्यत इति भावः। 6. बुभुक्षापरिहारायैव भिक्षाटने संन्यासी प्रवर्तत इति ज्ञाते विधिना प्रेरितः सन् स प्रवर्तत इति मन्तुं न शक्यते। 7. यथा क्षुत्पीडितो भिक्षार्थमटति न तथा स्वाभाविकदोषेणाग्निहोत्रादिकं करोति, विधिप्रेरितस्सन्नेव करोति॥

अर्थप्राप्तप्रवृत्तिनियमोऽपि प्रयोजनाभावेऽनुपपन्न एवेति चेत्[1] । न । तन्नियमस्य पूर्वप्रवृत्तिसिद्धत्वात्[2] तदतिक्रमे यत्नगौरवात् । अर्थप्राप्तस्य व्युत्थानस्य पुनर्वचनात्[3] विदुषः कर्तव्यत्वोपपत्तिः ॥

(ऋ) अविदुषो मुमुक्षोरपि संन्यासोऽस्ति

१८. अविदुषापि मुमुक्षुणा पारिव्राज्यं कर्तव्यमेव । तथा च *शान्तो दान्तः* (बृ.४-४-२३) इत्यादिवचनं प्रमाणम् । शमदमादीनां चात्मदर्शनसाधनानाम् अन्याश्रमेष्वनुपपत्तेः[4] । *अत्याश्रमिभ्यः[5] परमं पवित्रं प्रोवाच सम्यगृषिसङ्घजुष्टम्* (श्वे.६-२१) इति च श्वेताश्वतरे विज्ञायते । *न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्वमानशुः* (कै.३, तै.ना.१२-५)इति च कैवल्यश्रुतिः[6] । *ज्ञात्वा नैष्कर्म्यमाचरेत्* (?) इति च स्मृतेः ।

---

1. सप्तागारभिक्षादिनियमः कुतः? इति प्रश्नः ।

2. प्राक् ज्ञानादनुष्ठीयमानाः शास्त्रविहितनियमाः पश्चादप्यनुवर्तन्ते । तदतिक्रमे यत्नगौरवात्, प्रयोजनाभावाच्च ज्ञानी यथापूर्वं नियमेन प्रवर्तते ।

3. बृ.भा.३-५-१ इत्यत्र संन्यासविषयचर्चा द्रष्टव्या । तत्र संन्यासः प्रतिपत्तिकर्मेत्युक्तम् ।

4. गी.भा.६-३, गी.भा. षष्ठाध्यायस्य अवतरणिका च द्रष्टव्ये ।

5. आश्रमातीतानां संन्यासिनाम् ।

6. प्रस्थानत्रयभाष्ये कैवल्योपनिषदतीव विरलेनैवोदाहृता आचार्यैः, प्रायेण नैवोदाहृतेत्येव सम्यक् । अतः कैवल्यश्रुतिरिति मोक्षप्रतिपादनश्रुतिरित्यप्यर्थो भवति । अत्र 'इति च श्रुतेः' इति पाठान्तरं विद्यते । इदं वाक्यं तैत्तिरीयनारायणेऽप्युपलभ्यते (तै.ना. १२-५) । अस्यां श्रुतौ त्यागेनामृतत्वप्राप्तिर्भवतीत्युक्तत्वान्मुमुक्षोः संन्यासः साधनमित्युक्तम् भवतीति भावः ।

ब्रह्माश्रमपदे वसेत् (?) इति च । ब्रह्मचर्यादिविद्यासाधनानां च साकल्येन अत्याश्रमिषूपपत्तेर्गार्हस्थ्ये असम्भवात् । न चासंपन्नं साधनं कस्यचिदर्थस्य साधनाय अलम्[1] ॥

(ऌ) ज्ञानकर्मसमुच्चयस्य मुक्तिर्न फलम्

१९. यद्विज्ञानोपयोगीनि[2] च गार्हस्थ्याश्रमकर्माणि तेषां परं फलमुपसंहृतं[3] देवताप्ययलक्षणं[4] संसारविषयमेव । यदि कर्मिण एव परमात्मविज्ञानमभविष्यत् संसारविषयस्यैव फलस्योपसंहारो नोपापत्स्यत । अङ्गफलं[5] तदिति चेत् । न । तद्विरोध्यात्मवस्तुविषयत्वादात्मविद्यायाः । निराकृतसर्वनामरूपकर्मपरमार्थात्मवस्तुविषयम् आत्मज्ञानम् अमृतत्व-साधनम् । गुणफलसम्बन्धे हि निराकृतसर्वविशेषात्मवस्तुविषयत्वं ज्ञानस्य न प्राप्नोति[6] । तच्चानिष्टम्[7] । *यत्र त्वस्य सर्वमात्मैवाभूत्* (बृ.४-५-१५)

---

1. अतो युक्त्यापि संन्यासः कर्तव्य इति प्राप्तम् ।

2. अत्र मूलग्रन्थे यत्किञ्चिन्न्यूनातिरिक्तमस्तीति भाति । '*यद्विज्ञानोपयोगीनि*' इत्युक्ते यस्य ज्ञानस्य उपयोगीनीत्यर्थो भवति । 'यानि विज्ञानोपयोगीनि' इति पाठश्चेत् भवति प्रकृतानुगुणम् भवति ॥ 3. ऐ.आ.२-२-४ इत्यत्र ।

4. 'संभूय देवता अप्येति' इति देवताप्राप्तिफलम् । देवताः सर्वाः संसारे प्रापतन्नित्युक्तमुपनिषदि ।

5. अग्न्यादिदेवतोपासनाफलं तत्रोक्तम्, अत्र तु समष्टिदेवतारूपस्य प्राणाख्यस्य परमात्मनो ज्ञानं मुक्त्यर्थमुक्तमिति पूर्वपक्ष्यभिप्रायः ।

6. न हि सविशेषवस्तुज्ञानं निर्विशेषवस्तुज्ञानमेकमेव भवितुं युक्तमिति भावः ।

7. आत्मज्ञानं निर्विशेषवस्तु न बोधयतीति यत् ।

इत्यधिकृत्य क्रियाकारकफलादिसर्वव्यवहारनिराकरणात् विदुषः। तद्वि- परीतस्य अविदुषः *यत्र हि द्वैतमिव भवति* (बृ.४-५-१५) इत्युक्त्वा क्रियाकारकफलरूपस्य संसारस्य दर्शितत्वाच्च वाजसनेयिब्राह्मणे। तथा इहापि[1] देवताप्ययं संसारविषयं यत् फलम् अशनायादिमद्वस्त्वात्मकम्[2], तदुपसंहृत्य केवलं[3] सर्वात्मकवस्तुविषयम् ज्ञानम् अमृतत्वाय वक्ष्यामि इति प्रवर्तते॥

(ए) ऋणत्रयश्रुतेर्गतिः

२०. ऋणप्रतिबन्धश्चाविदुष एव मनुष्यपितृदेवलोकप्राप्तिं प्रति, न विदुषः। *सोऽयं मनुष्यलोकः पुत्रैणैव* (बृ.१-५-१६) इत्यादिलोकत्रय- साधननियमश्रुतेः[4]। विदुषश्च ऋणप्रतिबन्धाभावो दर्शित आत्मलोकार्थिनः[5] *किं प्रजया करिष्यामः* (बृ.४-४-२२) इत्यादिना। तथा *एतद्ध स्म वै तत्*

---

1. सर्वास्वपि उपनिषत्सु अज्ञानदृष्ट्या संसारविषयभूतं सविशेषवस्तु, ज्ञानदृष्ट्या च निर्विशेषवस्तु बोध्यते॥ 2. देवतानामशनायाद्यस्तीत्युपनिषद्युक्तत्वाद्देवता- प्ययोऽज्ञानकृतसंसारविषय एव॥ 3. केवलात्मवस्तुज्ञानमुपनिषत्सूक्तमि- त्यङ्गीकृतेऽपि तज्ज्ञानं कर्मिण एवेति खलु पूर्वपक्षिवादः। निर्विशेषसविशेषभेदेनात्मज्ञानं द्विविधम्; तत्र निर्विशेषज्ञानं न कर्मसंबन्धि, किन्तु संन्यासिनामेवोक्तमिति सिद्धान्तिना दर्शितम्॥ 4. पित्राद्यृणत्रयापाकरणेनैव मनुष्यादिलोकेषु भोगप्राप्तिर्भवतीति श्रुतेराशयः। एतेषां लोकफलकामिनां संन्यासे नाधिकारः- बृ.भा.४-४-२२। अज्ञानिनामेव ऋणित्वमित्यत्र बृ.भा.१-४-१० द्रष्टव्यम्॥ 5. आत्मैव सर्वो लोकः, आत्मनो व्यतिरिक्तं प्राप्तव्यं लोकान्तरं नास्तीति मन्वानस्य न किञ्चित्साधनमपेक्षते नित्यप्राप्तत्वादात्मनः - बृ. ४-४-२२।

विद्वांस आहुर्ऋषयः कावषेयाः (ऐ.आ.३-२-६)इत्यादि। *एतद्ध स्म वै तत्पूर्वे*[1] *विद्वांसोऽग्निहोत्रं जुहवांचक्रुः* (कौ.२-५)[2] इति च कौषीतकिनाम्॥

२१. अविदुषस्तर्हि ऋणानपाकरणे पारिव्राज्यानुपपत्तिः इति चेत्। न। प्राग्गार्हस्थ्यप्रतिपत्तेर्ऋणित्वासम्भवात्। अधिकारानारूढोऽपि ऋणी चेत् स्यात् सर्वस्य[3] ऋणित्वम् इत्यनिष्टं प्रसज्येत। प्रतिपन्नगार्हस्थ्यस्यापि *गृहाद्वनीभूत्वा*[4] *प्रव्रजेत्। यदि वेतरथा ब्रह्मचर्यादेव प्रव्रजेत्। गृहाद्वा वनाद्वा* (जा.४) इत्यात्मदर्शनसाधनोपायत्वेन[5] इष्यत एव पारिव्राज्यम्॥

---

1. तत्शब्दरहितं पाठान्तरमप्यस्ति।

2. 'प्राणे वाचं जुहोति वाचि प्राणं जुहोति' इत्येवं निरन्तरमग्निहोत्रं जुहवाञ्चक्रुः। 'न जुहवाञ्चक्रुः' इति नकारयुक्तमुद्रितपाठो न समीचीनः। न हि तेऽन्तवत्फलकमग्निहोत्रमन्वतिष्ठन्निति आर्थिकार्थः न त्वक्षरार्थः।

3. न केवलं ब्रह्मचारिणां संन्यासिनामृणित्वं किन्तु वर्णाश्रमबहिर्भूतानामपीति प्रसज्येत। अज्ञानिनामपि संन्यासो विद्यते-बृ.भा.४-५-१५।

4. क्वचिन्मुद्रितकोशेषु 'गृहाद्वनी भूत्वा' इत्यस्य स्थाने 'गृहीभूत्वा वनी भवेत्, वनीभूत्वा प्रव्रजेत्' इत्यस्ति। सू.भा.३-४-२० इत्यत्रैतस्यैव पाठस्योदाहरणादत्रस्थपाठो लेखकप्रमादादापतित इति भाति। गृहस्थाश्रमाद्वानप्रस्थाश्रमं गत्वा, साक्षाद्वा संन्यसेदिति श्रुत्योक्त्वात् विरक्तस्य ऋणत्रयप्रतिबन्धमन्तरेण संन्यासेऽधिकारोऽस्तीत्युक्तं भवति।

5. आत्मज्ञानपरिपाकाय संन्यास उपायः - बृ.भा. ४-४-७, गी.भा.१८-५५, सू.भा.३-४-२०।

(ऐ) यावज्जीवादिश्रुतेर्गतिः

२२. यावज्जीवादिश्रुतीनाम्[1] अविद्वदमुमुक्षुविषये कृतार्थता। छान्दोग्ये च केषांचित् द्वादशरात्रम् अग्निहोत्रं हुत्वा तत ऊर्ध्वं परित्यागः[2] श्रूयते॥

(ओ) संन्यासोऽनधिकारिणामिति न साधु

२३. यत्तु अनधिकृतानां पारिव्राज्यम् इति। तन्न। तेषां पृथगेव *उत्सन्नाग्निरनग्निको वा* (जा.४) इत्यादिश्रवणात्। सर्वस्मृतिषु च अविशेषेण[3] आश्रमविकल्पः[4] प्रसिद्धः, समुच्चयश्च[5]॥

(औ) ज्ञानिनः संन्यास एवोपपद्यते

२४. यत्तु विदुषोऽर्थप्राप्तं व्युत्थानमित्यशास्त्रार्थत्वे[6] गृहे वने वा

---

1. आदिपदेन 'तं यज्ञपात्रैर्दहन्ति' इत्यादि ग्राह्यम्।

2. नेदमुपनिषदि वर्तते। व्याख्याने तु 'त्रयोदशरात्रमहतवासाः यजमानः स्वयमग्निहोत्रं जुहुयादप्रवसन्न तत्रैव सोमेन पशुना वेष्ट्वाऽग्नीनुत्सृजति' इत्युदाहृतम्। ब्राह्मणभागे वा स्यात्। अस्मिन् वाक्ये अप्रवसन्न इत्यत्र नकारोऽधिक इति भाति। (*आपस्तम्ब-श्रौतसूत्रे अग्न्याधेयप्रकरणे एतद्वाक्यमुदाहृतं दृश्यते-प्रकाशकः*)

3. कर्मण्यधिकृतानामनधिकृतानां च-आ.ध.२-९-२१-२,५; मनुस्मृतिः.६-८८; गौ.ध.१-३-१ इत्यादिस्मृतिषु विरक्तानां संन्यास उक्तः।

4. यस्मात्कस्मादप्याश्रमात् संन्यसितुं शक्यत इति आश्रमविकल्पः।

5. यथाक्रममेवाश्रमस्वीकारः समुच्चयः॥

6. योऽर्थादर्थो न स चोदनार्थः। साक्षाच्छब्दार्थस्यैव शास्त्रार्थत्वमिति मीमांसकाः।

तिष्ठतो[1] न विशेष इति। तदसत्। व्युत्थानस्यैव अर्थप्राप्तत्वात्[2] नान्यात्रावस्थानं[3] स्यात्। अन्यत्रावस्थानस्य कामकर्मप्रयुक्तत्वं[4] ह्यवोचाम[5]। तदभावमात्रं व्युत्थानम् इति च॥

२५. यथाकामित्वं तु विदुषोऽत्यन्तम् अप्राप्तम्। अत्यन्तमूढविषयत्वेनावगमात्। तथा[6] शास्त्रचोदितमपि कर्म आत्मविदोऽप्राप्तं गुरुभारतया अवगम्यते। किमुत अत्यन्ताविवेकनिमित्तं[7] यथाकामित्वम्। न ह्युन्मादतिमिरदृष्ट्युपलब्धं वस्तु तदपगमेऽपि तथैव स्यात्। उन्मादतिमिरदृष्टिनिमित्तत्वादेव तस्य। तस्मात् आत्मविदो व्युत्थानव्यतिरेकेण न यथाकामित्वम्। न चान्यत् कर्तव्यम् इत्येतत् सिद्धम्॥

(क) न श्रुतेर्ज्ञानकर्मसमुच्चयवादे तात्पर्यम्

२६. यत्तु *विद्यां चाविद्यां च यस्तद्वेदोभयः सह* (ई.मा.१४) इति। न तत्र विद्यावतो विद्यया सह अविद्यापि वर्तते इत्ययमर्थः। कस्तर्हि? एकस्मिन् पुरुषे एते एकदैव न सह सम्बध्येयाताम् इत्यर्थः। यथा

---

1. गृहस्थो वा संन्यासी वा भवतु। अयं पूर्वपक्षः भा.भा.१४ अनूद्य परिहृतः। उपसंहारार्थोऽत्र पुनरनूदितः॥ 2. अकामिनो गार्हस्थ्यमाश्रमान्तरं वा नोपपद्यते। विध्यभावेपि संन्यास एव उपपद्यत इति पूर्वोक्तपरिहारस्य अनुवादोऽयम्।

3. आश्रमान्तरे॥ 4. कर्म इति पदं नापेक्षितम्, पूर्वमेतन्नोक्तं च।

5. भा.भा.१४॥ 6. अकरणात्प्रत्यवायप्रसङ्गत्वेन, नित्यतया।

7. देहादिरेवाहमित्यविवेकात्मकाध्यासेनैव स्वेच्छाविहारो भवति। कर्ता देहव्यतिरिक्त इति बुद्धिरप्यज्ञानमेवेति निश्चयवतो ज्ञानिनो देह एवाहमिति ज्ञानं कथं वा संभवेदिति भावः।

शुक्तिकायां रजतशुक्तिकाज्ञाने एकस्य पुरुषस्य। *दूरमेते विपरीते विषूची अविद्या या च विद्येति ज्ञाता* (का.१-२-४) इति हि काठके। तस्मात् न विद्यायां सत्याम् अविद्यासम्भवोऽस्ति[1]। *तपसा ब्रह्म विजिज्ञासस्व* (तै.३-२) इत्यादिश्रुतेः[2], तपआदि विद्योत्पत्तिसाधनं गुरूपसदनादि च कर्म[3] अविद्यात्मकत्वात्[4] *अविद्या* उच्यते। तेन विद्यामुत्पाद्य[5] मृत्युं कामम् अतितरति। ततो निष्कामः त्यक्तैषणो ब्रह्मविद्यया अमृतत्वमश्नुते इत्येतमर्थं दर्शयन् आह *अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते*[6] (ई.मा.१४) इति॥

(ख) केवलज्ञानवादस्योपसंहारः

२७. यत्तु पुरुषायुः सर्वं कर्मणैव व्याप्तं *कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः* (ई.२) इति, तदविद्वद्विषयत्वेन[7] परिहृतम्। इतरथा असम्भवात्[8]। यत्तु वक्ष्यमाणमपि पूर्वोक्ततुल्यत्वात् कर्मणा अविरुद्ध-मात्मज्ञानमिति। तत् सविशेषनिर्विशेषात्मविषयतया[9] प्रत्युक्तम्। उत्तरत्र

---

1. ज्ञानिनोऽविद्यासम्भवो नास्त्येवेति ई.भा.१८, बृ.भा.१-४-१० इत्यत्र स्पष्टीकृतम्।

2. आदिपदेन *गुरुमेवाभिगच्छेत्* (मुं.१-२-१२) इत्यादि।

3. सत्यं ब्रह्मचर्यमित्यादि॥ 4. यस्य अहं कर्ता, ज्ञाता इत्यध्यासः तस्यैव विहितत्वात्।

5. कर्मानुष्ठानेन विषयदोषदर्शनरूपो विवेको जायते। ततः कामरूपो मृत्युर्नश्यति-इत्ययमेवात्र भाष्याभिप्रायः। अतो विद्यामुत्पाद्येत्यस्य विवेकमुत्पाद्येत्येवार्थो युक्तः।

6. *विद्यां च* (ई.११) इति श्रुतेः भाष्यम्, मां.का.भा. ३-२५ चानेन तोलनीयम्।

7. आत्मज्ञानरहितस्यामुमुक्षोर्विषय इति।

8. ज्ञानिनोऽपि कर्मास्तीत्येतन्नोपपद्यत इत्यतः। 9. अयं वा.॥ पाठः।

व्याख्याने च दर्शयिष्यामः। अतः केवलनिष्क्रियब्रह्मात्मैकत्वविद्या-प्रदर्शनार्थमुत्तरो ग्रन्थ आरभ्यते॥

अथ प्रथमोऽध्यायः

प्रथमः खण्डः

लोकलोकपालानां सृष्टिः

ओं आत्मा वा इदमेक एवाग्र आसीत्। नान्यत्किंचन मिषत्। स ईक्षत लोकान्नु सृजा इति॥ १॥

व्याकृताव्याकृतयोः तारतम्यम्

२८. आत्मा आप्नोतेरत्तेरततेर्वा[1] परः सर्वज्ञः सर्वशक्तिः, अशनायादिसर्वसंसारधर्मवर्जितो नित्यशुद्धबुद्धमुक्तस्वभावोऽजोऽजरोऽमरोऽमृतोऽभयोऽद्वयः[2] । वै । इदम् यदुक्तं[3] नामरूपकर्मभेदभिन्नं जगत्। आत्मैवैकः अग्रे जगतः सृष्टेः प्राक् आसीत्। किं नेदानीं स एवैकः? न। कथं तर्हि *आसीत्* इति? उच्यते। यद्यपि इदानीं स एवैकः तथाप्यस्तिविशेषः। प्रागुत्पत्तेः अव्याकृतनामरूपभेदम् आत्मभूतम्[4]

---

1. काठकोपनिषद्भाष्ये २-१-१ इत्यत्रोदाहृतश्लोको द्रष्टव्यः।

2. मुं.१-१-९, श्वे.६-८, बृ.३-५-१, ४-४-२५, का. १-२-१४, छां. ६-२-१ इत्यादिश्रुतिषूक्तः परमात्मैवात्रात्मेत्युक्तः।

3. पूर्वम् ऐ.आ. २-१-३ इत्यत्रोक्तं जगत्। नामरूपकर्मात्मकं जगदित्यतीते ग्रन्थभागे नोक्तम्। 'यदुक्तं' इत्यस्य स्थाने 'यदुत' इति पाठं प्रकल्प्य प्रत्यक्षादिप्रसिद्धं इत्येषोऽर्थः आ.॥ व्याख्याने दर्शितः।

4. आत्मनः पृथक्त्वेन दृश्यमानाभ्यां नामरूपाभ्यां पृथग्भूताभ्यां विना।

* ऐतरेयोपनिषत् अध्यायः १, खंडः १

** ऐतरेयद्वितीयारण्यके अध्यायः ४, खंडः १

आत्मैकशब्दप्रत्ययगोचरं जगत्। इदानीं व्याकृतनामरूपभेदत्वात् अनेकशब्दप्रत्ययगोचरम्[1] आत्मैकशब्दप्रत्ययगोचरं[2] च इति विशेषः। यथा सलिलात् पृथक् फेननामरूपव्याकरणात् प्राक् सलिलैकशब्द-प्रत्ययगोचरमेव फेनम्। यदा सलिलात् पृथङ् नामरूपभेदेन व्याकृतं भवति तदा *सलिलं, फेनं च* इत्यनेकशब्दप्रत्ययभाक् सलिलमेव इति चैकशब्दप्रत्ययभाक् च फेनं भवति तद्वत्[3] ॥

अद्वितीयात्मनः सृष्टिः

२९. न अन्यत् किञ्चन न किञ्चिदपि मिषत निमिषत् व्यापारवत् इतरद्वा[4]। यथा सांख्यानाम् अनात्मपक्षपाति स्वतन्त्रं[5] प्रधानम्, यथा च काणादानामणवः[6]। न तद्वदिह अन्यदात्मनः किञ्चिदपि वस्तु विद्यते[7]।

---

1. अविद्यादृष्ट्या। 'नामरूपे अविद्याकल्पिते' इति बृ.भा.३-५-१, सू.भा. २-१-१४, १-४-२२, २-२-२, २-३-४६, ४-३-१४, मां.का.भा.१-६, प्र.भा.६-३ इत्यादिस्थलेषु दर्शितम्॥ 2. परमार्थदृष्ट्या।

3. सलिलफेनदृष्टान्तः-छां.भा.८-१४-१, बृ.भा.१-४-७, ३-५-१ इत्यत्र दर्शितः। नामरूपे परमार्थत आत्मनोऽनन्ये आत्मा तु ताभ्यां विलक्षण इति बोधनाय, आत्मा अद्वितीय इति च बोधनाय दृष्टान्तः प्रवृत्तः।

4. न किञ्चिच्चेतनमचेतनं वात्मनः पृथग्वर्तते।

5. प्रधानं स्वयमेव जगद्रूपेण परिणमत इति सांख्याः।

6. ईश्वरो निमित्तकारणं परमाणव उपादानकारणमिति वैशेषिकाः।

7. अव्याकृतं नामरूपबीजं न प्राधनवदणुवद्वा स्वतन्त्रतया पृथगस्ति। तदविद्याकृतमेव-सू.भा.१-४-३।

किं तर्हि, आत्मैवैक आसीत् इत्यभिप्रायः ॥

अद्वितीयात्मन ईक्षणम्

३०. स सर्वज्ञस्वाभाव्यात् आत्मा एक एव[1] सन् ईक्षत[2] । ननु प्रागुत्पत्तेरकार्यकरणत्वात् कथमीक्षितवान् ? नायं दोषः । सर्वज्ञस्वाभाव्यात् । तथा च मन्त्रवर्णः *अपाणिपादो जवनो ग्रहीता* (श्वे.३-१९) इत्यादिः[3] । केनाभिप्रायेणेति? आह, लोकान् अम्भःप्रभृतीन् प्राणिकर्मफलोपभोगस्थानभूतान् नु सृजै सृजेऽहम् इति ॥

स इमाँल्लोकानसृजत । अम्भो मरीचीर्मरमापोऽदोऽम्भः परेण दिवं द्यौः प्रतिष्ठान्तरिक्षं मरीचयः । पृथिवी मरो या अधस्तात्ता आपः ॥ २ ॥

लोकानां सृष्टिः

३१. एवम् ईक्षित्वा आलोच्य स आत्मा इमान् लोकान् असृजत

---

1. अयं वा.॥ पाठः ॥ 2. अत्र 'लोकान्नु सृजा' इति आ.॥ का.॥ पाठेऽधिक इति वा.॥ गी.॥ पाठ आदृतः । ईक्षत इति-श्रुतौ प्रयोगादवैदिकं प्रधानमणुर्वा न जगत्कारणमिति सू.भा.१-१-५ इत्यत्र निर्णीतम् ॥ 3. सत्त्वगुणद्वारेण प्रधानस्य सर्वज्ञत्वमुपपद्यते; शरीरेन्द्रियरहितस्य निरवयवस्य ब्रह्मणः कथं सर्वज्ञत्वमित्याक्षिप्य ज्ञानस्वरूपत्वादेव तस्य सर्वज्ञत्वमुपपद्यते इति परिहृतः सू.भा.१-१-५ इत्यत्र । व्याख्यानकारास्तु (१) सर्गादौ प्राणिकर्मभिः उत्पद्यमानायां अविद्यावृत्तौ(??)आत्मचैतन्यं प्रतिबिंबते, तदेव ईक्षणम् (२) अभिव्यक्तेः प्राक् अनिभिव्यक्तनामरूपावच्छिन्नं चैतन्यमेव औन्मुख्यस्य कादाचित्कत्वात् कादाचित्कम् ईक्षणम् (३) ईक्षणे श्रुतेः तात्पर्याभावः-न जडः कारणमिति बोधनमेव वाक्यस्य तात्पर्यम्, इति मतत्रय-

सृष्टवान् । यथा इह बुद्धिमान् तक्षादिः 'एवंप्रकारान् प्रासादादीन् सृजे' इति ईक्षित्वा ईक्षानन्तरं प्रासादादीन् सृजति, तद्वत् । ननु सोपादानस्तक्षादिः प्रासादादीन् सृजतीति युक्तम् । निरुपादानस्तु आत्मा कथं लोकान्सृजतीति? नैष दोषः । सलिलफेनस्थानीये आत्मभूते नामरूपे अव्याकृते आत्मैकशब्दवाच्ये व्याकृतफेनस्थानीयस्य जगतः उपादानभूते सम्भवतः । तस्मात् आत्मभूतनामरूपोपादानः[1] सन् सर्वज्ञो जगन्निर्मिमीते इत्यविरुद्धम्[2] । अथवा यथा विज्ञानवान् मायावी निरुपादानः[3] आत्मानमेव आत्मान्तरत्वेन आकाशेन गच्छन्तमिव निर्मिमीते[4] तथा सर्वज्ञो देवः सर्वशक्तिर्महामायः[5] आत्मानमेव आत्मान्तरत्वेन जगद्रूपेण निर्मिमीते इति युक्ततरम् । एवं च सति कार्यकारणोभयासद्वाद्यादि[6] (?)पक्षाश्च न प्रसज्यन्ते, सुनिराकृताश्च भवन्ति ॥

मुल्लेखितवन्तः ।

1. 'नामरूपोपादानभूतः सन्' इति पाठादयमेव पाठो वरीयान् ।

2. प्रलयकाले नामरूपे आत्मरूपेण भवतः, ततो व्याकृतनामरूपे भवतः । अत आत्मशब्दवाच्येऽव्याकृतनामरूपे एवोपादानम् । न तक्षादिवदन्यदुपादानमात्मनोऽपेक्ष्यते ॥ 3. व्याकृताव्याकृतनामरूपे परमार्थे, ब्रह्म जगद्रूपेण परमार्थतः परिणमतीति च नावगच्छेदित्ययं पक्ष उदाहृतः (सू.भा.२-१-२७, २-१-३३) ।

4. मायाविदृष्टान्तः मां.का.भा. १-७, सू.भा.१-१-१७ इत्यत्रोदाहृतः ।

5. अल्पज्ञोऽल्पशक्तो लौकिको मायाव्येव यदा निरुपादानसृष्टिं रचयितुं समर्थो भवति, किं सर्वज्ञः सर्वशक्तो ब्रह्मादीनामपि मोहको महामायावी देवो न स्रष्टुं समर्थो भवेत्? इति भावः ॥ 6. 'कार्यकारणोभयासद्वादिपक्षाश्च' इत्येवालम् । कारणमन्तरेण स्वभावेनैव कार्यमुत्पद्यते इति पक्षः, कारणेऽविद्यमानमसत्कार्यं नूतनमुत्पद्यत इति

३२. कान् लोकान् असृजतेति? आह - *अम्भो मरीचीर्मरमापः* इति। आकाशादिक्रमेण[1] अण्डमुत्पाद्य[2] अम्भःप्रभृतीन् लोकान् असृजत। तत्र अम्भःप्रभृतीन् स्वयमेव व्याचष्टे श्रुतिः। अदः तत् अम्भःशब्दवाच्यो लोकः। परेण दिवं द्युलोकात् परस्तात्। सोऽम्भश्शब्दवाच्यः। अम्भो-भरणात्[3]। द्यौः प्रतिष्ठा आश्रयः, तस्याम्भसो लोकस्य। द्युलोकात् अधस्तात् अन्तरिक्षं यत्, तन्मरीचयः। एकोऽपि अनेकस्थानभेदत्वात् बहुवचनभाक्[4] मरीचयः इति। मरीचिभिर्वा रश्मिभिः सम्बन्धात्। पृथिवी मरः। म्रियन्ते अस्मिन् भूतानि इति। या अधस्तात् पृथिव्याः ता आपः उच्यन्ते आप्नोतेः लोकाः[5]। यद्यपि पञ्चभूतात्मकत्वं लोकानाम् तथापि अब्बाहुल्यात्[6]

वैशेषिकपक्षः, कार्यं कारणं चोभयमसदेवेति शून्यवादिपक्षः - इति पक्षत्रयमपि निराकृतं भवति। कार्यं कारणं च ब्रह्मैवेति सिद्धान्तः। 'असद्वाद्यादिपक्षाश्च' इति पाठे आदिशब्दस्य परिणामवादी इत्यर्थो व्याख्यानकारैर्दर्शितः।

1. 'लोकानसृजत' इत्युक्तत्वादत्र शुद्धात्मनो व्यतिरिक्तः प्राण एवोऽक्तः स्यादिति पूर्वपक्ष्याक्षिपेदिति कृत्वा 'आकाशादिक्रमेण' इत्युक्तम्। आत्मा एक एवासीदित्यव-धारणात्, उदर्के जीवरूपेण प्रवेशश्रवणाच्चात्र परमात्मैव ग्राह्य इति सू.भा.३-३-१६, १७ इत्यत्र निर्णीतम्। श्रुत्यन्तरप्रसिद्धो हि समानविषयो विशेषः श्रुत्यन्तरेषूपसंहर्तव्यो भवतीति न्यायोऽत्रानुसृतः॥ 2. छां. ३-१९-१ इत्यत्र दर्शितः।

3. वृष्ट्यर्थं जलस्य सम्भरणात्॥ 4. 'आपः' इति शब्दस्यापि यद्यपि बहु-वचनमेव, तस्य नित्यबहुवचनत्वान्न तद्विषये किञ्चिद्वक्तव्यं प्राप्तम्।

5. अधोलोकगन्तृभिराप्यमानत्वादस्य लोकस्य 'आपः' इति नाम।

6. न हि 'अब्बाहुल्यात्' इति सर्वेषां लोकानामुपपद्यते। एवमेव 'अब्नामभिः' इत्यपि

अब्नामभिरेव *अम्भः, मरीचीः, मरम्, आपः* इत्युच्यन्ते ॥

स ईक्षतेमे नु लोका लोकपालान्नु सृजा इति। सोऽद्भ्य एव पुरुषं समुद्धृत्यामूर्छयत् ॥ ३ ॥

लोकपालानां सृष्ट्यर्थं विराजः सृष्टिः

३३. सर्वप्राणिकर्मफलोपादानाधिष्ठानभूतान् चतुरो लोकान्[1] सृष्ट्वा स ईश्वरः पुनरेव ईक्षत। इमे नु तु[2] अम्भःप्रभृतयः मया सृष्टाः लोकाः परिपालयितृवर्जिता विनश्येयुः। तस्मात् एषां रक्षणार्थं लोकपालान्[3] लोकानां पालयितॄन् नु सृजै सृजेऽहम् इति ॥

३४. एवमीक्षित्वा सः अद्भ्य एव अप्प्रधानेभ्य एव पञ्चभूतेभ्यः[4], येभ्योऽम्भःप्रभृतीन् सृष्टवान् तेभ्य एव इत्यर्थः। पुरुषं[5] पुरुषाकारं

नोपपद्यते सर्वेषाम्। अत उपलक्षणमिदम्। तथा हि अब्बाहुल्येन अम्भः, रश्मिबाहुल्येन मरीचयः, मरणबाहुल्येन मरः, बहुजनैराप्यमानत्वादाप इति तस्य तस्य बाहुल्येन तत्तन्नाम तत्तल्लोकस्य। अम्भः इत्यस्य केवलाभिरद्भिरेव भूतेन कृतो लोक इति नार्थः। सर्वे लोकाः पाञ्चभौतिका एवेति भाष्यस्य तात्पर्यम्।

1. जीवैः क्रियमाणानि कर्माणि, तत्कारकाणि, तद्वदेव फलभोगार्थमाश्रयभूता लोका अप्यात्मन एवोत्पन्नाः। न हि त आत्मनः पृथग्भूताः ॥ 2. अयं वा.॥ पाठः।

3. स्थूलसूक्ष्मशरीराणामिन्द्रियाणां च सृष्टिर्लोकपालसृष्टावन्तर्गता। एते सर्वेऽप्यात्मन एवोत्पन्ना इत्यात्मनोऽपृथग्भूताः। आत्मा एक एव परमार्थ इति विवरणार्थं सृष्टिरुक्ता। एतदग्रे भाष्ये उच्यते ॥ 4. अत्र अबिति पञ्चभूतान्येव-छां.भा. ६-३-६, सू.भा.३-१-२ ॥ 5. इदमेव विराट्पुरुषस्य शरीरम्। 'पुरुषप्रकारम्' इति पाठस्यापि पुरुषाकारमिवेत्येवार्थः ॥

शिरःपाण्यादिमन्तं समुद्धृत्य अद्भ्यः समुपादाय मृत्पिण्डमिव कुलालः पृथिव्या अमूर्छयत् मूर्छितवान् संपिण्डितवान् स्वावयवसंयोजनेन इत्यर्थः ॥

तमभ्यतपत् तस्याभितप्तस्य मुखं निरभिद्यत यथाण्डम् । मुखाद्वाग्वाचोऽग्निर्नासिके निरभिद्येतां नासिकाभ्यां प्राणः प्राणाद्वायुरक्षिणी निरभिद्येतामक्षीभ्यां[1] चक्षुश्चक्षुष आदित्यः कर्णौ निरभिद्येतां कर्णाभ्यां श्रोत्रं श्रोत्राद्दिशस्त्वङ् निरभिद्यत त्वचो लोमानि लोमभ्य ओषधिवनस्पतयो हृदयं निरभिद्यत हृदयान्मनो मनसश्चन्द्रमा नाभिर्निरभिद्यत नाभ्या अपानोऽपानान्मृत्युः शिश्नं निरभिद्यत शिश्नाद्रेतो रेतस आपः ॥ ४ ॥

विराट्पुरुषाद्देवतानामुत्पत्तिः

३५. तं पिण्डं पुरुषविधम्[2] उद्दिश्य अभ्यतपत् । तदभिध्यानं संकल्पं कृतवान् इत्यर्थः । *यस्य ज्ञानमयं तपः* (मुं.१-१-९) इत्यादिश्रुतेः[3] । तस्य अभितप्तस्य ईश्वरसङ्कल्पेन तपसा अभितप्तस्य पिण्डस्य मुखं निरभिद्यत मुखाकारं सुषिरम् अजायत । यथा पक्षिणः अण्डं निर्भिद्यते एवम् । तस्माच्च निर्भिन्नात् मुखात् वाक् करणम् इन्द्रियं[4] निरवर्तत ।

---

1. 'अक्षिभ्यां' इति वा.॥ पाठः ॥ 2. बृ.भा.१-४-१ इत्यत्र 'पुरुषविधः' इत्यस्य व्याख्या द्रष्टव्या ॥ 3. ईश्वरः सृष्ट्यर्थं शारीरं तपो नाचरतीत्यस्येदं गमकम् । स सङ्कल्पमात्रादेव सृजति ॥ 4. वागादिकरणान्यपञ्चीकृतभूतेभ्य उत्पद्यन्ते न मुखादिगोलकेभ्यः । तथापि मुखादावेव तेषामभिव्यञ्जनात् मुखाद्वागुत्पन्नमित्युक्तमिति आ.॥ व्याख्यानम् । आत्मन उत्पन्नाद्विराट्शरीरात् सर्वाणि करणान्युत्पन्नानीत्यत

तदधिष्ठाता अग्निः ततो वाचः लोकपालः। तथा नासिके निरभिद्येताम्। नासिकाभ्यां प्राणः। प्राणाद्वायुः[1]। इति सर्वत्र अधिष्ठानं करणं देवता च त्रयं क्रमेण निर्भिन्नमिति। अक्षिणी, कर्णौ, त्वक्, हृदयम् अन्तः-करणाधिष्ठानम्। मनः अन्तःकरणम्[2]। नाभिः सर्वप्राणबन्धनस्थानम्। अपानसंयुक्तत्वात्[3] अपान इति पाय्विन्द्रियमुच्यते। तस्य अधिष्ठात्री[4] देवता मृत्युः। यथा अन्यत्र तथा शिश्नं निरभिद्यत प्रजननेन्द्रियस्थानम्। इन्द्रियं रेतः रेतोविसर्गार्थत्वात् सह रेतसा उच्यते[5]। रेतस आपः इति[6]॥

॥ इति प्रथमः खण्डः ॥

द्वितीयः खण्डः

देवतानां संसारबन्धः

ता एता देवताः सृष्टा अस्मिन् महत्यर्णवे प्रापतन्। तमशनाया-पिपासाभ्यामन्ववार्जत्। ता एनमब्रुवन्नायतनं नः प्रजानीहि यस्मिन् प्रतिष्ठिता अन्नमदामेति॥ १ ॥

आत्मव्यतिरेकेण न किञ्चिदस्तीत्येव प्रकृतम्। सृष्टिविषये क्वचिद्विगानेऽपि सिद्धान्तस्य न कापि हानिः॥

1. वायुदेवता॥ 2. हृदयमिति स्थानम्, मन इति करणम्। इन्द्रियस्थानानां गोलकानीत्यर्वाचीन-वेदान्तिनो व्यवहारः॥ 3. 'तस्मादपानसंयुक्तात्' इति पाठे तस्मादित्यधिकम्, 'तस्मादपानः' इति वा पाठः स्यात्॥ 4. ईशित्री॥

5. इन्द्रियसृष्टिकथनप्रसङ्गे रेतसः कथनात्, तस्य लक्षणार्थः ग्राह्य इति भावः॥

6. अस्य मन्त्रस्य स्पष्टार्थत्वाद्भाष्ये प्रतिपदस्य व्याख्यानं न कृतम्।

संसारस्य वर्णनम्

३६. ता एता[1] अग्न्यादयो[2] देवताः लोकपालत्वेन सङ्कल्प्य सृष्टा ईश्वरेण, अस्मिन् (संसारा)र्णवे[3] संसारसमुद्रे महति अविद्याकामकर्म-प्रभवदुःखोदके, तीव्ररोगजरामृत्युमहाग्राहे, अनादौ, अनन्ते[4], अपारे, निरालम्बे[5], विषयेन्द्रियजनितसुखलवलक्षणविश्रामे[6], पञ्चेन्द्रियार्थ-तृण्मारुतविक्षोभोत्थितानर्थशतमहोर्मौ, महारौरवाद्यनेकनिरय[7]गत-हाहेत्यादिकूजिताक्रोशनोद्भूतमहारवे, सत्यार्जवदानदयाहिंसाशमदमधृत्या-द्यात्मगुण[6]पाथेयपूर्णज्ञानोडुपे सत्सङ्गसर्वत्यागमार्गे मोक्षतीरे एतस्मिन् महति अर्णवे प्रापतन् पतितवत्यः ॥

---

1. 'ताः' इति आरण्यकस्य द्वितीयाध्याये *सम्भूय देवता अप्येति* (ऐ.आ.२-२-४) इत्यत्रोक्ताः । 'एता' इति लोकपाला भवन्त्वितीश्वरेण सृष्टा इति या अत्र वर्णिताः ॥

2. अग्निः, वायुः, आदित्यः, दिग्देवताः, ओषधिवनस्पतिदेवताः, चन्द्रः, मृत्युः, अब्देवता इत्येताः सर्वा विराट्पुरुषादुत्पन्ना इत्यतीते खण्ड उक्तम् ।

3. अत्र संसारशब्दोऽधिकः । अर्णवे संसारसमुद्रे इत्येवालम् ।

4. न हि संसारः काले प्रारभतेऽन्तं वा गच्छति-ब्र.सू. २-१-३६; ज्ञानेनैवास्य नाश इति भावः ॥ 5. महतान्वेषणेनाप्यस्य दृढा प्रतिष्ठा नोपलभ्यते सिकताकूपवत् । इदमज्ञानदृष्ट्या, यतः सम्यङ्निरूपिते ब्रह्मैवास्य प्रतिष्ठेति ज्ञायते ।

6. विषयेन्द्रियसंयोगजं सुखं क्षणिकम्, दुःखे च पर्यवस्यति ॥ 7. विष्णुपुराणे ५-६ इत्यादिस्थलेष्वीदृशनरकानां वर्णनमस्ति । 8. अनेन न केवलं दया, क्षान्तिः, अनसूयता, शौचम्, अनायासः, मङ्गलम्, अकार्पण्यम्, अस्पृहतेति गौतमस्मृत्युक्ता अष्ट आत्मगुणाः, अपि चामानित्वादिज्ञानसाधनानि ग्राह्याणि ।

देवताप्ययेनापि न मुक्तिः

३७. तस्मात् अग्न्यादिदेवताप्ययलक्षणापि या गतिर्व्याख्याता ज्ञानकर्मसमुच्चयानुष्ठानफलभूता (ऐ.आ.२-२-४)सापि नालं[1] संसार-दुःखोपशमाय इत्ययं विवक्षितोऽर्थोऽत्र। यतं एवम्, तस्मात् एवं विदित्वा, परं ब्रह्म, आत्मा आत्मनः सर्वभूतानां च, यो वक्ष्यमाणविशेषणः[2] प्रकृतश्च[3] जगदुत्पत्तिस्थितिसंहारहेतुत्वेन, स सर्वसंसारदुःखोपशमनाय वेदितव्यः। तस्मात् *एष पन्था एतत् कर्मैतद्ब्रह्मैतत्सत्यम्*[4] (ऐ.आ.२-१-१) यदेतत् परब्रह्मात्मज्ञानम्[5]। *नान्यः पन्था विद्यतेऽयनाय* (श्वे.३-८ अथवा ६-१५) इति मन्त्रवर्णात्॥

देवातानामशनायापिपासाभ्यां पीडा

३८. तं स्थान[6]करणदेवतोत्पत्तिबीजभूतं पुरुषं प्रथमोत्पादितं[7] पिण्डमात्मानम्[8] अशनायापिपासाभ्याम् अन्ववार्जत् अनुगमितवान्

---

1. न केवलमुपासनं किं तु कर्मसम्बन्धरहितमात्मज्ञानमप्यपेक्षितम्।

2. अस्या उपनिषदः तृतीयेऽध्याये प्रथमखण्डे।

3. उपक्रमे आत्मैकैवासीत्तस्मादेव सर्वमुत्पन्नमित्युक्तत्वात्, स एव सर्वेषामात्मेत्युक्तं भवति। उपसंहारेऽपि स एव विषयो वर्तते॥ 4. यद्यपि तस्मिन्नध्याये कर्मसम्बद्धं सगुणब्रह्मोपासनमुक्तं तथापि तादृशब्रह्मविज्ञानं संसारान्न मोचयतीत्यस्मिन्प्रकरणे ज्ञायमानत्वात् 'आत्मा वा इदम्' इति प्रक्रान्तब्रह्मात्म-ज्ञानस्य प्रशंसार्थं तद्वाक्यमित्यवधेयम्॥ 5. ब्रह्मैवात्मेति ज्ञानम् नोपासनम्, नापि कर्म।

6. इन्द्रियगोलकानि॥ 7. प्रथमशरीरिणमित्यर्थः।

8. विराट्पुरुषम्।

संयोजितवान् इत्यर्थः। तस्य कारणभूतस्य अशनायादिदोषवत्त्वात् तत्कार्यभूतानामपि देवतानाम्[1] अशनायादिमत्त्वम्। ताः ततः अशनायापिपासाभ्यां पीड्यमानाः एनं पितामहं[2] स्रष्टारम् अब्रुवन् उक्तवत्यः। आयतनम् अधिष्ठानं[3] नः अस्मभ्यं प्रजानीहि विधत्स्व। यस्मिन् आयतने प्रतिष्ठिताः समर्थाः सत्यः अन्नम् अदाम भक्षयाम इति॥

देवातानां योग्यमधिष्ठानम्

३९. एवमुक्त ईश्वरः-

ताभ्यो गामानयत् ता अब्रुवन् न वै नोऽयमलमिति। ताभ्योऽश्वमानयत् ता अब्रुवन् न वै नोऽयमलमिति॥ २॥

४०. ताभ्यः देवताभ्यः गां गवाकृतिविशिष्टं पिण्डं ताभ्य एवाद्भ्यः[4] पूर्ववत् पिण्डं समुद्धृत्य मूर्छयित्वा आनयत्[5] दर्शितवान्। ताः पुनः गवाकृतिं दृष्ट्वा अब्रुवन्। न वै नः अस्मदर्थम् अधिष्ठाय अन्नमत्तुम् अयं पिण्डः[6]

---

1. विराट्पुरुषोऽन्येषां जीवानां कारणमित्यतः तस्य स्वभावदोषोऽन्येष्वप्यनुवर्तत इत्यर्थः- बृ.१-४-१॥ 2. विराट्पुरुषो देवतानां पिता, तस्यापि पिता ईश्वरः।
3. शरीरम्। विराट्पुरुषस्य शरीरं समष्टिभूतम्। तत्र देवतानां न पृथक् पृथक् स्थानमस्ति। स पुरुषो देवतानां समष्टिरूपः॥ 4. अबिति यथापूर्वं व्याख्यातानि पञ्चभूतान्येव। आ विराट्पुरुषात् सर्वेषां प्राणिनां शरीराणि पाञ्चभौतिकानि।
5. 'आनीय तद्दर्शितवान्' इति स्थिते सरलान्वयो भवेत्।
6. अयम् इति मूलस्थं पुल्लिङ्गविशेषणं पिण्ड इति पुल्लिङ्गशब्दस्य विशेषणत्वेन स्वीकृतं भाष्यकारैः। गोविशेषणत्वे 'अयं गौः' इति व्याख्यातव्यम्।

अलं न वै। अलं पर्याप्तः। अत्तुं न योग्यः इत्यर्थः। गवि प्रत्याख्याते तथैव ताभ्यः अश्वम् आनयत्। ता अब्रुवन्। न वै नोऽयमलमिति। पूर्ववत्[1]॥

ताभ्यः पुरुषमानयत् ता अब्रुवन् सुकृतं बतेति। पुरुषो वाव सुकृतम्। ता अब्रवीद्यथायतनं प्रविशतेति॥ ३॥

४१. सर्वप्रत्याख्याने ताभ्यः पुरुषम् आनयत् स्वयोनिभूतम्। ताः स्वयोनिं[2] पुरुषं दृष्ट्वा अखिन्नाः[3] सत्यः सुकृतं शोभनं कृतम् इदमधिष्ठानं बत इत्यब्रुवन्। तस्मात् पुरुषो वाव पुरुष एव सुकृतम्। सर्वपुण्यकर्म-हेतुत्वात्[4]। स्वयं वा स्वेनैव आत्मना स्वमायाभिः कृतत्वात् सुकृत-मुच्यते[5]॥

---

1. प्रथमवाक्यवदेव अर्थो ग्राह्य इत्यर्थः। अथवा 'देवताः पूर्ववदेव अश्वो नालमिति प्रत्याख्यातवन्तः' इत्यपि अर्थः कल्पयितुं शक्यः।

2. अयं वा.॥ पाठः। देवतानां विराट्पुरुषः कारणम्। मनुष्यस्य विराडाकारत्वादेषोऽपि पुरुष इत्युच्यते।

3. सर्वासां देवतानामाश्रयभूताः सर्वे अवयवा मनुष्ये वर्तन्ते। मनुष्य एव सर्वेषां शास्त्रीयकर्मणामधिकारी। अतो मनुष्यदेहं दृष्ट्वा हर्षो जातः।

4. सुकृतकर्मानुष्ठानाय कारणभूतत्वान्मनुष्यशरीरं सुकृतमित्युच्यत इत्यर्थः।

5. यथा बृहदारण्यके २-५-१९ इत्यत्रोक्तम्, तथैव आत्मा आत्मानमेव आत्मनैव रूपान्तरमकुरुत अतो मनुष्यः सुकृतम्। स्वयं कृत आत्मा एव इत्यतः सुकृतम्। तै.२-७ द्रष्टव्यम्।

४२. ता देवताः ईश्वरः अब्रवीत् इष्टम् आसाम् इदमधिष्ठानम् इति मत्वा। सर्वे हि स्वयोनिषु[1] रमन्ते। अतः यथायतनं यस्य यत् वदनादि-क्रियायोग्यम्[2] आयतनम् तत् प्रविशत इति॥

अग्निर्वाग्भूत्वा मुखं प्राविशद्वायुः प्राणो भूत्वा नासिके प्राविशदादित्यश्चक्षुर्भूत्वाऽक्षिणी प्राविशद्दिशः श्रोत्रं भूत्वा कर्णौ प्राविशन्नोषधिवनस्पतयो लोमानि भूत्वा त्वचं प्राविशंश्चन्द्रमा मनो भूत्वा हृदयं प्राविशन्मृत्युरपानो भूत्वा नाभिं प्राविशदापो रेतो भूत्वा शिश्नं प्राविशन्॥ ४॥

४३. तथास्तु इति अनुज्ञां प्रतिलभ्य ईश्वरस्य[3], नगर्यामिव बलाधिकृतादयः, अग्निः वागभिमानिनी वागेव[4] भूत्वा स्वां योनिं मुखं प्राविशत्। तथा उक्तार्थम् अन्यत्। वायुर्नासिके, आदित्योऽक्षिणी, दिशः कर्णौ,ओषधिवनस्पतयस्त्वचम्, चन्द्रमा हृदयम्, मृत्युर्नाभिम्, आपः शिश्नं प्राविशन्॥

---

1. ये यस्मादुत्पन्नाः तेषां तत्र प्रीतिर्भवति। तत्तज्जातीनां प्राणिनां तत्तज्जातिप्राणिष्वेव प्रीतेरिदमेव कारणम्।
2. वक्ष्यमाणमन्त्रोक्तकरणकार्याणां निर्वर्तनाय।
3. 'ईश्वरस्य राज्ञोऽनुमतिं प्रतिलभ्य बलाधिकृतादय इव' इत्यप्यन्वेतुं शक्यते। ईश्वरशब्दः परमात्मनो राज्ञश्चोभयोः सामान्येनोपपद्यते।
4. वागधिष्ठात्रीभूत्वा वाचः प्रवृत्तिकारणभवनमेव वागेव भूत्वेत्युक्तम्। सू.भा.२-४-१४।

देवातानामशनायापिपासयोश्च नित्यः संबन्धः

४४. एवं लब्धाधिष्ठानासु देवतासु निरधिष्ठाने सत्यौ -

तमशनाया[1]पिपासे अब्रूतामावाभ्यामभिप्रजानीहीति। ते अब्रवीदेतास्वेव वां देवतास्वाभजाम्येतासु भागिन्यौ करोमीति। तस्माद्यस्यै कस्यै च देवतायै हविर्गृह्यते भागिन्यावेवास्या-मशनायापिपासे भवतः॥ ५॥

४५. अशानायापिपासे[2] तम् ईश्वरम् अब्रूताम् उक्तवत्यौ- आवाभ्याम् अधिष्ठानम् अभिप्रजानीहि चिन्तय विधत्स्व इत्यर्थः। स ईश्वरः एवमुक्तः ते अशनायापिपासे अब्रवीत्। न हि युवयोर्भावरूपत्वात्[3] चेतना-वद्वस्त्वनाश्रित्य अन्नात्तृत्वं संभवति। तस्मात् एतास्वेव अग्न्याद्यासु वां युवां देवतासु[4] अध्यात्माधिदेवतासु आभजामि वृत्तिसंविभागेन अनुगृह्णामि। एतासु भागिन्यौ यद्देवत्यो यो भागः हविरादिलक्षणः स्यात् तस्यास्तेनैव भागेन भागिन्यौ भागवत्यौ वां करोमि इति। सृष्ट्यादौ ईश्वरः एवं व्यदधात् यस्मात् तस्मात् इदानीमपि यस्यै कस्यै च देवतायै देवताया अर्थाय

---

1. मन्त्रे भाष्ये च 'अशनाया' इत्यस्य 'अशना' इति पाठः क्वचित्कोशेषु दृश्यते।
2. एते अपि देवते।
3. अशनायेति धर्मोऽशनायावति कस्मिंश्चि-द्धर्मिण्येवोपलब्धुं शक्यते, न तस्याः स्वतन्त्रा स्थितिः। पिपासाप्येवमेव।
4. एता देवता अध्यात्मरूपेण मनुष्यादिजीवेषु वर्तन्ते, अधिदेवतारूपेण विराट्पुरुषे वर्तन्ते। उभयोरप्येतयोरशनायापिपासे भवतः।

हविः[1] गृह्यते चरुपुरोडाशादिलक्षणम् भागिन्यावेव भागवत्यावेव अस्यां देवतायाम् अशनायापिपासे भवतः ॥

॥ इति द्वितीयः खण्डः ॥

तृतीयः खण्डः

अन्नस्य सृष्टिः, सृष्टौ आत्मनः प्रवेशः

स ईक्षतेमे नु लोकाश्च लोकपालाश्चान्नमेभ्यः सृजा इति ।। १ ।।

देवताभ्योऽन्नस्य सृष्टिः

४६. स एवमीश्वरः ईक्षत । कथम्? इमे नु लोकाश्च लोकपालाश्च मया सृष्टाः, अशनायापिपासाभ्यां[2] च संयोजिताः अतो नैषां स्थितिरन्नमन्तरेण । तस्मात् अन्नं एभ्यः लोकपालेभ्यः सृजै सृजे इति । एवं हि लोके ईश्वराणाम् अनुग्रहे निग्रहे च स्वातन्त्र्यं दृष्टं[3] स्वेषु । तद्वत् महेश्वरस्यापि सर्वेश्वरत्वात् सर्वान् प्रति निग्रहे अनुग्रहे च स्वातन्त्र्यमेव[4] ॥

सोऽपोऽभ्यतपत् ताभ्योऽभितप्ताभ्यो मूर्तिरजायत् । या वै सा मूर्तिरजायतान्नं वै तत् ॥ २ ॥

४७. स ईश्वरः अन्नं सिसृक्षुः ता एव पूर्वोक्ताः अपः[5] उद्दिश्य

---

1. अधिदेवतानां हविः, वागादीन्द्रियाश्रितानामन्नादि । अत्र हविरित्युपलक्षणमुभयसूचकम् ॥ 2. अशनायापिपासेति तृष्णाकामाविति आ.॥ टीका । तथापि तृष्णाकामाभिमानिन्यौ देवते एव ग्राह्ये इत्यभिप्रायः ॥ 3. लोकप्रसिद्धदृष्टान्तेन श्रुतिः ईश्वरस्य स्वातन्त्र्यं दर्शयतीति भावः ॥ 4. परमेश्वरः स्वतन्त्र इत्यतोऽन्येनाप्रार्थितोऽपि देवतानामनुग्रहार्थं स्वयमेवान्नमसृजतेत्यर्थः ॥ 5. पञ्चभूतराशिम् ।

अभ्यतपत् | ताभ्यः अभितप्ताभ्यः उपादानभूताभ्यः[1] मूर्तिः घनरूपं धारण-समर्थं[2] चराचरलक्षणम् अजायत् उत्पन्नम् | अन्नं वै तत् मूर्तिरूपं या वै सा मूर्तिः अजायत ||

तदेनत् सृष्टं पराङत्यजिघांसत् तद्वाचाजिघृक्षत् तन्नाशक्नोद्वाचा ग्रहीतुम् | स यद्धैनद्वाचाग्रहैष्यदभिव्याहृत्य हैवान्नमत्रप्स्यत् || ३ || तत्प्राणेना जिघृक्षत् तन्नाशक्नोत् प्राणेन ग्रहीतुम् | स यद्धैनत् प्राणेनाग्र हैष्यदभिप्राण्य हैवान्नमत्रप्स्यत् || ४ || तच्चक्षुषाजिघृक्षत् तन्नाशक्नो च्चक्षुषा ग्रहीतुम् | स यद्धैनच्चक्षुषाग्रहैष्यद्दृष्ट्वा हैवान्नमत्रप्स्यत् || ५ || तच्छ्रोत्रेणाजिघृक्षत् तन्नाशक्नोच्छ्रोत्रेण ग्रहीतुम् | स यद्धैनच्छ्रोत्रेणा ग्रहैष्यच्छ्रुत्वा हैवान्नमत्रप्स्यत् || ६ || तत्त्वचाजिघृक्षत् तन्नाशक्नोत्त्वचा ग्रहीतुम् | स यद्धैनत्त्वचाग्रहैष्यत् स्पृष्ट्वा हैवान्नमत्रप्स्यत् || ७ || तन्मनसाजिघृक्षत् तन्नाशक्नोन्मनसा ग्रहीतुम् | स यद्धैनन्मनसाग्रहैष्यद्ध्यात्वा हैवान्नमत्रप्स्यत् || ८ || तच्छिश्नेनाजिघृक्षत् तन्नाशक्नोच्छिश्नेन ग्रहीतुम् | स यद्धैनच्छिश्नेनाग्रहैष्यद्विसृज्य हैवान्नमत्रप्स्यत् || ९ ||

---

1. सर्वमन्नं भूतविकार एव |
2. स्थावरजङ्गमाः प्राणिनोऽन्नबलेनैव जीवितुमर्हन्ति |

अन्नस्य पलायनम्, तद्ग्रहणे प्रयत्नः

४८. तदेनत् अन्नं लोकपालानामर्थे[1] अभिमुखे सृष्टं सत्[2] यथा मूषकादिर्मार्जारादिगोचरे सन् 'मम मृत्युरन्नादः' इति मत्वा पराक् अञ्चतीति पराङ् सत् अत्तॄन् अतीत्य अजिघांसत् अतिगन्तुमैच्छत् पलायितुं प्रारभत इत्यर्थः। तम्[1] अन्नाभिप्रायं मत्वा स (लोक)लोकपालसङ्घातः[2] कार्यकरणलक्षणः[3] पिण्डः[4] प्रथमजत्वात्[5] अन्यांश्चान्नादान् अपश्यन्,[6] तत् अन्नं वाचा वदनव्यापारेण अजिघृक्षत् गृहीतुमैच्छत्। तत् अन्नं न अशक्नोत् न समर्थोऽभवत् वाचा वदनक्रियया ग्रहीतुम् उपादातुम्। स प्रथमजः शरीरी यत् यदि ह एनत् वाचा अग्रहैष्यत् गृहीतवान् स्यात् अन्नम्, सर्वोऽपि लोकः तत्कार्यभूतत्वात्[7] अभिव्याहृत्य हैव अन्नम् अत्रप्स्यत् तृप्तोऽभविष्यत्। न चैतदस्ति। अतो नाशक्नोत् वाचा ग्रहीतुम् इत्यवगच्छामः

---

1. 'लोकलोकपालानम्' इति पाठादयमेव वरीयान्। 'लोकपालान्नार्थ्यभिमुखे' इति वा.॥ पाठस्य लोकपालानामन्नार्थिनां पुरत इत्यर्थः॥ 2. सदिति स्थाने तदिति क्वचित् प्रमादपाठः॥ 1. अयं वा.॥ पाठः॥ 2. 'लोकपाल' इत्येव अलं स्यात् यतो विराट्पुरुषात् लोकपालाः सृष्टा इत्येव इतः पूर्वमुक्तम्॥ 3. लोकपाला इति न केवलचैतन्यस्वरूपम्; तत्तद्देहेन्द्रियाण्यपेक्ष्यैव तासां सा सा देवतेति वर्णनमिति भावः। एक एवात्मोपाधिविशेषेण विराट्पुरुषः, देवताः, मनुष्यादय इति विविधमवभासत इतीदं विशेषणं सूचयति। क्वचित्कोशेषु 'कार्यकारण' इति पाठस्यापि 'कार्यकरण' इत्येवार्थः ग्राह्यः, प्रमादपाठत्वेन वा॥ 4. विराट्पुरुषः॥ 5. *स वै शरीरी प्रथमः* इति स्मृतेः सूचना॥ 6. अन्यः कथमन्नमत्ति इति दर्शनाभावात् अन्नग्रहणक्रमो विविधयत्नैर्ज्ञातव्य इति प्राप्तम्॥ 7. व्यष्टिभूताः सर्वे जीवाः समष्टिभूतस्य

पूर्वजोऽपि ॥

४९. समानम् उत्तरम् । तत् प्राणेन, तच्चक्षुषा, तच्छ्रोत्रेण, तत् त्वचा, तन्मनसा, तच्छिश्नेन । तेन तेन करणव्यापारेण अन्नं ग्रहीतुमशक्नुवन् पश्चात् -

तदपानेनाजिघृक्षत् तदावयत् । सैषोऽन्नस्य ग्रहो यद्वायुरन्नायुर्वा एष यद्वायुः ॥ १० ॥

अन्नस्य ग्रहणम्

५०. अपानेन वायुना मुखच्छिद्रेण तत् अन्नम् अजिघृक्षत् तत् आवयत्[1] तत् अन्नम् एवं जग्राह अशितवान् । तेन स एषः अपानवायुः अन्नस्य ग्रहः अन्नग्राहक[2] इत्येतत् यद् वायुः यो वायुः । अन्नायुः अन्नबन्धनः[3] अन्नजीवनः वै प्रसिद्धम्[4] स एष यो वायुः ॥

स ईक्षत कथं न्विदं मदृते स्यादिति । स ईक्षत कतरेण प्रपद्या इति । स ईक्षत यदि वाचाभिव्याहृतं यदि प्राणेनाभिप्राणितं यदि

विराट्पुरुषस्य कार्यभूताः । कार्ये कारणधर्मानुवृत्तिदर्शननियमात् कारणरूपो विराट्पुरुषो यदि वदनव्यापारेणैव तृप्तोऽभविष्यत् तर्हि तत्कार्यभूता इदानींतनजना अपि तथैव तृप्ता अभविष्यन् । पूर्वत्र (भा.भा.३८) अशनायादिदोषविषये यदुक्तं तद्द्रष्टव्यम् ।

1. यथा वागादिव्यापारनिमित्तेन आत्मनो वक्ता, घ्राता इत्यादिव्यपदेशः तथैव प्राणस्य अपानवृत्तिव्यापारनिमित्तेन आत्मन 'आहारस्य अत्ता' इति व्यवहार इति, अशनायापिपासे प्राणोपाधिनिमित्तेनैव भवत इति चात्रोक्तं भवति ॥ 2. यस्मादावयत्तस्माद्वायुरिति वायुशब्दस्य 'वे'-धातोर्व्युत्पत्तिः कल्पिता ॥ 3. 'अन्नं दाम' (बृ.२-२-१) इत्यस्य सूचना ॥ 4. *यावद्ध्यस्मिञ्छरीरे प्राणो वसति तावदायुः* इति कौ.३-

चक्षुषा दृष्टं यदि श्रोत्रेण श्रुतं यदि त्वचा स्पृष्टं यदि मनसा ध्यातं यद्यपानेनाभ्यपानितं यदि शिश्नेन विसृष्टमथ कोऽहमिति ॥ ११ ॥

सृष्टौ प्रवेशः कर्तव्य इत्यात्मन ईक्षणम्

५१. स एवं लोकलोकपालसङ्घातस्थितिम् अन्ननिमित्तां कृत्वा पुरपौरतत्पालयितृस्थितिसमाम्, स्वामीव ईक्षत। कथं नु केन प्रकारेण इति वितर्कयन् इदं मदृते माम् अन्तरेण पुरस्वामिनम्, यदिदं कार्यकरण-सङ्घातकार्यं[1] वक्ष्यमाणं कथं नु खलु माम् अन्तरेण स्यात् परार्थं सत्[2]। यदि वाचाभिव्याहृतम् इत्यादि। केवलमेव वाग्व्यवहरणादि[3] तत् निरर्थकं न कथंचन भवेत्[4] बलिस्तुत्यादिवत् पौरवन्द्यादिभिः प्रयुज्यमानं स्वाम्यर्थं सत् स्वामिनमन्तरेण असत्येव स्वामिनि तद्वत्। तस्मात् मया परेण स्वामिना अधिष्ठात्रा कृताकृतफलसाक्षिभूतेन भोक्त्रा[5] भवितव्यम्, पुरस्येव राज्ञा ॥

२। यावदन्नं तावान्प्राणो भवति। तस्माद्वायुः अन्नायुः।

1. 'कार्यकरणसङ्घातं कार्यम्' इति आ.॥ पाठादयमेव वा.॥ पाठो वरीयान्।

2. अत्र मूलवाक्यं किञ्चित्परिणतमिति भाति। वाक्यस्यैवं योजना स्यात्-'ईक्षत कथं नु केन प्रकारेण नु इति वितर्कयन्'-एवं नुपदस्यार्थ उक्तो भवति। 'इदं महते मामन्तरेण पुरस्वामिनं-यदिदं कार्यकरणसङ्घातकार्यं वक्ष्यमाणं कथं नु खलु मामन्तरेण स्यात् परार्थं सत्?' अस्मिन् वाक्ये 'इदं कथं स्यात्' इत्यस्यार्थो विवृतः। यत्संहतं तत्परप्रयोजनाय भवति। अतः कार्यकरणव्यापारः यस्य प्रयोजनाय स एवात्मा इति भावः ॥ 3. इदं वाग्व्यवहारादिसिद्धिज्ञापकवाक्यमिति व्याख्यानकाराः। आत्मसिद्धिज्ञापकवाक्यमित्यस्माकं मतिः ॥ 4. यस्य प्रयोजनाय यत्, तत् तं विना स्वतन्त्रेण भवितुं नार्हति।

5. साक्षित्वमेव भोक्तृत्वम्, परमार्थतो भोक्तृत्वमविद्याकल्पितम्।

५२. यदि नाम एतत् संहतकार्यस्य परार्थत्वं[1] परम् अर्थिनं[2] मां चेतनम् अन्तरेण भवेत् पुरपौरकार्यमिव तत्स्वामिनम्[3] अथ कोऽहम् ? किंस्वरूपः? कस्य वा स्वामी? यद्यहं कार्यकरणसङ्घातम् अनुप्रविश्य वागाद्यभिव्याहृतादि फलं नोपलभेय राजेव पुरमाविश्य अधिकृतपुरुष-कृताकृतादिलक्षणम्, न कश्चित् माम् 'अयं सन्', 'एवंरूपश्चे'त्यधिगच्छेत् विचारयेत्[4] । विपर्यये तु 'योऽयं वागाद्यभिव्याहृतादि इदम् इति वेद'[5], 'स सन् वेदनरूपश्च'[6] इत्यधिगन्तव्योऽहं स्याम् । यदर्थमिदं संहतानां वागादीनाम् अभिव्याहृतादि यथा स्तम्भकुड्यादीनां प्रासादादिसंहतानां स्वावयवैरसंहतपरार्थत्वम्, तद्वत्[7] इति ॥

---

1. संहतकार्यं परार्थमित्यर्थः ॥ 2. अर्थी यः, स चेतनः । परार्थस्य जडवस्तुनो भोगः चेतनस्य भोक्तुरेव, न जडवस्तुनः । *न हि चन्दनकण्टककृते सुखदुःखे चन्दनकण्टकार्थे* इति उपदेशसाहस्रीगद्यभागे अवगतिप्रकरणे ।

3. कस्यापि प्रयोजनं विना व्यर्थं भवेत् ।

4. 'विचारयेदि' ति पदस्याभावेऽपि न दोषः । आत्मा वागादिद्वारेण बाह्यप्रपञ्चमुपलभत इत्यतोऽस्ति आत्मा य उपलब्धा, स च ज्ञानस्वरूप इति ज्ञातुं शक्यते ।

5. *यो वेदे-दमभिव्याहराणीति स आत्माभिव्याहाराय वाक्* (छां.८-१२-४) इत्यादिश्रुतिः सूचिता ।

6. ज्ञानकर्त्रन्तरेण ज्ञानक्रिया न संभवति । अतोऽस्त्यात्मा । आत्मनि ज्ञानाभावे स किमपि न जानीयात् । अतः स ज्ञानस्वरूप इत्याद्यनुमानाय वक्तृत्वादीनि साधकानि ।

7. स्तम्भकुड्यादयो न स्वात्मप्रयोजनाय सन्ति नापि संहतानां परस्परप्रयोजनाय । एवमेव वागादयोऽपीत्यर्थः ।

आत्मनः शरीरप्रवेशः

५३. एवम् ईक्षित्वा अतः *कतरेण*[1] *प्रपद्या इति* ? प्रपदं च मूर्धा च अस्य सङ्घातस्य प्रवेशमार्गौ। अनयोः कतरेण मार्गेण इदं कार्यकरण-सङ्घातलक्षणं पुरं प्रपद्यै प्रपद्येय इति॥

स एतमेव सीमानं विदार्यैतया द्वारा प्रापद्यत। सैषा विदृतिर्नाम द्वास्तदेतन्नान्दनम्। तस्य त्रय आवसथास्त्रयः स्वप्नाः। आय-मावसथोऽयमावसथोऽयमावसथ इति॥ १२॥

५४. एवम् ईक्षित्वा न तावत् मद्भृत्यस्य प्राणस्य मम सर्वार्थाधि-कृतस्य प्रवेशमार्गेण प्रपदाभ्याम्[2] अधः प्रपद्ये। किं तर्हि पारिशेष्यात् अस्य मूर्धानं विदार्य प्रपद्ये इति लोक इव ईक्षितकारी यः स्रष्टा ईश्वरः स एतमेव मूर्धसीमानं केशविभागावसानं विदार्य छिद्रं कृत्वा एतया द्वारा मार्गेण इमं लोकं कार्यकरणसङ्घातं प्रापद्यत प्रविवेश॥

५५. सेयं हि प्रसिद्धा द्वाः। मूर्ध्नि तैलादिधारणकाले अन्तस्तद्रसा-दिसंवेदनात्। सैषा विदृतिः विदारितत्वाद्[3] विदृतिः नाम प्रसिद्धा द्वाः।

---

1. अस्मात्प्राक् मूले 'स ईक्षत' इत्यस्ति। कुतश्चि-न्निमित्ताद्भाष्ये त्रुटितम्। 'स ईक्षत कतरेण प्रपद्या' इत्येतद्वाक्यं पाठक्रमेण द्वितीय-मप्यर्थक्रमेण तृतीयत्वाद्भाष्यकारैः तथैव व्याख्यातम्।

2. प्राणः प्रपदाभ्यां शरीरं प्राविशदिति ऐ.आ.२-१-४ इत्यत्रोक्तम्। तस्य क्रियाशक्तिप्रधानत्वात् स भृत्य इत्युक्तः॥

3. 'दृ विदारणे' इति धातोः। मूर्धानं विदार्य परमात्मनोऽन्तः प्रवेशादस्य मार्गस्य विदृतिरिति नाम।

इतराणि तु श्रोत्रादिद्वाराणि भृत्यादिस्थानीयसाधारणमार्गत्वात्[1] न समृद्धीनि नानन्दहेतूनि इदं तु द्वारं परमेश्वरस्यैव केवलस्य इति। तदेतत् नान्दनम् नन्दनमेव। नान्दनमिति दैर्घ्यं छान्दसम्। नन्दत्यनेन द्वारेण गत्वा परस्मिन् ब्रह्मणीति[2] ॥

आत्मनस्त्रय आवसथाः

५६. तस्य एवं सृष्ट्वा प्रविष्टस्य अनेन जीवेनात्मना[3] राज्ञ इव पुरम् त्रय आवसथाः। जागरितकाले इन्द्रियस्थानं दक्षिणं चक्षुः[4], स्वप्नकाले अन्तर्मनः, सुषुप्तिकाले हृदयाकाशः[4] इत्येते। वक्ष्यमाणा[6] वा त्रय आवसथाः पितृशरीरम्, मातृगर्भाशयः, स्वं च शरीरम् इति। त्रयः स्वप्नाः जाग्रत्स्वप्न-सुषुप्त्याख्याः। ननु जागरितं प्रबोधरूपत्वात्[7] न स्वप्नः। नैवम्, स्वप्न

---

1. सर्वेषां सञ्चारात्साधारण इत्युक्तम्।

2. उपासका मरणकाले सुषुम्नानाडीद्वारेण मूर्धानं विदार्य ब्रह्मलोकं गच्छन्तीति श्रुतिप्रसिद्धिः। अनेन मार्गेण गत्वा ज्ञानेन परं ब्रह्मापि प्राप्तुं शक्यते। इयं क्रममुक्तिः छां.भा.८-६-६, का.भा.२-३-१६, सू.भा.४-३-१०, ४-३-१४।

3. छां.६-३-२ इत्यस्य सूचना ॥ 4. छान्दोग्यादिश्रुतिषु दक्षिणेऽक्षिणि जीवसान्निध्यं दर्शितम्। इन्द्रियद्वारेण विषयाणां भोक्तेति तस्यार्थः। मां.का.भा.१-२ द्रष्टव्यम् ॥ 5. यद्यपि हार्दाकाशः परमात्मस्वरूप एव, तथाप्यज्ञानवशात् सुषुप्तित्वेनाभाति। छां.भा.३-१२-९. मां.का.भा.१-२। हृदयाकाश इति भूताकाश एवेति आ.॥ व्याख्यानमसमञ्जसमिति भाति ॥ 6. द्वितीयाध्याये।

7. स्वप्नसुषुप्तयोरुभयोरपि अप्रबोधस्य तुल्यत्वात् तावुभौ स्वप्नः (स्वापः) इति वक्तुं शक्यते, न तु जागरितमिति पूर्वपक्षिभावः।

एव। कथम्? परमार्थस्वात्मप्रबोधाभावात्, स्वप्नवत् असद्वस्तुदर्शनाच्च[1]। अयमेव आवसथः चक्षुर्दक्षिणं प्रथमः, मनोऽन्तरं द्वितीयः, हृदयाकाशस्तृतीयः। अयमावसथः इति उक्तानुकीर्तनमेव[2]। तेषु हि अयम् आवसथेषु पर्यायेण[3] आत्मभावेन वर्तमानः, अविद्यया दीर्घकालं गाढं प्रसुप्तः[4] स्वाभाविक्या[5] न प्रबुध्यते अनेकशतसहस्रानर्थसन्निपातजदुःखमुद्गराभिघातानुभवैरपि ॥

ब्रह्मसाक्षात्कारः

स जातो भूतान्यभिव्यैख्यत् किमिहान्यं वावदिषदिति। स एतमेव पुरुषं ब्रह्म ततममपश्यदिदमदर्शमिती ३ ॥ १३ ॥

५७. स जातः शरीरे प्रविष्टो[6] जीवात्मना भूतानि[7] अभिव्यैख्यत्

---

1. मां.भा.५ द्रष्टव्यम्। तत्त्वाप्रति-बोधः, अवस्थारहित आत्मन्यवस्थादर्शनं च तिसृणामप्यवस्थानां समानम्।

2. जीवस्य बाह्यावसथभ्रान्तिनिवारणाय उत्तरोत्तर मधोभावेन स्थितान् चक्षुरादीन् अङ्गुल्या निर्दिश्य 'अयमेकः आवसथः' इति दर्शित इति व्याख्यानकाराः। 'त्रय आवसथाः' इति पूर्वोक्तस्यैव 'अयमेक आवसथः' इति उच्यते। एते त्रय आवसथा अपि मिथ्याभूता इत्येव श्रुतौ प्रतिपादितमित्येव भाष्याभिप्राय इति स्पष्टम्।

3. पर्यायेणेति प्रतिपत्तिक्रमेण, न तु कालक्रमेण। मां.का.भा. १-१।

4. अनादिकालेन सुप्तः-मां.का.भा.१-१६।

5. अविचारितस्वभावेन सिद्धया।

6. शरीरोत्पत्तिरेवात्मनो जन्म-सू.भा.२-३-१६।

7. पञ्चभूतोत्पन्नशरीराणि।

व्याकरोत्[1] । स[2] कदाचित् परमकारुणिकेन आचार्येण आत्मज्ञानप्रबोध-कृच्छब्दकार्यां[3] वेदान्तमहाभेर्यां[4] तत्कर्णमूले ताड्यमानायाम्[5] एतमेव सृष्ट्यादिकर्तृत्वेन प्रकृतं[6] पुरुषं पुरि शयानम् आत्मानं ब्रह्म बृहत् ततमं तकारेणैकेन लुप्तेन तततमं व्याप्ततमं परिपूर्णम् आकाशवत् अपश्यत्

---

1. 'अभिव्यैख्यत्' इति कस्य धातोः किं रूपमिति स्पष्टं न ज्ञायते । 'व्याकरोत्' इत्यस्य भाष्यस्यार्थद्वयं व्याख्याने दर्शितम्- 'भूतान्येवाऽऽभिमुख्येन तादात्म्येन व्याकरोत् व्यक्तं ज्ञातवानुक्तवांश्च मनुष्योऽहं काणोऽहं सुख्यहमित्यादिप्रकारेण' इति प्रथमोऽर्थः । 'भूतानि व्याकरोत् विविच्याकरोत् । किमेषां स्वतः सत्तास्ति न वेति विचारितवान् इत्यर्थः' इति द्वितीयोऽर्थः । तत्र द्वितीयः समीचीन इति भाति ।

2. अत्र 'किमिहान्यं वावदिषत्' इत्यस्य भाष्यं लेखकप्रमादात् त्रुटितमिति भाति । वावदिषदित्यस्य व्याख्यानकारैर्व्याख्यातयोरर्थयोः वदिष्यामीत्येषोऽर्थः अस्माभिरादृतः । तेन 'अत्र किमन्यदात्मानो व्यतिरिक्तमस्तीति वदिष्यामीति ईक्षितवान्' इति तस्य वाक्यस्यार्थः । आत्मवस्तुनोऽन्यत्किंचिदस्तीति न शक्यते वक्तुमिति भावः । अनेन आगामि भाष्यमपि सङ्गच्छते ।

3. अयं वेदान्तविद्याविलासः, मद्रास् एतैर्मुद्रिततेलुगु-लिपिपाठः ।

4. 'वेदान्तमहावाक्यभेर्याम्' इति पाठमादृत्य तत्त्वमसीत्यादि-महावाक्यरूपभेर्यामिति व्याख्याने वर्णितः । परन्तु एतेषां वाक्यानां महावाक्यमिति व्यपदेशः प्रस्थानत्रयभाष्ये न कुत्राप्युपलभ्यते । महाभेर्यामिति पाठोऽलम् ।

5. सद्गुरोर्वचनादेवात्मसाक्षात्कारो भवति । तदर्थमभ्यासादिकं प्रयत्नान्तरं नापेक्षितमिति भावः । उप.सा.-१८ तमप्रकरणं द्रष्टव्यम् ।

6. लोकलोकपालान्सृष्ट्वा देवता अशनायापिपासाभ्यां संयोज्य शरीरान्तः प्रविष्ट इति योऽस्मिन्प्रकरण उक्तः ।

प्रत्यबुध्यत[1] । कथम् ? इदं ब्रह्म मम आत्मनः स्वरूपम् अदर्शं दृष्टवानस्मि । अहो इति विचारणार्था प्लुतिः[2] ॥

तस्मादिदन्द्रो नामेदन्द्रो ह वै नाम तमिदन्द्रं सन्तमिन्द्र इत्याचक्षते परोक्षेण परोक्षप्रिया इव हि देवाः परोक्षप्रिया इव हि देवाः ।। १४ ।।

५८. यस्मात् 'इदम्' इत्येवं यत् साक्षादपरोक्षात् ब्रह्म सर्वान्तरम्[3] अपश्यत् अपरोक्षेण तस्मात् इदं पश्यति इति इदन्द्रो नाम परमात्मा । इदन्द्रो ह वै नाम प्रसिद्धो लोके[4] ईश्वरः । तम् एवम् इदन्द्रं सन्तम् इन्द्रः इति परोक्षेण परोक्षाभिधानेन आचक्षते ब्रह्मविदः संव्यवहारार्थम् । पूज्यतमत्वात्[5] प्रत्यक्षनामग्रहणभयात् । तथा हि परोक्षप्रियाः परोक्षनाम-ग्रहणप्रियाः इव हि एव हि यस्मात् देवाः । किमुत सर्वदेवानामपि देवो महेश्वरः । द्विर्वचनं प्रकृताध्यायपरिसमाप्त्यर्थम् ॥

|| इति प्रथमोऽध्यायः ||

---

1. मुद्रितकोशेषु 'प्रत्यबुध्यत अपश्यत्' इत्येवास्ति । परन्तु 'अपश्यत् प्रत्यबुध्यत' इत्येव भवेत् । यतो पूर्वपदमुपनिषद्गतमपरं तद्व्याख्यानम् ।

2. 'विचार्यमाणानाम्' (पा.सू. ८-२-९७) विचार्यमाणानां वाक्यानामन्तिमस्वरस्य प्लुतो भवेदिति वेदे । 'पूर्वं तु भाषायाम्' (पा.सू.८-२-९८) इति सामान्यसंस्कृतभाषायां पूर्ववाक्यस्य स्वरस्य प्लुतो भवति । मुद्रितकोशेषु 'प्लुतिः पूर्वम्' इति पाठे पूर्वमित्यधिकम् । वे.वि. ॥ पाठ इदं नास्ति । विचारपूर्वकम् 'अयमात्मा ब्रह्म' इति ज्ञातवानिति भाष्याभिप्राय इति भाति ॥ 3. बृ.३-४-२ इत्यस्य सूचना ।

4. ब्रह्मवित्सु इत्यर्थः, न तु प्राकृतेषु ॥ 5. लोके पूज्यान् 'शास्त्रिणः', 'दीक्षिताः'

प्रथमाध्यायतात्पर्यविषये चर्चा

सृष्टिप्रवेशश्रुतेरेकात्मज्ञाने तात्पर्यम्

५९. अस्मिन् चतुर्थे[1] अध्याये एष वाक्यार्थः-जगदुत्पत्तिस्थिति-प्रलयकृत्, असंसारी[2], सर्वज्ञः, सर्वशक्तिः, सर्ववित्[3], सर्वमिदम् जगत् स्वतोऽन्यत् वस्त्वन्तरम् अनुपादायैव आकाशादिक्रमेण[4] सृष्ट्वा स्वात्मप्रबोधार्थं[5] सर्वाणि च प्राणादिमच्छरीराणि[6] स्वयं प्रविवेश। प्रविश्य च स्वम् आत्मानं यथा भूतम् 'इदं ब्रह्मास्मि' इति साक्षात् प्रत्यबुध्यत। तस्मात् स एव सर्वशरीरेष्वेक[7] एवात्मा नान्य इति। अन्योऽपि *स म आत्मा*(ऐ.आ.३-२-४)[8], *ब्रह्मास्मि*(बृ.१-४-१०) इत्येवं विद्यात् इति।

इत्येवं व्यपदिशन्ति। 'राम शास्त्रिणः', 'कृष्ण दीक्षिताः' इति साक्षात् नामग्रहणं धार्ष्ट्यमिति जना मन्यन्ते। तद्वदिहापि इदन्द्रमिति प्रत्यक्षनाम इन्द्र इति परोक्षनाम्ना परिणम्य व्यवहरन्तीत्यर्थः।

1. उपनिषदः प्रथमोऽध्याय आरण्यकक्रमेण चतुर्थोऽध्यायः॥ 2 विराट्पुरुषमशनायापिपासाभ्यां संयोजितवानित्युक्तत्वादात्मा संसारधर्मैरसंस्पृष्ट इत्युक्तं भवति॥ 3. मुं.२-२-६॥ 4. तैत्तिरीये (२-१) उक्तः क्रमोऽत्रापि सङ्गमनीयः॥

5. 'स्वात्मप्रबोधनार्थम्' इत्यस्मादयमेव पाठो वरीयान्। यतोऽज्ञानेन जीवत्वमापन्नः परमात्मा ज्ञानेन स्वमात्मानं विजानातीत्येषोऽर्थोऽत्र विवक्षितः।

6. प्राणकरणसंयुक्तानि।

7 एकं विशिष्टं शरीरं प्रविवेशेति श्रुतावश्रवणात्सर्वाणि शरीराणि प्रविवेशेत्यवगन्तव्यम्।

8. 'स म आत्मेति विद्यात्' (ऐ.आ.३-२-४)इति संहितोपनिषद्वाक्यस्यार्थोऽयम्। अस्य व्याख्यानमग्रे भविष्यति। सम इति सर्वभूतेष्वेक इति आ.॥ व्याख्यानमप्रकृतम्।

आत्मा वा इदमेक एवाग्र आसीत् (२-१ ऐ.आ. २-४-१), *ब्रह्म ततमम्* (२-३ ऐ.आ. २-४-३) इति चोक्तम्[1] | अन्यत्र च ||

प्रवेशश्रुतिरर्थवादः

६०. सर्वगतस्य सर्वात्मनो वालाग्रमात्रमपि अप्रविष्टं नास्ति इति कथं सीमानं विदार्य प्रापद्यत पिपीलिकेव सुषिरम् ? ननु अत्यल्पमिदं चोद्यम् | बहु चात्र चोदयितव्यम् | अकरणः सन् ईक्षत, अनुपादाय किञ्चित् लोकान् असृजत, अद्भ्यः पुरुषं समुद्धृत्य अमूर्छयत्, तस्य अभिध्यानात् मुखादि निर्भिन्नम्, मुखादिभ्यश्च अग्न्यादयो लोकपालाः | तेषां च अशनायापिपासादिसंयोजनम्, तदायतनप्रार्थनम्, तदर्थं गवादिप्रदर्शनम्, तेषां यथायतनप्रवेशनम्, सृष्टस्य अन्नस्य पलायनम्, वागादिभिस्तज्जिघृक्षा- इत्येतत् सर्वं सीमाविदारणप्रवेशसममेव ||

६१. अस्तु तर्हि सर्वमेवेदम् अनुपपन्नम् | न | अत्र आत्मावबोधमात्रस्य विवक्षितत्वात् सर्वोऽयम् अर्थवादः[2] इत्यदोषः | मायाविवद्वा[3], महामायावी देवः सर्वज्ञः सर्वशक्तिः सर्वमेतत् चकार | सुखावबोध-

---

1. उपक्रमोपसंहाराभ्यामात्मैकत्वमेव विवक्षितमिति निर्णीतम् |

2. यथा *प्रजापतिरात्मनो वपामुदखिदत् तामग्नौ प्रागृह्णात्* (तै.सं.२-१-१) इत्यादि-वेदवाक्यानि विहितकर्मणां प्रशंसार्थानि, तथात्मज्ञानप्रशंसार्थेयमाख्यायिका | आख्यायिकायास्तात्पर्याभावाद्युक्तिविरुद्धत्वेऽपि न दोषः |

3. मायायां युक्तिविरुद्धमपि दृश्येत | तस्मात् परमात्मा मायाविवद्वास्तवेनैवैवमसृजतेत्यपि ग्रहीतुं शक्यते | पूर्वोक्तः गुणवादः | अयं भूतार्थवादः-पुरा वृत्तायाः सृष्टेः कथनपूर्वकमात्मैक्यज्ञानस्य प्रशंसारूपोऽर्थवादः |

प्रतिपत्त्यर्थं लोकवदाख्यायिकाप्रपञ्चः[1] इति युक्ततरः पक्षः[2] । न हि सृष्ट्याख्यायिकादिपरिज्ञानात् किञ्चित् फलम् इष्यते । ऐकात्म्यस्वरूप-परिज्ञानात् तु अमृतत्वं फलं सर्वोपनिषत्प्रसिद्धम्[3] । स्मृतिषु च गीताद्यासु *समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरम्* (गी.१३-२७) इत्यादि[4] ॥

आक्षेपः – एकात्मज्ञानं प्रमाणविरुद्धम्

६२. ननु त्रय आत्मानः । भोक्ता कर्ता संसारी जीव एकः सर्वलोकशास्त्रप्रसिद्धः । अनेकप्राणिकर्मफलोपभोगयोग्यानेकाधिष्ठान-वल्लोकदेहनिर्माणेन लिङ्गेन यथाशास्त्रप्रदर्शितेन पुरप्रासादादिनिर्माण-लिङ्गेन[5] तद्विषयकौशलज्ञानवान् तत्कर्ता तक्षादिरिवेश्वरः सर्वज्ञो जगतः

---

1. 'आख्यायिकादिप्रपञ्चः' इति पाठे आदिपदमधिकमिति त्यक्तम् । समर्प्यमाणोऽर्थः श्रोतुश्चित्तस्य वशमियादित्याख्यायिकारूपेण बोधयति जनः लोके । अतः श्रुतिरपि कथाद्वारेण तत्त्वं बोधयति । 'सुखावबोधनप्रतिपत्त्यर्थम्' इति पाठमादृत्य सुखेन प्रतिपादनार्थं सुखेन प्रतिपत्त्यर्थं चेत्यर्थः कृतो व्याख्याने । सृष्टिकथनं ज्ञानोत्पादनार्थ-मेवेत्यतः 'प्रमाणभूता श्रुतिः कथं मायिकीं सृष्टिं कथयति' इत्याक्षेपो न युक्तः ।

2. सृष्टिर्नैवाभूदित्यतो मायिकी सेति कथनं युक्ततरम् ॥

3. श्रुतौ सृष्टिकथनं केषांश्चिदाख्यायिकानां कथनं चात्मज्ञानार्थमेव न त्वन्यफलार्थम् । सू.भा.१-४-१४, ३-४-२४, ४-३-१४ ॥

4 'इत्यादिना' इत्यस्मात् 'इत्यादि' इति वे. वि.॥ पाठो वरीयान् । 'इत्यादिषु' इति पाठो यदि स्यादितोऽपि सम्यगन्वियात् । गीतास्वस्य श्लोकस्यानन्तरश्लोकेन ज्ञानिनः परा गतिर्भवतीत्युक्तम् । अतो ज्ञानस्य फलवत्त्वं श्रुतिस्मृतिसिद्धम् । फलवज्ज्ञानवाक्यस्याफलं सृष्टिवाक्यमङ्गमिति युक्तम् ।

5. यथा धूम इति लिङ्गेन वह्निरनुमाय निश्चीयते, एवमेव जगदिति लिङ्गेन ईश्वरोऽनुमेयः ।

कर्ता द्वितीयश्चेतन आत्मा अवगम्यते[1] | *यतो वाचो निवर्तन्ते* (तै.२-९), *नेति नेति* (बृ.३-९-२६) इत्यादिशास्त्रप्रसिद्धः औपनिषदः पुरुषस्तृतीयः | एवम् एते त्रय आत्मानोऽन्योन्यविलक्षणाः | तत्र कथम् एक एवात्मा[2] अद्वितीयः संसारी इति ज्ञातुं शक्यते?

सिद्धान्तः-आत्मा न प्रत्यक्षस्यानुमानस्य वा विषयः

६३. तत्र जीव एव तावत् कथं ज्ञायते[3]? नन्वेवं ज्ञायते श्रोता मन्ता दृष्टा आदेष्टा आघोष्टा विज्ञाता प्रज्ञाता इति[4] | ननु विप्रतिषिद्धं ज्ञायते यः श्रवणादिकर्तृत्वेन अमतो मन्ता, अविज्ञातो विज्ञाता[5] इति च | तथा *न*

---

1. जीवः प्रत्यक्षगोचर ईश्वरस्तु शास्त्रोक्तेन जगत्कारणत्वलिङ्गेनानुमेय इति पूर्वपक्ष्यभिप्रायः |

2. एक एव आत्मा रूपत्रयेऽप्यस्तीति सिद्धान्ती वदेत् परन्तु अत्यन्तविलक्षणानि त्रीणि रूपाणि एकस्य आत्मनः कथं स्यात् ? इति पूर्वपक्षिण आक्षेपः | जगतः सृष्टिः, सृष्टेषु शरीरेषु आत्मनः प्रवेशः, ततो ब्रह्मणः साक्षात्कारः इत्येतत् कथनमात्म्यैक्यज्ञानाय इति सिद्धान्तिकथनमुद्दिश्य पूर्वपक्षी आत्मज्ञानं प्रत्यक्षम्, अनुमानम्, श्रुतिः इति प्रमाणत्रयेण विरुध्यत इति आक्षेपमुत्थापितवान् |

3. प्रथमं तावत् जीवात्मा एव न कस्यचित् प्रमाणस्य गोचरः, एवं स्थिते त्रय आत्मानः इति कथं निश्चयः स्यादिति सिद्धान्तिनः शङ्का |

4. *श्रोता मन्ता द्रष्टाऽऽदेष्टाऽऽघोष्टा विज्ञाता प्रज्ञाता सर्वेषां भूतानामन्तरपुरुषः स म आत्मेति विद्यात्* (ऐ.आ.३-२-४) इति श्रुतिवचनं प्रत्यक्षगोचरस्य जीवस्य विषय इति पूर्वपक्षिमतम् ‖ 5. *स योऽतोऽश्रुतोऽगतोऽमतोऽनतोऽदृष्टोऽविज्ञातोऽनादिष्टः* (ऐ.आ.३-२-४) इत्यस्य सूचना |

मतेर्मन्तारं मन्वीथा न विज्ञातेर्विज्ञातारं विजानीयाः (बृ.३-४-२) इत्यादि[1] च। सत्यं विप्रतिषिद्धम् यदि प्रत्यक्षेण ज्ञायेत सुखादिवत्[2]। प्रत्यक्षज्ञानं च निवार्यते *न मतेर्मन्तारम्* (बृ.३-४-२) इत्यादिना। ज्ञायते तु श्रवणादिलिङ्गेन[3]। तत्र कुतो विप्रतिषेधः? ननु श्रवणादिलिङ्गेनापि कथं ज्ञायते ? यावता यदा शृणोत्यात्मा श्रोतव्यं शब्दम्, तदा तस्य श्रवणक्रिययैव वर्तमानत्वात् मननविज्ञानक्रिये[4] न सम्भवत आत्मनि परत्र वा। तथा अन्यत्रापि मननादिक्रियासु[5]। श्रवणादिक्रियाश्च स्वविषयेष्वेव[6]। न हि

1. जीवात्मा ज्ञायत इति यत्तत् अश्रुतोऽमतः (ऐ.आ.३-२-४)इति ऐतरेयश्रुत्या, *न मतेर्मन्तारं मन्वीथाः* (बृ.३-४-२) इति बृहदारण्यकश्रुत्या च विरुद्ध्यते। तथा च सति जीवो ज्ञायत इति वचनं न सम्यगिति भावः।

2. तार्किकमतेन सुखादि मानसप्रत्यक्षगोचरम्। न तथात्मा प्रत्यक्षगम्य इति वयं वदाम इति पूर्वपक्ष्यभिप्रायः।

3. यः श्रोता स जीव इति श्रवणलिङ्गेनात्मानमनुमानप्रमाणेनावगन्तुं शक्यत इत्यभिप्रायः।

4. श्रवणक्रियायुक्तस्य तस्मिन्नेव काले मननक्रियापि न भवितुमर्हति। अतः 'अहं श्रवणक्रियां कुर्वन्नस्मि, इत्यतः अहं श्रवणकर्तृभूत आत्मा' इति अनुमानरूपमननक्रिया न सम्भवति। श्रवणक्रियाकालेऽन्यस्य विषयस्यानुमानं न सम्भवतीत्यस्य इदमेव कारणम्। श्रवणकाले क्रियान्तरस्यासम्भभवात् आत्मनोऽनुमानाय अवकाश एव नास्ति किल-इत्येव सिद्धान्तिनोऽभिप्रायः। 'अत्र मननविज्ञानशब्दाभ्यामनुमितिरुच्यते' इति व्याख्यानस्य भाष्याधारो न गम्यते।

5. मननकाले परस्य श्रवणविषयकस्य ज्ञानं न भवितुमर्हति, स्वस्य श्रवणक्रिया तु न भवत्येव॥ 6. श्रवणं शब्दविषयभूतं सन्न श्रोतृविषये भवति, मननमपि मन्तव्यविषयभूतं सन्न मन्तुर्विषये भवति। व्याख्यानकाराः श्रवणकाले यथा तद्विषयाणां

मन्तव्यादन्यत्र मन्तुर्मननक्रिया संभवति ॥

६४. ननु मनसः सर्वमेव मन्तव्यम् । सत्यमेवम् । तथापि सर्वमपि मन्तव्यं मन्तारमन्तरेण न मन्तुं शक्यम्[1] । यद्येवं किं स्यात्? इदमत्र स्यात् सर्वस्य योऽयं मन्ता, स मन्तैव इति न स मन्तव्यः स्यात् । न च द्वितीयो मन्तुर्मन्ता अस्ति । यदा स आत्मनैव मन्तव्यः, तदा येन च मन्तव्य आत्मा आत्मना, यश्च मन्तव्य आत्मा[2] तौ द्वौ प्रसज्येयाताम् । एक एव वा[3] आत्मा द्विधा मन्तृमन्तव्यत्वेन द्विशकली भवेत् वंशादिवत् । उभयथापि अनुपपत्तिरेव । यथा प्रदीपयोः प्रकाश्यप्रकाशकत्वानुपपत्तिः समत्वात्, तद्वत्[4] । न च मन्तुर्मन्तव्ये मननव्यापारशून्यः कालोऽस्ति आत्ममननाय ।

मननं न सम्भवति, एवमेव मननकालेऽपि तस्मिन् विषये मननक्रियान्तरं न सम्भवतीति विवृतवन्तः । लिङ्गं न करणं किंतु लिङ्गज्ञानमेव अनुमानाय करणं इति पूर्वपक्षमुत्थाप्य श्रवणादिलिङ्गविज्ञानं तत्तद्वृत्तिसम्बन्धभूतः साक्ष्येव भवतीत्यतः तस्य सत्ता अनुमानकालेऽपि भवेदेवेति समाधत्ते । परन्तु पूर्वपक्षी साक्षिणं नाभ्युपगच्छति, यदि अभ्युपगच्छेत् तर्हि प्रकृतविवाद एव न समभविष्यत् । अत एवंव्याख्यानस्यात्र नावकाशो विद्यते ॥ 1. आत्मा मनोव्यापारस्य गोचरो भवेदेव, मनसोऽगोचरभूतं वस्तु एव नास्तीति पूर्वपक्षिणोऽभिप्रायः । मानसप्रत्यक्षस्य वा मननलिङ्गेन क्रियमाणस्यानुमानस्य वा आत्मा न विषय इति सिद्धान्तिनोऽभिप्रायः । एतदग्रे विव्रियते ।

2. अत्र आत्मशब्दस्याभावेऽपि न दोषः ।

3. नास्ति क्वचित्पुस्तकेषु, आवश्यकं तु ।

4. आत्मात्मानं जानातीति विषयविषयिभावकल्पना व्यर्था दृष्टविरुद्धा च, प्रदीपौ परस्परं प्रकाशयत इतिवत् । दीपदृष्टान्तः उ.सा. गद्ये द्वितीये प्रकरणे द्रष्टव्यः ।

यदापि लिङ्गेन आत्मानं मनुते मन्ता तदापि[1] पूर्ववदेव लिङ्गेन मन्तव्य आत्मा (यः)[2] यश्च तस्य मन्ता तौ द्वौ प्रसज्येयाताम् । एक एव वा द्विधा इति पूर्वोक्तो दोषः ॥

आत्मनः श्रोतृत्वादिधर्माणां विषये शङ्का

६५. न प्रत्यक्षेण नापि अनुमानेन ज्ञायते चेत् कथम् उच्यते *स म आत्मेति विद्यात्* (ऐ.आ.३-२-४) इति, कथं वा *श्रोता मन्ता* (ऐ.आ.३-२-४) इत्यादि[3]? ननु श्रोतृत्वादिधर्मवान् आत्मा अश्रोतृत्वादि च प्रसिद्धम् आत्मनः । किमत्र विषमं पश्यसि[4]? यद्यपि तव न विषमम्, तथापि मम तु विषमं प्रतिभाति । कथम्? यदा असौ श्रोता तदा न मन्ता, यदा मन्ता तदा न श्रोता । तत्र एवं सति पक्षे श्रोता मन्ता, पक्षे न श्रोता नापि मन्ता । तथा अन्यत्रापि[5] । यदैवम् तदा श्रोतृत्वादिधर्मवान् आत्मा अश्रोतृत्वादि-धर्मवान् वा इति संशयस्थाने कथं तव न वैषम्यम्[6]? यदा देवदत्तो

---

1. स्वयं स्वात्मानं विषयीकरोतीत्येतदसाध्यम्; साध्यमित्यभ्युपगमेऽपि ।

2. मूलभाष्ये यःशब्दो लेखकप्रमादात् त्रुटितः ॥ 3. अविषयभूत आत्मा मम स्वरूपमिति वा स श्रोता मन्ता इति वा कथं ज्ञातुं शक्यते? अशक्यत्वपक्ष एतयोः श्रुतिवाक्ययोः का गतिः? इति आक्षेपः । अत्र व्याख्यानकाराः अग्रिमवाक्यस्य 'अश्रोतृत्वादि प्रसिद्धमनात्मनः' इति पाठान्तरं कल्पयित्वा इदं वाक्यमन्यथापि व्याख्यातवन्तः । एतस्य द्वितीयपक्षस्य आधारो नास्तीति अस्मन्मतिः ॥ 4. श्रुतिप्रामाण्यादुभयमपि सङ्गतमिति कुतो नाङ्गीकार्यमिति प्रश्नः ॥ 5. आत्मनि ताः क्रिया न नित्याः । 6. अत आत्मा श्रोतेति वा अश्रोतेति वा निश्चेतव्यः । श्रुतिरपि विरुद्धं धर्मद्वयमात्मनो न प्रतिपादयेदिति भावः ।

गच्छति तदा न स्थाता, गन्तैव। यदा तिष्ठति तदा न गन्ता स्थातैव। तदा अस्य पक्ष एव गन्तृत्वं स्थातृत्वं च, न नित्यं गन्तृत्वं स्थातृत्वं वा, तद्वत्॥

श्रोतृत्वादयो नात्मनः कादाचित्का धर्माः

६६. अत्र काणादादयः[1] पश्यन्ति। पक्षप्राप्तेनैव श्रोतृत्वादिना आत्मा उच्यते श्रोता मन्ता इत्यादि। संयोगजत्वम्[2] अयौगपद्यं[3] च ज्ञानस्य हि आचक्षते। दर्शयन्ति च *अन्यत्रमना अभूवं नादर्शम्* (बृ.१-५-३) इत्यादि, *युगपत् ज्ञानानुत्पत्तिर्मनसो लिङ्गम्* (न्या.सू.१-१-१६) इति च न्यायम्[4]॥

६७.भवत्वेवम्, किं तव नष्टं यद्येवं स्यात्? अस्त्वेवं तवेष्टं चेत्। श्रुत्यर्थस्तु न भवति। किं न 'श्रोता मन्ता' इत्यादि श्रुत्यर्थः[5]? न। 'न श्रोता न मन्ता' इत्यादिवचनात्[6]। ननु पाक्षिकत्वेन प्रत्युक्तं[7] (त्वया?)।

---

1. न केवलं वैशेषिकाः, नैयायिकाश्चैवमभिप्रयन्ति।

2. वै.सू.३-२-१, न्या.सू.१-१-४॥ 3. वै.सू.३-२-३ इत्यत्रायमभिप्राय उक्तः।

4. 'न्याय्यम्' इति पाठात् 'न्यायम्' इति पाठो वरीयान्। यतो अत्र काणादादयो युक्तिमेव दर्शयन्तीत्युक्तमस्ति। यदि मन इति पृथक् नाभविष्यत् तर्हि इन्द्रियाणां विषयैः संयोगमात्रेण सर्वाणि ज्ञानानि युगपदभविष्यन्। परन्तु इदानीं मनस्संयुक्तस्येन्द्रियस्यैव ज्ञानं भवति इति तेषां युक्तिः॥ 5. श्रुतौ तथोक्तं किलेति भावः॥ 6. बृ.४-३-२३ तः ४-३-३० पर्यन्तं द्रष्टव्यम्।

7. अत्र 'त्वया' इति नापेक्षितं न युक्तं च। यतः श्रोतृत्वं पाक्षिकमिति पूर्वपक्षिणोक्तं, न सिद्धान्तिना। काणादादिभिरुक्तं सिद्धान्तमङ्गीकृत्येत्थमभिप्रैति पूर्वपक्षी। व्याख्यानकारैस्तु त्वयेतिपाठमङ्गीकृत्यैवोपपादयितुं प्रयत्नः कृतः; परन्तु न सफलः स प्रयत्नः।

न। नित्यमेव[1] श्रोतृत्वाद्यभ्युपगमात्। *न हि श्रोतुः श्रुतेर्विपरिलोपो विद्यते* (बृ.४-३-२७) इत्यादिश्रुतेः[2] ॥

६८. एवं तर्हि नित्यमेव श्रोतृत्वाद्यभ्युपगमे प्रत्यक्षविरुद्धा युगपज्ज्ञानोत्पत्तिः अज्ञानाभावश्च आत्मनः कल्पितः स्यात्। तच्च अनिष्टम् इति। नोभयदोषोपपत्तिः। आत्मनः श्रुत्यादिश्रोतृत्वादिधर्मवत्त्वश्रुतेः[3]। अनित्यानां मूर्तानां च चक्षुरादीनां दृष्ट्यादि अनित्यमेव संयोगवियोगधर्मिणाम्। यथा अग्नेर्ज्वलनं तृणादिसंयोगजत्वात्, तद्वत्। न तु नित्यस्य अमूर्तस्य असंयोगविभागधर्मिणः संयोगजदृष्ट्याद्यनित्यधर्मवत्त्वं सम्भवति। तथा च श्रुतिः *न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते* (बृ.४-३-२३) इत्याद्या॥

६९. एवं तर्हि द्वे दृष्टी चक्षुषोऽनित्या दृष्टिः, नित्या चात्मनः। तथा च द्वे श्रुती श्रोत्रस्यानित्या, नित्या चात्मस्वरूपस्य। तथा द्वे मती विज्ञाती बाह्याबाह्ये। एवं ह्येव। तथा चेयं श्रुतिरुपपन्ना भवति *दृष्टे र्द्रष्टा श्रुतेः श्रोता* इत्याद्या। लोकेऽपि प्रसिद्धं चक्षुषस्तिमिरागमापाययोः 'नष्टा दृष्टिः', 'जाता दृष्टिः' इति चक्षुर्दृष्टेरनित्यत्वम्। तथा च श्रुतिमत्यादीनाम्। आत्मदृष्ट्यादीनां च नित्यत्वं प्रसिद्धमेव लोके[4]। वदति हि उद्धृतचक्षुः 'स्वप्ने अद्य मया

---

1. श्रोतृस्वरूपभूतायाः श्रुतेर्लोपाभावादित्यर्थः।

2. इदमेवात्मनः स्वरूपभूतं ज्ञानम्। एतदग्रे स्पष्टं भविष्यति।

3. बृ. ३-४-२।

4. यद्यपि आत्मनो दृष्टिर्नित्येति न लोके प्रसिद्धिः, तथापि वक्ष्यमाणानुभवबलेन सा नित्या इति ज्ञायते इत्यत आत्मनो दृष्टेर्नित्यत्वं प्रसिद्धमित्युक्तमिति मन्तव्यम्।

भ्राता दृष्टः' इति । तथा अवगतबाधिर्यः 'स्वप्ने श्रुतो मन्त्रोऽद्य' इत्यादि[1] । यदि चक्षुःसंयोगजैव आत्मनोऽनित्या दृष्टिः तन्नाशे नश्येत्, तदा उद्धृतचक्षुः स्वप्ने नीलपीतादि न पश्येत् । *न हि द्रष्टुर्दृष्टेः* (बृ, ४-३-२३) इत्याद्या च श्रुतिः अनुपपन्ना स्यात् । *तच्चक्षुः पुरुषे येन स्वप्ने पश्यति*(?) इत्याद्या[2] च श्रुतिः ॥

७०. नित्या आत्मनो दृष्टिर्बाह्यानित्यदृष्टेर्ग्राहिका । बाह्यदृष्टेश्च उपजनापायाद्यनित्यधर्मवत्त्वात् तद्ग्राहिकाया आत्मदृष्टेस्तद्वदवभासत्वम् अनित्यत्वादि[3](?) भ्रान्तिनिमित्तं लोकस्य इति युक्तम् । यथा भ्रमणादि-धर्मवदलातादिवस्तुविषयदृष्टिरपि भ्रमतीव, तद्वत् । तथा च श्रुतिः *ध्यायतीव लेलायतीव* (बृ.४-३-७) इति । तस्मात् आत्मदृष्टेर्नित्यत्वात्[4] न यौगपद्यम् अयौगपद्यं वा अस्ति ॥

आत्मविषये भ्रान्तेः कारणम्

७१. बाह्यानित्यदृष्ट्युपाधिवशात्तु[5] लोकस्य, तार्किकाणां[6] च

---

1. अत्र 'इति, इत्यादि' इति पाठे स्थिते, 'इमं गन्धम् घ्रातवान्, इमं रसमास्वादितवान्' इत्यादि तत्तदिन्द्रियसामर्थ्यरहिता अपि तथा वदन्तीत्यर्थस्वारस्यं प्रकटितं भवति । 2. 'इत्याद्या' इति पदेन अस्यामेव श्रुतौ विद्यमानानि इतराणि वाक्यानि गृहीतव्यानि इत्यर्थः । तद्यथा *तच्छ्रोत्रं येन स्वप्ने शृणोति* इत्यादीनि वाक्यानीत्यवगन्तव्यम् । केयं श्रुतिरिति न ज्ञायते । अस्याः श्रुतेरेकं वाक्यं केनोपनिषद्भाष्ये (१-५) उदाहृतमस्ति । उपदेशसाहस्रीपद्यभागेऽपि १७-१४, १५ इयं श्रुतिरुदाहृता ॥ 3. अत्र आदि-शब्दोऽधिकः ॥ 4. ज्ञानं नित्यं सत् कालमपि विषयीकरोति ॥ 5. उपाधि-दृष्ट्यैव वीक्षणात् ॥ 6. वैशेषिकादीनाम्; वेदान्तवाक्यमेकमेव प्रमाणमात्मस्वरूप-

आगमसंप्रदायवर्जितत्वात्[1] 'अनित्या आत्मनो दृष्टिः' इति भ्रान्तिरुपपन्नैव। जीवेश्वरपरमात्मभेदकल्पना[2] च एतन्निमित्तैव। तथा[3] अस्ति नास्तीत्याद्याश्च यावन्तो वाङ्मनसयोर्भेदाः यत्रैकं भवन्ति[4] तद्विषयायाः[5] नित्याया दृष्टेर्निर्विशेषायाः। अस्ति नास्ति, एकं नाना, गुणवत् अगुणम्, जानाति न जानाति, क्रियावत् अक्रियम्, फलवत् अफलम्, सबीजं निर्बीजम्[6], सुखं दुःखम्, मध्यम् अमध्यम्[7], शून्यम् अशून्यम्, परोऽहम् अन्यः[8] इति वा सर्ववाक्प्रत्ययागोचरे स्वरूपे यो विकल्पयितुमिच्छति[9], स नूनं खमपि चर्मवद् वेष्टयितुमिच्छति, सोपानमिव च पद्भ्याम् आरोढुम्। जले खे च मीनानां वायसां च पदं दिदृक्षते[10]। *नेति नेति* (बृ.२-३-६), *यतो वाचो निवर्तन्ते* (तै.२-९) इत्यादिश्रुतिभ्यः, *को अद्धा वेद* (ऋ.१०-१२९-६)

बोधनायेत्यनभ्युपगच्छतां स्वतन्त्रतर्कवादिनाम्।

1. अवगतश्रुत्यर्थस्याचार्यस्योपदेशाभावात्॥ 2. यद्यपि तार्किका ईश्वरादन्यः परमात्मा इति नाभ्युपगच्छन्ति, तथापि केचन वेदान्तिन एवमभ्युपगतवन्तः। प्रकृतपूर्वपक्षेऽयमङ्गीकारोऽस्ति। जीवानां परस्परभेदः, जीवेश्वरभेदः, जीवेश्वरयोः परमात्मनश्च भेद इति पक्षत्रयमपि संप्रदायविरुद्धमिति भावः॥ 3. उपाधिवशंगतानां दृष्ट्यैव॥ 4. वाङ्मनसयोर्भेदा वस्तुतस्त्वात्मैव। *सर्वे वेदा यत्रैकं भवन्ति* (तै.आ.३-११-१) इत्यस्य अभिप्रायः॥ 5. तस्मिन्नात्मनि विद्यमानायाः।
6. बीजमिति धर्माधर्मौ, फलमिति शरीरम्॥ 7. मध्यमिति मध्यमपरिमाणवानिति आ.॥ व्याख्यानम्॥ 8. मत्तः परोऽयम्, अहं ततोऽन्यः- इति आ.॥ व्याख्या।
9. विविधं कल्पयितुं प्रयतते।
10. निर्विकल्पे वस्तुनि नैकापि कल्पना भवितुमर्हतीति भावः।

इत्यादिमन्त्रवर्णात्[1] ॥

आत्मवेदनप्रकारः

७२. कथं तर्हि तस्य 'स म आत्मा' इति वेदनम् ? ब्रूहि केन प्रकारेण[2] तम् अहं 'स म आत्मा' इति विद्याम्। अत्र आख्यायिकाम् आचक्षते। कश्चित् किल मनुष्यो मुग्धः कैश्चिदुक्तः कस्मिंश्चिदपराधे सति 'धिक् त्वाम्, नासि मनुष्यः' इति। स मुग्धतया आत्मनो मनुष्यत्वं प्रत्याययितुं कंचित् उपेत्य आह 'ब्रवीतु भवान् कोऽहमस्मि' इति। स तस्य मुग्धतां ज्ञात्वा आह 'क्रमेण बोधयिष्यामि' इति। स्थावराद्यात्मभावम् अपोह्य 'न त्वम् अमनुष्यः' इत्युक्त्वा उपरराम। स तं मुग्धः प्रत्याह – 'भवान् मां बोधयितुं प्रवृत्तस्तूष्णीं बभूव। किं न बोधयति?' इति। तादृगेव तत् भवतो वचनम्। 'नासि अमुनुष्यः' इत्युक्तेऽपि मनुष्यत्वम् आत्मनो न प्रतिपद्यते यः, स कथं 'मनुष्योऽसि' इत्युक्तोऽपि मनुष्यत्वम् आत्मनः प्रतिपद्येत[3]?

तस्मात् यथाशास्त्रोपदेश[4] एवात्मावबोधविधिः, नान्यः। न हि

---

1. आत्मवस्त्वित्थमिति निर्णेतुमशक्यमित्यनेन मन्त्रेणाभिप्रेतम्।

2. येन केन प्रकारेण विदितेऽप्यात्मनि कश्चिद्विकल्पः कृत इति भवत्येव। परन्तु विकल्पे कृत आत्मस्वरूपं न ज्ञातं भवतीति भवान् वक्ष्यति किल–इति पूर्वपक्ष्याशयः।

3. निषेधरूपं विहाय विधिरूपेण उपदेशे कृते किं विशेषाधिक्यम् ?

4. अनात्माध्योरोपणस्य निराकरणेनैव।

अग्नेर्दाह्यं तृणादि अन्येन केनचित् दग्धुं शक्यम्[1] । अत एव शास्त्रम् आत्मस्वरूपं बोधयितुं प्रवृत्तं सत् अमनुष्यत्वप्रतिषेधेनेव *नेति नेति* (बृ.२-३-६) इत्युक्त्वा उपरराम । तथा *अनन्तरमबाह्यम्......अयमात्मा ब्रह्म सर्वानुभूरित्यनुशासनम्*[2] (बृ.२-५-१९) *तत्त्वमसि*[3] (छां.६-८-७), *यत्र त्वस्य सर्वमात्मैवाभूत् तत् केन कं पश्येत* (बृ. ४-५-१५) इत्येवमाद्यपि च ॥

॥ इति प्रथमाध्यायतात्पर्यविषये चर्चा ॥

---

1. एवमेव शास्त्रबोध्यमात्मानं नान्यत्प्रमाणं बोधयितुं शक्नुयात् ।

2. निषेधरूपेण बोधितं ब्रह्मैवात्मस्वरूपम् । तन्नान्येन प्रकारेण बोधयितुं शक्यते ।

3. अस्मिन्वाक्ये त्वमित्याख्यस्य संसारिस्वरूपस्य प्रत्याख्यानेनैव निर्विशेषब्रह्मस्वरूपं बोधितमिति भावः । मां.भा.७ द्रष्टव्यम् ।

अथ द्वितीयोऽध्यायः

जीवस्य बन्धमोक्षौ

उत्तरग्रन्थस्यावतरणिका

७३. यावदयम् एवं यथोक्तम् इमम् आत्मानं न वेत्ति, तावत् अयं बाह्यानित्यदृष्टिलक्षणम् उपाधिमात्मत्वेन उपेत्य[1] अविद्यया उपाधिधर्मान् आत्मनो मन्यमानः ब्रह्मादिस्तम्बपर्यन्तेषु देवतिर्यङ्नरस्थानेषु[2] पुनः-पुनरावर्तमानः अविद्याकामकर्मवशात् संसरति। स एवं संसरन् उपात्तदेहेन्द्रियसङ्घातं त्यजति। त्यक्त्वा अन्यम् उपादत्ते। पुनःपुनरेवमेव नदीस्रोतोवत् जन्ममरणप्रबन्धाविच्छेदेन वर्तमानः काभिरवस्थाभिर्वर्तते? इत्येतम् अर्थं दर्शयन्ती आह श्रुतिर्वैराग्यहेतोः[3]-

पुरुषे ह वा अयमादितो गर्भो भवति यदेतद्रेतः। तदेतत्सर्वेभ्योऽङ्गेभ्यस्तेजः सम्भूतमात्मन्येवात्मानं बिभर्ति तद्यदा स्त्रियां सिञ्चत्यथैनज्जनयति तदस्य प्रथमं जन्म ॥ १ ॥

पुरुषस्य प्रथमं जन्म

७४. अयमेव[4] अविद्याकामकर्माभिमानवान्[5] यज्ञादि कर्म कृत्वा

---

1. अनित्यदृष्टिवृत्तिमदन्तःकरणादिषु अहंममेति अभिमानं कृत्वा।

2. 'देवतिर्यङ्निरयः...' इति पाठस्य देवताः प्राणिनः नरकम् इति स्थानेषु इत्यर्थः। 'देवतिर्यगादि...' इत्यपि पाठोऽस्ति॥ 3. संसारवर्णनं न संसारस्य सत्यत्वप्रतिपादनाय, किन्तु जीवाः संसाराद्वैराग्यं प्राप्य आत्मज्ञानं संपादयेयुरिति उद्देशेनैव-सू.भा.३-१-१॥ 4. सीमानं विदार्यान्तःप्रविष्ट आत्मा एवाविद्यया संसारीत्यवभासमानः।

5. न हि परमार्थत आत्मनोऽविद्याकामकर्मणां सम्बन्धोऽस्ति। अभिमानेनैव ते तस्य

अस्माल्लोकात् धूमादिक्रमेण चन्द्रमसं प्राप्य क्षीणकर्मा वृष्ट्यादिक्रमेण इमं लोकं प्राप्य अन्नभूतः पुरुषाग्नौ हुतः[1] । तस्मिन् पुरुषे ह वै अयं संसारी रसादिक्रमेण[2] आदितः प्रथमतो[3] रेतोरूपेण गर्भो भवति इत्येतदाह- यदेतत् पुरुषे रेतः तेन रूपेण इति । तच्चैतत् रेतः अन्नमयस्य पिण्डस्य सर्वेभ्यः अङ्गेभ्यः अवयवेभ्यः[4] रसादिलक्षणेभ्यः तेज साररूपं शरीरस्य संभूतं परिनिष्पन्नं तत् पुरुषस्य आत्मभूतत्वात्[5] आत्मा । तम् आत्मानं रेतोरूपेण गर्भीभूतम्[6] आत्मन्येव स्वशरीरे एवात्मानं[7] बिभर्ति धारयति । तत् रेतः यदा यस्मिन् काले भार्या ऋतुमती तस्यां योषाग्नौ[8] स्त्रियां सिञ्चति उपगच्छन् । अथ तदा एनत् एतद्रेतः आत्मनो गर्भभूतं जनयति[9] पिता । तत् अस्य पुरुषस्य स्थानात् निर्गमनं रेतःसेककाले रेतोरूपेण

धर्मत्वेनावभासन्ते ।

1. छान्दोग्ये पञ्चमाध्याये वर्णितायाः पञ्चाग्निविद्यायाः सारोऽयम् । पूर्वम् ऐ.आ.२-१-३ इत्यत्र वर्णिता रेतस्सृष्टिरपि मन्त्रेणोल्लेखितेति वक्तुं शक्यम् ।

2. रसरक्तमांसमेदोऽस्थिमज्जा-इति क्रमेणैकैको धातुर्भूत्वा मज्जाया रेतो भवति ।

3. स्त्रीगर्भात्पूर्वम् ॥ 4. धातुभ्यः ॥ 5. तस्य शरीरेण सह एकीभूतत्वात् ।

6. अस्मिन् उपनिषद्भागे गर्भस्य वर्णनमस्ति । एतत् गर्भिण्यो न शृणुयुरिति ज्ञापनार्थं *अपक्रामन्तु गर्भिण्यः* इति वाक्यं प्रथममन्त्रस्य आरम्भात् प्रागस्ति । अध्यायस्यान्ते च *यथास्थानं गर्भिण्यः* इति वाक्यमस्ति । भाष्यकारास्तु वाक्यद्वयस्यापि व्याख्यानं न कृतवन्तः । अत एते सम्प्रदायागतवैदिकभागान्तर्गते वेति विद्वद्भिः परिशीलनीये ।

7. शब्दसम्बन्धं सूचयितुं पुनः 'आत्मानम्' इति प्रयोगो भाष्ये ।

8. छां.५-७-१ इत्यस्य सूचना ॥ 9. बहिःकरोति ।

अस्य संसारिणः प्रथमं जन्म प्रथमावस्थाभिव्यक्तिः। तदेतदुक्तं पुरस्तात् *असावात्मा अमुमात्मानम्* (ऐ.आ.२-३-७) इत्यादिना[1] ॥

पुरुषस्य द्वितीयं जन्म

तत् स्त्रिया आत्मभूयं गच्छति यथा स्वमङ्गं तथा। तस्मादेनां न हिनस्ति सास्यैतमात्मानमत्र गतं भावयति॥ २॥

७५. तत् रेतः यस्यां स्त्रियां सिक्तं सत्[2] तस्या आत्मभूयम् आत्मा-व्यतिरेकतां यथा पितुः एवम्, गच्छति प्राप्नोति यथा स्वम् अङ्गं स्तनादि तथा तद्वदेव। तस्मात् हेतोः एनां मातरं स गर्भः न हिनस्ति पिटकादिवत्। यस्मात् स्तनादि स्वाङ्गवत् आत्मभूयं गतम्, तस्मात् न हिनस्ति न बाधते इत्यर्थः। सा अन्तर्वत्नी एतम् अस्य भर्तुः आत्मानम् अत्र आत्मन उदरे गतं प्रविष्टं बुद्ध्वा भावयति वर्धयति परिपालयति गर्भविरुद्धाशनादिपरिहारम् अनुकूलाशनाद्युपयोगं च कुर्वती॥

सा भावयित्री भावयितव्या भवति। तं स्त्री गर्भं बिभर्ति सोऽग्र एव कुमारं जन्मनोऽग्रेऽधि भावयति। स यत्कुमारं जन्मनोऽग्रेऽधि

---

1. असावात्मा (पुरुषदेहः) अमुमात्मानं (स्वदेहस्य एकदेशभूतं) अस्मा आत्मने (स्त्री देहाय) संप्रयच्छति इति मन्त्रार्थः। अस्मिन्मन्त्रे पुरुषं गर्भं च उभौ 'आत्मा' इत्येव व्यपदिशति श्रुतिः। रेतः पुरुषस्य शरीरमेव इत्यतः पुरुषं न हिनस्ति इति आत्मशब्दः सूचयति। एवमेव तत् स्त्रियमपि न हिनस्ति। अग्रिममन्त्रो द्रष्टव्यः।

2. 'यस्याम्' इति स्थाने 'तस्याम्' इति अथवा, 'सत्' इति स्थाने 'आसीत्' इति स्थिते सुखान्वयो भवेत्।

भावयत्यात्मानमेव तद् भावयत्येषां लोकानां सन्तत्या एवं सन्तता हीमे लोकास्तदस्य द्वितीयं जन्म॥ ३ ॥

७६. सा भावयित्री वर्धयित्री भर्तुरात्मनो गर्भभूतस्य भावयितव्या वर्धयितव्या[1] च भर्त्रा भवति। न हि उपकारप्रत्युपकारमन्तरेण लोके कस्यचित् केनचित् संबन्ध उपपद्यते। तं गर्भं स्त्री यथोक्तेन गर्भधारण-विधानेन बिभर्ति धारयति अग्रे[2] प्राग् जन्मनः। स पिता अग्रे एव पूर्वमेव जातमात्रं कुमारं जन्मनः अधि ऊर्ध्वं जन्मनः जातं कुमारं जातकर्मादिना पिता[3] भावयति। स पिता (यत् यस्मात् ?)[4] कुमारं जन्मनः अधि ऊर्ध्वम् अग्रे जातमात्रमेव जातकर्मादिना यद् भावयति तत् आत्मानमेव भावयति। पितुरात्मैव हि पुत्ररूपेण जायते। तथा ह्युक्तम् *पतिर्जायां प्रविशति* (ऐ. ब्रा.३३-९)[5] इत्यादि। तत् किमर्थम् आत्मानं पुत्ररूपेण जनयित्वा भावयति इति? उच्यते। एषां लोकानां सन्तत्यै अविच्छेदाय

---

1. 'रक्षयितव्या' इति पाठान्तरस्य पालयितव्येत्यर्थः।

2. भाष्यानुसारेणोपनिषद्गतमेकम् अग्रेपदं स्त्रिया सहान्वेति; अपरम् अग्रेपदं पितृविषयकः, स कुमारस्य जन्मानन्तरं जन्मकालप्रभृति कुमारं पालयतीति दर्शयति। व्याख्याने तु, जन्मनः प्राक् सीमन्तादिना, जन्मकाले मन्त्रजलप्रोक्षणादिना, तदनन्तरं जातकर्मादिनेति अग्रे, अग्रे, ऊर्ध्वम् इति पदानां स्वारस्यं दर्शितम्।

3. भाष्ये कुमारं पिता इति द्विरुक्तिः शब्दसम्बन्धज्ञापनायेति बोध्यम्।

4. 'यत् यस्मात्' इति नापेक्षितः 'यत् तत्' इत्येवालम्।

5. ऐ.ब्रा. वाक्यमिदमिति मनुस्मृतौ (९-८) कुल्लूकव्याख्यानेऽस्ति। पतिर्जायायां गर्भरूपेण जायते इत्यतः पत्नी जाया उच्यते।

इत्यर्थः | विच्छिद्येरन् हि इमे लोकाः पुत्रोत्पादनादि यदि न कुर्युः केचन | एवं पुत्रोत्पादनादिकर्माविच्छेदेनैव सन्तताः प्रबन्धरूपेण वर्तन्ते हि यस्मात् इमे लोकाः तस्मात् तदविच्छेदाय तत् कर्तव्यम् न मोक्षाय[1] इत्यर्थः | तत् अस्य संसारिणः कुमाररूपेण मातुरुदरात् यत् निर्गमनम् तत् रेतोरूपापेक्षया द्वितीयं जन्म द्वितीयावस्थाभिव्यक्तिः ||

पुरुषस्य तृतीयं जन्म

सोऽस्यायमात्मा पुण्येभ्यः कर्मभ्यः प्रतिधीयते | अथास्यायमितर आत्मा कृतकृत्यो वयोगतः प्रैति स इतः प्रयन्नेव पुनर्जायते तदस्य तृतीयं जन्म || ४ ||

७७. अस्य पितुः सोऽयं पुत्रात्मा पुण्येभ्यः शास्त्रोक्तेभ्यः कर्मभ्यः कर्मनिष्पादनार्थं प्रतिधीयते पितुः स्थाने, पित्रा यत् कर्तव्यं तत्करणाय प्रतिनिधीयते इत्यर्थः | तथा च संप्रत्तिविद्यायां[2] वाजसनेयके पित्रा अनुशिष्टः *अहं ब्रह्म, अहं यज्ञः* (बृ.१-५-१७) इत्यादि प्रतिपद्यते इति | अथ अनन्तरं पुत्रे निवेश्य आत्मनो भारम् अस्य पुत्रस्य इतरः अयं यः पित्रात्मा कृतकृत्यः कर्तव्यात् ऋणत्रयात्[3] विमुक्तः कृतकर्तव्यः इत्यर्थः | वयोगतः गतवयाः

---

1. पुरुषः स्वस्य शरीरात्मा अस्मिन्लोके विच्छित्तिं विना नानारूपेण वर्तमान एव स्यादिति वाञ्छति | पुत्रपौत्रसन्तत्या मनुष्यलोको वशीकर्तव्य इति प्रयतमान एवमाचरति | अनेन सन्तानेन मोक्षो न भवतीति कथनं वैराग्येण आत्मज्ञानं प्रतिपत्तव्यमिति बोधनाय ||

2. पिता पुत्रे स्वानुष्ठितानि कर्माणि कर्तुमधिकारस्य संप्रदानं करोति | तत्संप्रत्तिकर्म ||

3. अपाकृते ऋणत्रये कृतकृत्यो भवति |

जीर्णः सन् प्रैति म्रियते। स इतः अस्मात् प्रयन्नेव शरीरं परित्यजन्नेव तृणजलूकादिवत्[1] देहान्तरम् उपाददानः कर्मचितम् पुनर्जायते। तत् अस्य मृत्वा प्रतिपत्तव्यं यत् तत् तृतीयं जन्म॥

७८. ननु संसरतः पितुः सकाशात् रेतोरूपेण प्रथमं जन्म। तस्यैव कुमाररूपेण मातुर्द्वितीयं जन्मोक्तम्। तस्यैव तृतीये जन्मनि वक्तव्ये प्रयतः तस्य पितुर्यज्जन्म तत् तृतीयम् इति कथमुच्यते? नैष दोषः। पितापुत्रयोरैकात्म्यस्य विवक्षितत्वात्। सोऽपि पुत्रः स्वपुत्रे भारं निधाय इतः प्रयन्नेव पुनर्जायते यथा पिता। तत् अन्यत्रोक्तम् इतरत्रापि उक्तमेव भवति इति मन्यते श्रुतिः। पितापुत्रयोरेकात्मत्वात्॥

वामदेवस्य साक्षात्कारः

७९. एवं संसरन् अवस्थाभिव्यक्तित्रयेण जन्ममरणप्रबन्धारूढः सर्वो लोकः संसारसमुद्रे निपतितः कथंचित् यदा श्रुत्युक्तम् आत्मानं विजानाति यस्यां कस्यांचित् अवस्थायाम् तदैव मुक्तसर्वसंसारबन्धनः कृतकृत्यो भवति - इत्येतद् वस्तु तत् ऋषिणा मन्त्रेणापि[2] उक्तम् इत्याह-

तदुक्तमृषिणा-

गर्भे नु सन्नन्वेषामवेदमहं देवानां जनिमानि विश्वा। शतं मा पुर

1. बृ.४-४-३ इत्यस्य सूचनम्। यथा तृणजलूका कीटविषेशः तृणस्यावसानं प्राप्य तृणान्तरं गच्छति एवमेव जीवोऽपि जन्मान्तरं प्राप्नोति इति दृष्टान्तेन ज्ञायते। परन्तु जीवो मरणानन्तरं लोकान्तरं गत्वा कर्मानुगुणं फलमनुभूय तदनन्तरं जन्मान्तरं प्राप्नोति इत्येवार्थो ग्राह्यः-सू.भा.३-१-१॥ 2. ऋ.सं. ४-२७-१।

आयसीररक्षन् अधः श्येनो जवसा निरदीयमिति। गर्भ एवैतच्छयानो वामदेव एवमुवाच॥ ५॥

८०. गर्भे नु मातुर्गर्भाशये एव सन् । नु इति वितर्के। अनेकजन्मान्तर-भावनापरिपाकवशात्[1] एषां देवानां वागग्न्यादीनां जनिमानि जन्मानि[2] विश्वा विश्वानि सर्वाणि अन्ववेदम् अहम् अहो अनुबुद्धवान् अस्मि इत्यर्थः। शतम् अनेकं बह्व्यः मा मां पुरः आयसीः आयस्यः लोहमय्य इव अभेद्यानि शरीराणि इत्यभिप्रायः। अरक्षन् रक्षितवत्यः संसारपाशनिर्गमनात्। अधोऽथ[3](?) श्येन इव जालं भित्त्वा जवसा आत्मज्ञानकृतसामर्थ्येन निरदीयं निर्गतोऽस्मि। अहो गर्भे एव शयानो वामदेवः ऋषिः एवम् उवाच एतत्॥

वामदेवस्य मुक्तिः

स एवं विद्वानस्माच्छरीरभेदादूर्ध्व उत्क्रम्यामुष्मिन् स्वर्गे लोके सर्वान् कामानास्वा अमृतः समभवत् समभवत्॥ ६॥

---

1. विचारपरिपाकमन्तरेण ज्ञानं न भवति। कृतो विचारो न कदापि व्यर्थो भवति। तेन जन्मान्तरेऽपि वा ज्ञानं भवति।

2. अग्न्यादयो वागादिरूपेण शरीरे संहता इति कथनं शरीरधारणमज्ञानकृतमिति, आत्मा परमार्थतोऽसङ्ग इति च बोधनाय। वामदेव इदं ज्ञातवान्।

3. मुद्रितपुस्तकेषु उपनिषन्मूले 'अधः' इत्यस्ति। भाष्ये 'अधोऽथ', 'अथोऽध' इति पाठद्वयं वर्तते। मूलभाष्यपाठः कतर इति न ज्ञायते। आगामिमन्त्रस्य 'ऊर्ध्वः' इति पदस्य भाष्यं द्रष्टव्यम्। परन्तु ऋक्संहितायां मन्त्रे 'अधः' इत्येवास्ति, इत्यतः 'अधः' इत्यस्य 'अथ इदानीम्' इत्यस्मिन्नर्थे भाष्ये प्रयोग इति ऊहितुं शक्यते।

८१. स वामदेवः ऋषिः यथोक्तम्[1] आत्मानम् एवं विद्वान्[2] अस्मात् शरीरभेदात् शरीरस्य अविद्यापरिकल्पितस्य आयसवदनिर्भेद्यस्य जननमरणाद्यनेकानर्थशताविष्टशरीरप्रबन्धस्य परमात्मज्ञानामृतोपयोग-जनितवीर्यकृतभेदात् शरीरोत्पत्तिबीजाविद्यादिनिमित्तोपमर्दहेतोः[3] शरीर-विनाशात् इत्यर्थः । ऊर्ध्वः परमात्मभूतः सन् अधोभावात्[4] संसारात् उत्क्रम्य ज्ञानावद्योतितामलसर्वात्मभावमापन्नः सन् अमुष्मिन् यथोक्ते अजरे, अमरे, अमृते, अभये[5], सर्वज्ञे[6], अपूर्वे, अनपरे, अनन्तरे, अबाह्ये[7], प्रज्ञानामृतैक-रसे[8], प्रदीपवत् निर्वाणम् अत्यगमत्[9] (?) । स्वर्गे लोके स्वस्मिन् आत्मनि स्वे स्वरूपे अमृतः समभवत् आत्मज्ञानेन पूर्वम् आप्तकामतया जीवन्नेव

---

1. सर्वमिदं जगत्सृष्ट्वा सीमानं विदार्य शरीरं प्रविश्य संसारे क्लेशमनुभूय गुरुवाक्यादहमसङ्गोऽद्वितीयात्मेति बुद्धवानिति यो वर्णितः, तमात्मानम् ।

2. शरीरादिभ्यो विलक्षणोऽद्वितीयात्मैवाहमस्मीति ज्ञातवान् सन् ।

3. अविद्या अर्थात् मिथ्याज्ञानमेव शरीरोत्पत्तये निमित्तम् । परमार्थतः शरीरं नास्ति ।

4. 'ऊर्ध्व इति परमात्मभावः, अध इति संसारभाव' इत्युक्तत्वात् पूर्वमन्त्रस्य भाष्ये 'अथोऽधः' इत्यस्य पाठस्याप्युपोद्बलकत्वमिव भवति । परन्तु तत्र दत्ता टिप्पणी द्रष्टव्या ॥ 5. बृ.४-४-२५ ॥ 6. मुं.१-१-९ ॥ 7. बृ.२-५-१९ । 8. बृ.२-४-१२. ।

9. 'प्रदीपवन्निर्वाणमत्य(ध्य)गमत्', 'पूर्वमाप्तकामतया' इत्युभयमपि मूलभाष्य आसीद्वेति संशयास्पदम्, यतो मूलानुक्रमेणैव व्याख्यानं भाष्यकाराणां शैली । वा ॥ पाठे 'प्रदीपवत्....' इति नास्ति ।

सर्वान् कामान् आप्त्वा[1] इत्यर्थः। द्विर्वचनं सफलस्य सोदाहरणस्य आत्मज्ञानस्य[2] परिसमाप्तिप्रदर्शनार्थम्॥

॥ इति द्वितीयोऽध्यायः॥

1. अत्र यथास्थितस्य भाष्यस्यानुसारेण जीवन्मुक्तौ कामावाप्तिः ततः परं विदेहमुक्तिरित्यर्थो गम्यते। परन्तु मुं.भा.३-२-६ द्रष्टव्यम्।

2. अद्वितीय इत्यवबोध एव ज्ञानम्, अमृतत्वप्राप्तिरेव फलम्, वामदेवस्यानुभवो दृष्टान्तः।

अथ तृतीयोऽध्यायः

परब्रह्मस्वरूपनिर्धारणम्, फलोपसंहारः

उत्तरग्रन्थसंबन्धः

८२. ब्रह्मविद्यासाधनकृतसर्वात्मभावफलावाप्तिं[1] वामदेवाद्याचार्य-परम्परया श्रुत्या अवद्योत्यमानां[2] ब्रह्मवित्परिषदि अत्यन्तप्रसिद्धाम् उपलभमाना[3] मुमुक्षवो ब्राह्मणा[4] अधुनातना ब्रह्मजिज्ञासवः अनित्यात् साध्यसाधनलक्षणात् संसारात् आ जीवभावात्[5] व्याविवृत्सवो विचारयन्तः अन्योन्यं पृच्छन्ति । कथम्[6]?

कोऽयमात्मेति वयमुपास्महे कतरः स आत्मा । येन वा पश्यति[7] येन वा शृणोति येन वा गन्धानाजिघ्रति येन वा वाचं व्याकरोति

---

1. सर्वात्मभावो नित्यप्राप्तोऽपि ज्ञानेन नूतनतया प्राप्त इव भवतीत्यतः स फलमिति, ज्ञानं साधनमिति चोपचर्यते ॥ 2. वामदेवाद्याचार्याणामुदाहरणेनेदं प्रतिपादयति श्रुतिः बृ.१-४-१० ॥ 3. अयमेव श्रुत्यर्थ इति ब्रह्मवित्परिषदि प्रसिद्धः ।

4. ब्राह्मणा ज्ञानस्य विशेषाधिकारिणः । ब्राह्मणवर्णस्य ज्ञानप्राप्तिरेव मुख्य-कर्तव्यत्वेनोक्ता ।

5. 'आ जीवभावात्' इति विशेषणं नान्यत्र प्रस्थानत्रयभाष्य उपलभ्यते । जीवत्वस्य नाशे संसारः पूर्णतया नष्टः स्यादिति अस्याभिप्रायः स्यात् । मुं.भा. ३-१-२ इत्यत्र 'आजवं जवीभावम्' इति वर्तमानं भाष्यमनेन तोलयेत् ।

6. 'कोऽयमात्मेति कथम्' इति आ.॥ पाठे 'कोऽयमात्मेति' इति 'कथम्' इत्यस्यानन्तरं भवेत् । वा.॥ पाठे 'कोऽयमात्मेति' इति नास्त्येव ।

7. *येन वा रूपं पश्यति येन वा शब्दं शृणोति* इति पाठे 'रूपम्' 'शब्दम्' इति पदद्वयं भाष्याधारेण लेखकः संयोजितवानिति भाति ।

येन वा स्वादु चास्वादु च विजानाति ।। १ ।।

आत्मनः स्वरूपविषये संशयः

८३. यम् आत्मानम् 'अयम् आत्मा' इति साक्षात् वयम् उपास्महे कः स आत्मा? इति । यं चात्मानम् 'अयम् आत्मा' इति साक्षात् उपासीनो वामदेवः अमृतः समभवत्[1], तमेव वयमपि उपास्महे[2] । को नु खलु स आत्मा ? इति । एवं जिज्ञासापूर्वम् अन्योन्यं पृच्छताम् अतिक्रान्तविशेष-विषयश्रुतिसंस्कारजनिता स्मृतिरजायत । *तं प्रपदाभ्यां प्रापद्यत ब्रह्मेमं पुरुषम्*[3] (ऐ.आ.२-१-४), *स एतमेव सीमानं विदार्य एतया द्वारा प्रापद्यत* (१-३ ऐ.आ. २-४-३) एतमेव पुरुषम्[4] । अत्र द्वे ब्रह्मणी इतरेतरप्रातिकूल्येन[5] प्रतिपन्ने इति(?) ते चास्य पिण्डस्य आत्मभूते । तयोरन्यतर आत्मा उपास्यो भवितुमर्हति[6] । 'योऽत्र उपास्यः कतरः स आत्मा'? इति विशेषनिर्धारणार्थं

---

1. अस्माकमात्मा इति अस्माभिर्ज्ञातव्य इति श्रुतौ उक्त आत्मा कः ? वामदेवो विजानन् मुक्तोऽभवत् किल स आत्मा कः? इत्यर्थः । द्वयमपि 'कोऽयमात्मा' इति वाक्यस्यैवार्थः ॥ 2. 'उपास्महे' इत्यादिवाक्यानामुपासना कर्तव्या इति नार्थः, जानीमहे इत्येवार्थ इति प्रकरणादवगम्यते । ज्ञानोपासनशब्दौ श्रुतौ पर्यायेण प्रयुक्तौ । प्रकरणानुसारेण अर्थविशेषो ज्ञातव्यः ॥ 3. शरीरम् ॥ 4. 'एतमेव पुरुषं द्वे ब्रह्मणी इतरेतरप्रातिकूल्येन प्रतिपन्ने' इत्यप्यन्वेतुं शक्यम् । 'अत्र' इति नास्ति वा.॥पाठे ॥ 5. प्रपदाभ्यां प्रवेशः सीमानं विदार्य प्रवेशः, सोपाधिकरूपेण अवस्थितिः निरुपाधिकरूपेण अवस्थितिः-एवं प्राण आत्मा च इतरेतरं प्रतिकूलौ वर्तेते ।
6. यत एकस्य शरीरस्य द्वौ आत्मानौ इति नोपपद्यते । विरुद्धस्वभावभूतौ द्वावपि एकस्यैव शरीरस्य आत्मा इति तु नितरामनुपपन्नं वचनम् ।

पुनरन्योन्यं पप्रच्छुर्विचारयन्तः ॥

आत्मस्वरूपनिश्चयः

८४. पुनस्तेषां विचारयतां विशेषविचारणास्पदविषया मतिरभूत्। कथम् ? द्वे वस्तुनी अस्मिन् पिण्डे उपलभ्येते अनेकभेदभिन्नेन करणेन येन उपलभते[1], यश्चैक उपलभते करणान्तरोपलब्धविषयस्मृतिप्रतिसन्धानात्। तत्र न तावत् येन उपलभते[2] स आत्मा भवितुमर्हति। केन पुनरुपलभते इति?। उच्यते। येन[3] वा चक्षुर्भूतेन रूपं पश्यति, येन वा शृणोति श्रोत्रभूतेन शब्दम्, येन वा घ्राणभूतेन गन्धान् आजिघ्रति। येन वा वाक्करणभूतेन वाचं नामात्मिकां व्याकरोति 'गौः', 'अश्वः' इत्येवमाद्याम्, 'साधु', 'असाधु' इति च। येन वा जिह्वाभूतेन स्वादु च अस्वादु च विजानाति इति ॥

उपलब्धिकाले विक्रियमाणं करणम्

यदेतद् हृदयं मनश्चैतत्। संज्ञानमाज्ञानं विज्ञानं प्रज्ञानं मेधा दृष्टिर्धृतिर्मतिर्मनीषा जूतिः स्मृतिः सङ्कल्पः क्रतुरसुः कामो वश इति। सर्वाण्येवैतानि प्रज्ञानस्य नामधेयानि भवन्ति ॥ २ ॥

---

1. यद्यपि श्रुतौ 'एष परमार्थत आत्मा' इति विविच्य नोक्तः तथापि येन इति करणवाचकेन शब्देन करणं नात्मेति बोधितमेव भवति।

2. विषयज्ञानार्थमन्तःकरणस्य विक्रिया भवेदेव। आत्मनस्तु विक्रिया नापेक्षिता।

3. अन्तःकरणमेव तत्तत्करणरूपेण सर्वं विजानातीति भावः।

८५. किं पुनस्तदेकम् अनेकधा भिन्नं करणम् इति? उच्यते। यदुक्तं पुरस्तात् *प्रजानां रेतो हृदयं हृदयस्य रेतो मनः* (ऐ.आ.२-१-३), *मनसा सृष्टा आपश्च वरुणश्च*(ऐ.आ.२-१-७), *हृदयान्मनो मनसश्चन्द्रमाः* (१-१,ऐ.आ.२-४-१) तदेव एतद् हृदयं[1] मनश्च[2]। एकमेतद् अनेकधा। एतेन अन्तःकरणेन एकेन चक्षुर्भूतेन रूपं पश्यति, श्रोत्रभूतेन शृणोति, घ्राणभूतेन जिघ्रति, वाग्भूतेन वदति, जिह्वाभूतेन रसयति, स्वेनैव विकल्पनारूपेण मनसा विकल्पयति हृदयरूपेण[3] अध्यवस्यति। तस्मात् सर्वकरणविषय-व्यापारकम् एकमिदं करणं सर्वोपलब्ध्यर्थम् उपलब्धुः। तथा च कौषीतकिनाम् *प्रज्ञया वाचं समारुह्य वाचा सर्वाणि नामान्याप्नोति प्रज्ञया चक्षुः समारुह्य चक्षुषा सर्वाणि रूपाण्याप्नोति* (कौ.३-६) इत्यादि[4]। वाजसनेयके च *मनसा ह्येव पश्यति मनसा शृणोति* (बृ.१-५-३), *हृदयेन हि रूपाणि विजानाति*[5] (बृ.३-९-२०) इत्यादि। तस्मात् हृदयमनो(?)-वाच्यस्य सर्वोपलब्धिकरणत्वं प्रसिद्धम्॥

करणरूपः प्राणो नात्मा, उपलब्धा एवात्मा

८६. तदात्मकश्च प्राणः। *यो वै प्राणः सा प्रज्ञा या वै प्रज्ञा स*

---

1. उदाहृतश्रुतिषूक्तं हृदयमेवेदं करणम्॥ 2. मनश्शब्देन श्रुतिषूदाहृतमपीदमेव करणम्॥ 3. अत्र हृदयशब्देन बुद्धिरेवोच्यते इति स्पष्टम्।
4. प्रज्ञा इत्युक्ते अन्तःकरणम्, सर्वेषां करणानां व्यापारमपि करोतीति भावः।
5. अत्र मनः, हृदयमिति यदुक्तं तत् सर्वेषां करणानां व्यापारकृदन्तःकरणमेव।

प्राणः (कौ.३-४) इति हि[1] ब्राह्मणम्[2]। करणसंहतिरूपश्च प्राणः इत्यवोचाम[3] प्राणसंवादादौ। तस्मात् यत् प्रपदाभ्यां[4] प्रापद्यत तद्ब्रह्म तदुपलब्धुरुपलब्धिकरणत्वेन गुणभूतत्वात् नैव तद् वस्तुब्रह्म उपास्य[5] आत्मा भवितुमर्हति[6]। पारिशेष्यात्[7] यस्य उपलब्धुरुपलब्ध्यर्था एतस्य हृदयमनोरूपस्य[8] करणस्य वृत्तयो[9] वक्ष्यमाणाः स उपलब्धा उपास्य आत्मा नो[10] भवितुमर्हति इति निश्चयं कृतवन्तः॥

अन्तःकरणस्य वृत्तयः

८७. तदन्तःकरणोपाधिस्थस्य उपलब्धुः प्रज्ञानरूपस्य ब्रह्मण उपलब्ध्यर्था या अन्तःकरणवृत्तयो बाह्यान्तर्वर्तिविषयविषयाः ता इमा

---

1. अयं वा.॥ पाठः॥ 2. ज्ञानक्रियाशक्तिद्वयमपि प्राणसम्बद्धमित्यत्रेदं वचनं प्रमाणत्वेनोदाहृतम्, *या वै प्रज्ञा* इत्यस्मिन् स्थाने निर्णयसागरकोशे *या वा प्रज्ञा* इत्यस्ति। 3. अतीतारण्यकभागस्यापि भाष्यमाचार्यैर्लिखितमित्यत्रेदमेकं गमकम्। भूमिका द्रष्टव्या॥ 4. 'पद्भ्याम्' इत्यस्मात् पाठात् 'प्रपदाभ्याम्' इति पाठोऽत्र संगच्छते। 5. 'उपास्यात्मा' इति पाठादयमेव पाठः समीचीनतर इत्यागामिभाष्यादवगम्यते।
6. यत आत्मा अन्यस्य करणभूतो न स्यात्।
7. अन्यस्य सर्वस्य व्यावर्तनेन यदवशिष्यते तदेव तदिति युक्तेः।
8. 'हृदयस्य मनोरूपस्य' इति आ.॥ पाठादयं वा.॥ पाठो वरीयान्।
9. वृत्तयः परार्थभूताः, ताः स्वार्थभूतस्य आत्मनो ज्ञानमिति प्रयोजनाय भवति। अतो यो ज्ञाता स आत्मा, न करणभूतो वृत्तिसमूह आत्मा इत्यभिप्रायः।
10. 'नोऽस्माकम्' इति पाठे अस्माकमित्यधिकम्।

उच्यन्ते। संज्ञानं संज्ञप्तिः चेतनभावः[1]। आज्ञानम् आज्ञप्तिः ईश्वरभावः। विज्ञानं कलादिपरिज्ञानम्। प्रज्ञानं प्रज्ञप्तिः प्रज्ञता। मेधा ग्रन्थधारण-सामर्थ्यम्। दृष्टिः इन्द्रियद्वारा सर्वविषयोपलब्धिः। धृतिः धारणम् अवसन्नानां शरीरेन्द्रियाणां यया उत्तम्भनं भवति। 'धृत्या शरीरम् उद्वहन्ति' इति हि वदन्ति। मतिः मननम्। मनीषा तत्र स्वातन्त्र्यम्[2]। जूतिः चेतसो रुजादिदुःखित्वभावः। स्मृतिः स्मरणम्। सङ्कल्पः शुक्लकृष्णादिभावेन सङ्कल्पनं रूपादीनाम्। क्रतुः अध्यवसायः। असुः प्राणनादिजीवन-क्रियानिमित्ता वृत्तिः। कामः असन्निहितविषयाकांक्षा तृष्णा। वशः स्त्रीव्यतिकराद्यभिलाषः इति एवमाद्या अन्तःकरणवृत्तयः। प्रज्ञप्तिमात्रस्य उपलब्धुः उपलब्ध्यर्थत्वात् शुद्धप्रज्ञानरूपस्य ब्रह्मण उपाधिभूताः। तदुपाधिजनितगुणनामधेयानि संज्ञानादीनि सर्वाण्येव एतानि प्रज्ञप्तिमात्रस्य प्रज्ञानस्य नामधेयानि भवन्ति, न तु साक्षात्[3]। तथा चोक्तम् *प्राणन्नेव प्राणो नाम भवति* (बृ.१-४-७) इत्यादि[4]॥

सर्वेष्ववस्थितं प्रज्ञानमेव ब्रह्म

एष ब्रह्मैष इन्द्र एष प्रजापतिरेते सर्वे देवा इमानि च पञ्च

---

1. अश्मलोष्टादावविद्यमानं चेतनमिति व्यपदेशयोग्यार्थमपेक्षितं यज्ज्ञानम्।

2. मनसि यत् स्फुरति सा मतिः। स्वतन्त्रतया विचारणाशक्तिः मनीषा। येषां सा शक्तिर्विद्यते ते मनीषिणः।

3. वृत्त्यभिधायका इमे शब्दा लक्षणया वृत्त्युपाधिमत् चेतनमपि बोधयन्ति।

4. तेन तेनोपाधिना आत्मनः तत्तन्नाम भवतीति श्रुतेरभिप्रायः।

महाभूतानि पृथिवी वायुराकाश आपो ज्योतींषीत्येतानीमानि च क्षुद्रमिश्राणीव बीजानीतराणि चेतराणि चाण्डजानि च जारुजानि च स्वेदजानि चोद्भिज्जानि चाश्वा गावः पुरुषा हस्तिनो यत्किंचेदं प्राणि जङ्गमं च पतत्रि च यच्च स्थावरम्। सर्वं तत् प्रज्ञानेत्रं प्रज्ञाने प्रतिष्ठितं प्रज्ञानेत्रो लोकः प्रज्ञा प्रतिष्ठा प्रज्ञानं ब्रह्म ॥ ३ ॥

८८. स एष प्रज्ञानरूप आत्मा ब्रह्म अपरं सर्वशरीरस्थः[1] प्राणः[2] प्रज्ञात्मा। अन्तःकरणोपाधिषु अनुप्रविष्टः[3], जलभेदगतसूर्यप्रतिबिम्बवत् हिरण्यगर्भः प्राणः[4] प्रज्ञात्मा। एष एव इन्द्रः गुणात्[5], देवराजो[6] वा। एष प्रजापतिः यः प्रथमजः[7] शरीरी। यतो मुखादिनिर्भेदद्वारेण अग्न्यादयो लोकपाला जाताः स प्रजापतिरेष एव। येऽपि एते अग्न्यादयः सर्वे देवा[8] एष एव। इमानि च सर्वशरीरोपादानभूतानि पञ्च पृथिव्यादीनि महाभूतानि अन्नान्नादलक्षणानि[9] एतानि। किं च इमानि च क्षुद्रमिश्राणि क्षुद्रैरल्पकै-

---

1. अयं वा.॥ पाठः। अयं समष्टिस्थूलशरीरविषय इति व्याख्यानस्याधारो नास्ति।
2. प्राणः प्रज्ञा इति उभयमप्येकमेवेति पूर्वमेव कौ.ब्रा.वचनेन समर्थितम्।
3. ऐ.आ.३-२-३ इत्यत्र *सर्वेषु भूतेषु एतमेव ब्रह्म इत्याचक्षते*-इत्यस्यैष एवार्थः। सूक्ष्मशरीराणि सर्वाणि हिरण्यगर्भस्यांशाः। का.२-१-६, मुं.२-१-४, प्र.२-७ इत्येषां भाष्यं द्रष्टव्यम्॥
4. 'एष ब्रह्म' इत्यस्य वाक्यार्थः समासः इति सूचनाय 'प्राणः प्रज्ञात्मा' इति पुनर्लिखितम्॥
5. इदमदर्शमिति ज्ञानरूपाद्गुणात्।
6. इन्द्रस्यात्मापि एष एव॥
7. 'प्रथमजः' इत्यस्मिन् स्थाने 'प्रथमः' इति स्थिते *स वै शरीरी प्रथमः* इति स्मृतेः सूचना स्यात्॥
8. विराट्पुरुषाज्जाता इति प्रथमेऽध्याय उक्ता देवताः॥
9. ऐ.आ.२-३-१ (उक्थविचारे) इदं विवृतम्।

मिश्राणि[1] । इवशब्दोऽनर्थकः, सर्पादीनि[2] । बीजानि कारणानि इतराणि च इतराणि च द्वैराश्येन निर्दिश्यमानानि । कानि तानि? उच्यन्ते । अण्डजानि[3] पक्ष्यादीनि, जारुजानि जरायुजानि मनुष्यादीनि, स्वेदजानि यूकादीनि, उद्भिज्जानि च वृक्षादीनि । अश्वाः गावः पुरुषाः हस्तिनः अन्यच्च यत्किंचेदं प्राणिजातम् । किं तत्? जङ्गमं यत् चलति, पद्भ्यां गच्छति । यच्च पतत्रि आकाशेन पतनशीलम् । यच्च स्थावरं अचलम् । सर्वं तत् अशेषतः प्रज्ञानेत्रम् । प्रज्ञप्तिः प्रज्ञा तच्च ब्रह्मैव । नीयते अनेन इति नेत्रम् । प्रज्ञा नेत्रं यस्य तदिदं प्रज्ञानेत्रम् । प्रज्ञाने ब्रह्मणि उत्पत्तिस्थितिलयकालेषु प्रतिष्ठितम्, प्रज्ञाश्रयम् इत्यर्थः । प्रज्ञानेत्रो लोकः पूर्ववत्[4] । प्रज्ञाचक्षुर्वा सर्व एव लोकः । प्रज्ञा प्रतिष्ठा[5] सर्वस्य जगतः । तस्मात् प्रज्ञानं ब्रह्म[6] ॥

प्रज्ञानमेव सर्वप्रकारेण व्यवह्रियते

८९. तदेतत् प्रत्यस्तमितसर्वोपाधिविशेषं सत् निरञ्जनम्, निर्मलम्,

---

1. अवराणि ॥ 2. एतान्येव वक्ष्यमाणानि बीजानि ।

3. अण्डजादीनां बीजत्वेन व्यपदेशे कारणं छां.भा.६-३-१ इत्यत्रोक्तम् ।

4. लोकः प्रज्ञानेन नीयते, प्रज्ञानमाश्रयतीत्यर्थः । परमात्मैव जनान्कर्मफलं प्रति नयतीति भावः ॥ 5. सर्वं जगत् प्रज्ञान एवाध्यस्तम्, प्रज्ञानमेव तस्यास्पदमित्यर्थः ।

6. 'कोऽयमात्मेति' इत्यारभ्य 'एते सर्वे देवाः' इत्यन्तं त्वंपदार्थशोधनार्थम्, 'इमानि च' इत्यारभ्य 'प्रतिष्ठा' इत्यन्तं तत्पदार्थशोधनार्थमिति व्याख्यानेऽस्ति । 'प्रज्ञानं ब्रह्म' इति वाक्यस्य (१) प्रत्यगात्मा निर्विशेषस्वरूपः (२) प्रत्यगात्मा जगत्कारणत्वोपलक्षितं ब्रह्म - इत्यर्थद्वयं व्याख्याने दर्शितम् । एवंविवेचनस्य भाष्याधारो नोपलभ्यते ।

निष्क्रियम्, शान्तम्[1], एकम् अद्वयम्[2], नेति नेति[3] - इति सर्वविशेषापोह-संवेद्यम्, सर्वशब्दप्रत्ययागोचरम्[4] । तदत्यन्तविशुद्धप्रज्ञोपाधिसम्बन्धेन[5] सर्वज्ञम् **ईश्वरसंज्ञं** भवति । सर्वसाधारणा[6]व्याकृतजगद्बीजप्रवर्तकं नियन्तृत्वात् **अन्तर्यामिसंज्ञं** भवति । तदेव व्याकृतजगद्बीजभूतबुद्ध्या-त्माभिमानलक्षणं[7] **हिरण्यगर्भसंज्ञं** भवति । तदेव अन्तरण्डोद्भूतप्रथम-शरीरोपाधिमत् **विराट् प्रजापतिसंज्ञं** भवति । तदुद्भूताग्न्याद्युपाधिमत् **देवतासंज्ञं** भवति । तथा विशेषशरीरोपाधिष्वपि ब्रह्मादिस्तम्बपर्यन्तेषु तत्तन्नामरूपलाभो ब्रह्मणः । तदेवैकं सर्वोपाधिभेदभिन्नं सर्वैः प्राणिभिः तार्किकैश्च[8] सर्वप्रकारेण ज्ञायते विकल्प्यते चानेकधा । *एतमेके वदन्त्यग्निं मनुमन्ये प्रजापतिम् । इन्द्रमेकेऽपरे प्राणमपरे ब्रह्म शाश्वतम्* (मनु.१२-१२३) इत्याद्या स्मृतिः ॥

---

1. श्वे. ६-२९ ॥ 2. छां. ६-२-१ ।
3. बृ. २-३-६ ॥ 4. तै. २-९ ।
5. बृ.भा.३-८-१२ इत्यत्र विवरणं द्रष्टव्यम् ।
6. मुं.भा.१-१-८ इत्यत्र अन्नमित्यस्य विवरणं द्रष्टव्यम् ।
7. जीवः, ईश्वरः, ब्रह्म इति त्रय आत्मानोऽन्योन्यविलक्षणा इति पूर्वपक्षमुत्थाप्य यद्विचारितम्, द्रष्टृ अद्रष्टृ इत्यादि विकल्प्य यच्च विचारितं तत् एतदेव ब्रह्म । उपाधिनिमित्तेन ब्रह्मणि नाना आकारा अवभासन्ते, स्वरूपेण तु न तस्मिन् कश्चिद्विशेषोऽस्तीति भावः ।
8. वेदान्तिनो विहायान्ये सर्वे वादिनः तार्किका एव, यतस्तेषां स्वतन्त्रतर्क एव प्रधानम् ।

ब्रह्मज्ञानफलस्योपसंहारः

स एतेन प्रज्ञेनात्मनाऽस्माल्लोकादुत्क्रम्यामुष्मिन् स्वर्गे लोके सर्वान् कामानास्वाऽमृतः समभवत् समभवत्।। ४ ।।

९०. स वामदेवः अन्यो[1] वा, एवं यथोक्तं ब्रह्म यो वेद प्रज्ञेन आत्मना, येनैव प्रज्ञेन आत्मना पूर्वे विद्वांसः अमृता अभूवन् तथा अयमपि विद्वान् एतेनैव प्रज्ञेन आत्मना[2] *अस्मात् लोकात् उत्क्रम्य* इत्यादि व्याख्यातम्[3] । अस्मात् लोकात् उत्क्रम्य अमुष्मिन् स्वर्गे लोके सर्वान् कामान् आस्वा अमृतः समभवत् समभवत् इति ओमिति[4] ।।

|| इति तृतीयोऽध्यायः ||

इति ऐतरेयोपनिषद्भाष्यं संपूर्णम् ||

---

1. यः कश्चिदेवं जानाति, तस्येदं फलं भवति। न हि वामदेवसदृशेन ऋषिणैव भवितव्यमिति नियमोऽस्ति।

2. आत्मज्ञानेन नित्यभूतं स्वस्वरूपं प्राप्येत्यर्थः। अद्वितीयात्मज्ञानेनैव सर्वेषां मुक्तिः।

3. शरीरस्य साक्षात्त्यागपूर्वकमूर्ध्वलोकं गत्वेति नार्थः। अज्ञानकृतस्य शरीरस्य ज्ञानेन त्याग एवोत्क्रणम्, स्वर्ग इति आनन्दात्मन्यवस्थानमेव इति पूर्वमुक्तम्।

4. ओमिति भाष्यसमाप्तिसूचकं मङ्गलवाचकं पदम्। आरण्यकस्य सप्तमाध्यायरूपस्य *वाङ्मे मनसि प्रतिष्ठिता* इति मन्त्रस्योपनिषदन्तर्गतत्वेन शान्त्यर्थं पठनमिति संप्रदायः। अनेन मन्त्रेण संभूयेयमुनिषत् आत्मषट्कमिति आत्मबोधनरूपः षड्भागात्मको ग्रन्थ इति केषांचिद्भावना। अस्मिन्विषये भूमिका द्रष्टव्या।

ऐतरेयोपनिषत्सारः

प्रथमाध्याये - प्रथमः खण्डः

आत्मा एक एवाग्र आसीत्। नैवान्यत्किञ्चिद्वस्तु ततो व्यतिरिक्तमासीत्। स लोकान्सृजेऽहमित्यालोच्य अम्भः, मरीचिः, मरः, आपः इत्येतान्पञ्चभूतात्माकान् लोकान् सृष्टवान्। तत एतेषां लोकानां पालयित्रीः देवताः सृजेऽहमित्यालोच्य तेभ्य एव पञ्चभूतेभ्य एकं पुरुषाकारं कृत्वा तस्मिन्नुद्दिश्याभिध्यायमाने, तस्मात्पुरुषात् मुखम्, वाक्, अग्निः; नासिके, प्राणः, वायुः; अक्षिणी, चक्षुरिन्द्रियम्, आदित्यः; कर्णौ, श्रोत्रेन्द्रियम्, दिग्देवताः; त्वक्, लोमानि, ओषधिवनस्पतिदेवताः; हृदयम्, मनः, चन्द्रमाः; नाभिः, पाय्विन्द्रियम्, मृत्युः; शिश्नम्, प्रजननेन्द्रियम्, आपः; - इत्येवंक्रमात् अवयवाः, इन्द्रियाणि, देवताश्चोत्पन्नाः।

प्रथमाध्याये - द्वितीयः खण्डः

एता देवताः संसारेऽपतन्। यत आत्मा प्रथमसृष्टं विराट्पुरुषमशनायापिपासाभ्यां समयोजयत्, तस्य पुरुषस्य कार्यभूता देवता अप्यशनायापिपासामत्योऽभवन्। ता 'अशनायापिपासापगमाय योग्यं शरीरमस्मभ्यं विधत्स्वे'ति परमेश्वरं प्रार्थितवन्तः। ततः परमात्मना क्रमेण प्राणिषु सृज्यमानेषु, तेषु नैकस्यापि प्राणिनः शरीरमस्माकं योग्यमिति देवताभिः प्रत्याख्यातेषु शरीरान्तरेषु, ईश्वरो पुरुषं सृष्टवान्। ताः 'बत ! शोभनं कृतमिदम्' इति प्रशस्य तच्छरीरं प्राविशन्नीश्वरानुज्ञां प्राप्य। यस्माद्यस्माद्विराट्पुरुषस्य इन्द्रियादेषा बहिरागता देवता, मनुष्यशरीरेऽपि सा सा देवता तत्तदिन्द्रियमेव प्राविशत्। अशनायापिपासादेवतयोः पृथक्स्थानाभावात् ते तया तया देवतया सहवसत्यैव तासां तृप्त्यैव तृप्ते स्यातामिति ईश्वरोऽकल्पयत्।

प्रथमाध्याये - तृतीयः खण्डः

तत ईश्वरः तेभ्य एव पञ्चभूतेभ्योऽन्नाख्यं मूर्तिमसृजत लोकपालेभ्यः। परन्तु तदन्नं पलायितुं प्रारभत। लोकपालसंघातो विराट्पुरुषो नैकेनापीन्द्रियेण तदन्नं ग्रहीतुं समर्थोऽभवत्। एकैकेनेन्द्रियेण परीक्ष्यान्ततो मुखच्छिद्रेण ग्रहीतुमनुकूलभूतेनापानेन वायुना तदन्नं जग्राह। तस्मादिदानींतना अपि जीवा विराट्पुरुषस्य वंशजा एवमेवान्नमश्नन्ति।

ततः यस्य प्रयोजनायेन्द्रियाणि स्वं स्वं व्यापारं निर्वर्तेरन्, तादृशेन स्वतन्त्रेण स्वामिना शरीरे भाव्यमिति आत्मा स्वयमेव जीवरूपेण शरीरं प्राविशत्। प्राणः प्रपदाभ्यामिदं शरीरं प्राविशदिति तं मार्गं हित्वा मूर्धसीमानं विदार्य तद्द्वारा शरीरं प्रविवेश। एतेन आत्मानं ज्ञातुं साधनमेकं लब्धावसरमभवत्। शरीरं प्रविष्टस्य जीवस्य इन्द्रियम्, मनः, हृदयाकाश इति स्थानत्रयं वर्तते। जाग्रत्स्वप्नः सुषुप्तिरिति त्रयः स्वप्नाः भवन्ति। जीवः इदमेकमिदमेकमिति पर्यायेण त्रीनपि स्वप्राननुभवति।

एवंक्रमेण जीवो भूत्वा आत्मा सर्वाणि भूतानि विवेकेन परीक्ष्य, आत्मनो वस्त्वन्तरमन्यदपश्यन् इदं सर्वं स्वस्वरूपमेवेति व्यजानात्। यस्मात् 'इदम् अदर्शम्' इत्यपश्यत्, तस्मात्तस्य 'इदन्द्रः' इति नामाभवत्। एतन्नाम ब्रह्मविदः 'इन्द्रः' इति परोक्षाभिधानेन संव्यवहरन्ति। यस्मात् देवाः परोक्षनामग्रहणप्रियाः, तस्मात् देवानामपि देवस्य आत्मनः परोक्षाभिधानं प्रियमेवेति किमु वक्तव्यम्।

द्वितीयोऽध्यायः

अयं जीवः पुरुषेऽन्नरसपरिणतेन रक्तादिधातुक्रमेण रेतोरूपेण गर्भो भवति। स पुरुषः स्वशरीरमिव तद्रेतः भावयित्वा भार्यामुपगच्छन् तस्यां

सिञ्चति। तदेव जीवस्य प्रथमं जन्म। स्त्रियां स्थितं तद्रेतः सा स्वदेहवदेव भावयति। ततः पुत्ररूपेण तज्जायते। तज्जीवस्य द्वितीयं जन्म। पिता जातकर्मादिना पुत्रं संस्कृत्य तमात्मभावेनैव वर्धयित्वा आप्रायणं यदध्ययन-यज्ञादिकर्म स्वेनानुष्ठितमननुष्ठितञ्च तत्पुत्रे प्रतिनिधाय वर्तमानं शरीरं त्यक्त्वा देहान्तरमुपादत्ते। एवं स्त्रीगर्भान्निर्गत्य जीवनयात्रां परिसमाप्य देहान्तरप्राप्तिर्जीवस्य तृतीयं जन्म।

एवं शरीरत्रयप्राप्तिरेव जीवस्य त्रय आवसथा इति ग्रहीतुं शक्यते। आत्मज्ञान्येव केवल एतानि जन्ममरणान्यत्येति। तथा च मन्त्रेणोक्तम् - 'अहं गर्भे एव सन् एषां देवानां जन्मानि सर्वाणि अनुबुद्धवानस्मि। एतादृशानि शतानि शरीराणि लोहमयदुर्गवन्मां दृढतया पाशितवन्ति। अहं त्विदानीं ज्ञानेन शरीरपाशान् निर्भिद्य ततो निर्गतोऽस्मि जालं भित्त्वेव श्येनः' इति मन्त्रस्यार्थः। अहो एतद् ऋषिर्वामदेवो गर्भ एव शयान उवाच! स ऋषिर्वामदेवो नित्यशुद्धं स्वात्मनः स्वरूपं विद्वान् अविद्यापरिकल्पितं शरीरं विनाश्य उत्कृष्टं परमात्मस्वरूपमापन्नः सर्वान् कामानाप्त्वा अमृतोऽभवत्।

तृतीयोऽध्यायः

किं तदात्मस्वरूपं यत् ऋषिर्वामदेवः श्रुत्युक्तप्रकारेण ज्ञात्वा मुक्तोऽभवत्? तदेव वयमपि ज्ञात्वा कृतकृत्या भूयास्मेति जिज्ञासमानेषु मुमुक्षुषु विचिकित्सेयमजायत-प्रपदाभ्यां शरीरं प्रविष्टः प्राण एकः, मूर्धसीमानं विदार्य प्रविष्टोऽपरः-एतयोर्कतरः परमार्थत आत्मा? प्रपदाभ्यां प्रविष्ट आत्मा अन्तःकरणवृत्तिभिर्भिन्नभिन्नविषयाणामुपलब्धये साधनभूतः। दर्शनं श्रवणं घ्राणं वदनमास्वादनम्- एतत्सर्वमनेन प्राणात्मनैव निर्वर्त्यते।

न हि स परमार्थत आत्मा, करणस्वरूपभूतत्वात् । कर्त्रर्थं हि करणं नाम । तस्मादेतेषां दर्शनश्रवणादिक्रियाणां यः कर्ता स एवात्मेति युक्तम् ।

एष मुख्य आत्मा प्रज्ञानरूपः केवलचिन्मात्रस्वरूपः । अन्तःकरण-वृत्तिनिमित्तानि अस्य प्रज्ञानस्यानेकानि नामधेयानि भवन्ति । संज्ञानाऽऽज्ञान-विज्ञानादिभेदास्तु अन्तःकरणेनैव सम्बद्धा न तु प्रज्ञानरूपेण । इदं प्रज्ञानाख्यं शुद्धचैतन्यमेव हिरण्यगर्भः, इन्द्रः, प्रजापतिः, देवताः इति च नाना संज्ञा भजते । भूतभौतिकानि सर्वाणि प्रज्ञारूपेऽस्मिन् परमात्मन्येव प्रतिष्ठितानि सन्ति जन्मस्थितिनाशान् प्रतिपन्नानि । प्रज्ञानव्यतिरिक्तस्यान्यस्य कस्यचिदप्यभावात् प्रज्ञानमेव ब्रह्म । प्रज्ञानरूपभूतमिदमात्मस्वरूपं यो ज्ञानेन प्रतिपन्नः स अविद्याकृतमिमं लोकमतिक्रम्य आनन्दस्वरूपेण परमात्मरूपेण सर्वान्कामानास्वा अमृतो भवति ।

मन्त्राणामनुक्रमणिका

अत्र मं. इति खण्डा यथाविभक्ता अस्माभिस्तथाभूतो मन्त्रभागः

भाष्यस्थमुख्यशब्दसूची

अत्र दत्ताः संख्या भाष्यभागपरामर्शिन्यः

(१) अकर्मसम्बन्धि -	कर्मसम्बन्धरहितम् -३,५
(२) अकर्मी -	कर्मत्यागी संन्यासी - ४
(२) अङ्गफलम् -	प्रधानाधीनस्य फलम् -१९
(४) अज्ञानम् -	ज्ञानाभावः - ६८
(५) अणवः -	जगत्कारणत्वेन वैशेषिकैरभ्युपगताः परमाणवः-२९
(६) अण्डम् -	समष्टिजगत्पिण्डः, अस्यान्तर्विराट्पुरुषस्य वर्तनम् - ३२,८९
(७) अद्वयः -	स्वात्मव्यतिरिक्तद्वितीयरहित आत्मा - २८
(८) अधिष्ठाता -	ईशिता (देवता) - ३५,५१
(९) अधिष्ठानम् -	आश्रयः, स्थानम् - ३३,३५,४१,४२,४४,४५,६२
(१०) अध्यात्माधिदेवताः -	शरीरस्थेषु करणेषु, बहिश्च वर्तमाना देवताः - ४५
(११) अनधिकृताः -	कर्मानधिकारिणोऽन्धपङ्ग्वादयः - ७,२३
(१२) अनुमानम् -	धूमलिङ्गेन यथाग्निरूह्यते तथोहापूर्वकनिश्चयरूपं प्रमाणम् - ६५
(१३) अन्तःकरणम् -	अन्तःस्थं करणम्, नानावृत्तिमन्मनः - ३५, ८५,८६,८७
(१४) अन्तर्यामी -	अन्तःस्थित्वा सर्वान् वशे कुर्वाणः परमात्मा - ८९
(१५) अन्नान्नादलक्षणम् -	परस्परमत्तृत्वेन भावयितृणि भूतानि - ८८
(१६) अपरब्रह्म -	अवरं ब्रह्म, सगुणं ब्रह्म, हिरण्यगर्भः - १, ८८
(१७) अयौगपद्यम् -	ज्ञानानां युगपदनुत्पद्यमानत्वं - ६६, ७०

(१८) अर्थवादः - तात्पर्येण विहितस्य विषयस्य प्रशंसारुपं वाक्यम् - ७,६१

(१९) अविद्या - मिथ्याज्ञानम्, संसारस्य मूलहेतुभूता - १३,२६,५६,७३,८१

(२०) अविद्याकामकर्माणि - उत्तरोत्तरस्य कारणभूतानि-मिथ्याज्ञानं, कामः, कर्म-इत्येतानि - १३,३६,७४

(२१) अव्याकृतम् - जगतो बीजभूतयोर्नामरूपयोः सूक्ष्मावस्था - २८,३१,८९

(२२) असद्वादी - कार्यं च कारणं च नास्तीति वादी - ३१

(२३) असंसारी - परमात्मा, संसारिणो जीवादन्यः - ५९

(२४)असंहतः - अन्येन संभूय कर्म यो न करोति, आत्मा -५२

(२५) आगमसंप्रदायः - गुरुपरंपरया प्राप्तो वैदिकोपदेशः - ७१

(२६) आत्मगुणाः - आत्मनः प्रतिपत्तये साधनभूतानि सत्यादीनि - ३६

(२७) आत्मज्ञानम्, आत्मविज्ञानम् - आत्मनः स्वरूपस्य ज्ञानम् - ३, ४, ५, ७, ११, १९, ५७, ८०,८९,

(२८) आत्मदर्शनम् - आत्मनः साक्षात्कारः, आत्मज्ञानम् - १८

(२९) आत्मभावः - तदेवाहमिति भावना - १,७२

(३०) आत्मविद्या - आत्मनो वेदनम् - १९

(३१) आत्मा - परमात्मा -२८,२९,३०,३१,३७,५९,८३,८९
अयं शब्दो जीवः शरीरमित्याद्यर्तेष्वपि प्रयुक्तः - ७४,७५,७६,७७

(३२) आत्मावबोधः - आत्मज्ञानम् - ६१,७२

(३३) आश्रमविकल्पः - क्रममतिक्रम्य आश्रमान्तरस्य प्रतिपत्तिः - २३

(३४) आश्रमसमुच्चयः - सर्वेषामाश्रमाणां यथाक्रमं प्रतिपत्तिः - २३

(३५) इन्द्रः -	परमात्मा यः स्वस्वरूपं साक्षाद्विज्ञातवान् - ५८,८८ देवतानां राजा ८८
(३६) ईश्वरः -	सर्वानीशितुं शीलः परमात्मा - ३३, ३६,४३,४५,४६, ४७,५४,५८,८९, स्वामी - ४६,४७,८७
(३७) करणसंहतिः -	सर्वकरणसंघातरूपः प्राणः - ८६
(३८) काणादाः -	कणादस्यानुयायिनः, वैशेषिकाः - २९,६६
(३९) कार्यकरणानि -	शरीरमिन्द्रियाणि च - ३०,४८
(४०) कार्यकरणसंघातः -	शरीरेन्द्रियाणां संहतिरूपः - ५१,५२,५३,५४
(४१) कृताकृतफलसाक्षी -	कृतस्याकृतस्य, तयोः फलस्य च द्रष्टा आत्मा - ५१
(४२) केवलात्मज्ञानम् -	कर्मासंबन्धि केवलमात्मज्ञानं न तूपासनम् - २,३,४
(४३) केवलोपास्तिः -	कर्मसंबन्धं विना स्वातन्त्र्येण केवलस्यात्मन उपासनम्- ६
(४४) क्रियाकारकफलरूपः -	कर्माणि, तत्साधनानि, तत्फलानि चेत्येवंरूपः संसारः- १९
(४५) गुणफलम् -	अधीनभूत कर्मणः फलम्, न मुख्यं फलम्, अङ्गफलम् - १९
(४६) गुरूपसदनम् -	शुश्रूषार्थं गुरुं प्रति गमनम्, गुरुशुश्रूषा - २६
(४७) चन्द्रमाः -	चन्द्रमण्डलद्वारेण प्राप्यमाणः पितृलोकः - ७४
(४८) जन्म मरण प्रबन्धः -	जन्म मरणानां सन्ततिः जीवः - ७९
(४९) जीवः -	संसारी आत्मा - ५६,५७,६३
(५०) ज्ञानम्, विज्ञानम् -	उपासना - १
(५१) ज्ञान कर्म समुच्चयः -	कर्म च उपासनं च संभूयानुष्ठानम् - २,३७
(५२) तार्किकाः -	तर्कप्रधाना वादिनोऽवेदान्तिनः - ७१,८९
(५३) त्यक्तैषणः -	पुत्रकर्मलोकविषयाणां कामानां त्यागी - २६

(६८) परब्रह्म - अत्यन्तोत्कृष्टं ब्रह्म, न तु सगुणो हिरण्यगर्भः - ८, १४, ३७, ५४

(६९) परा-गतिः - साधकेन प्राप्यमाण उत्तमो ब्रह्मलोकः - १

(७०) परार्थम् - स्वार्थभूतवस्त्वर्थं चेष्टमानमधीनं वस्तु - ५१,५२

(७१) पाङ्क्तलक्षणम् - कर्म निर्वर्तनायापेक्षितानि पञ्चोपकरणानि - १३

(७२) पारिशेष्यम् - विकल्पेषु अन्यस्य सर्वस्य व्यावर्तनेन यदवशिष्यते तदेव तत्त्वमिति निर्धारणन्यायः - ५४,८६

(७३) पारिव्राज्यम् - ग्रहस्थाश्रमं तत्कर्म च त्यक्त्वा प्रतिपद्यमानः संन्यासः - १८,२१

(७४) पुरुषः - आत्मा - ५७,६२; विराट् - ३४,३८,६०; मनुष्यः - ४१,७४

(७५) पुरुषविधः - मनुष्यवत् शिरःपाण्यादिमान् - ३५

(७६) पुरुषाग्निः - छान्दोग्ये विहितस्योपासनविशेषस्य पञ्चाग्नीनां मध्ये पुरुषो यः - ७४

(७७) प्रजापतिः - विराट्पुरुषः - ८८

(७८) प्रत्यक्षम् - इन्द्रियैर्विषयाणां ज्ञानम् - ६३,६५

(७९) प्रत्यस्तमितसर्वोपाधिविशेषम् - नैकोऽप्युपाधिरूपो विशेषो यस्मिन् भवति तत् - ८९

(८०) प्रथमजः शरीरी - प्रथमोत्पन्नः शरीरी, विराट्पुरुषः - ४८, ८८

(८१) प्रथमोत्पादितःपिण्डः - प्रथमोत्पादितं शरीरम्, विराट्पुरुषस्य शरीरम् - ३८

(८२) प्रधानम् - सांख्यैर्जगत्कारणत्वेन प्रोच्यमाना मूलप्रकृतिः - २९

(८३) प्रज्ञात्मा - ज्ञानशक्तिप्रधानो हिरण्यगर्भः - ८८

(८४) प्रज्ञः आत्मा - चैतन्यरूपः परमात्मा - ९०

(८५) प्राणः - क्रियाशक्तिप्रधानो हिरण्यगर्भः - ८६,८८

(१०७)शास्त्रम् - वेदः - ७२,७७

(१०८)संयोगजम् - द्वयोः संयोगेनोत्पद्यमानम् - ६६,६८,६९

(१०९)संसारदोशाः - अशनायापिपासे, शोकमोहौ, जरामृत्यू इत्यदि - ८

(११०)संहतः - अन्येन सह संभूय चेष्टमानो वस्तुविशेषः - ५२

(१११)संहितोपनिषत् - अस्या उपनिषदोऽनन्तरं विद्यमान ऐतरेयारण्यकभागः - ५

(११२)संघातः - सर्वैः सम्भूय चेष्टमानमवयवजातं - ५३

(११३)सर्वगतः - सर्वत्र व्याप्तः - ६०

(११४)सर्वज्ञः - आत्मा, यः सर्वं जानाति - ३०,३१,५९,६१,६२,८१

(११५)सर्वशक्तिः - सर्वमप्युत्पादयितुं क्षमाभिः शक्तिभिर्युक्तः - ३१,५९, ६१

(११६)सर्वात्मभावः - सर्वेषामप्यात्मेति सर्वमप्यात्मैवेति भवनम् - ८१,८२

(११७)सर्वात्मकवस्तु - सर्वमपि स्वात्मभूतं वस्तु - १९

(११८)सर्वात्मा - सर्वेषामप्यात्मभूतः परमात्मा - ६०

(११९)सविशेषनिर्विशेषात्मानौ - इत्थमिति व्यपदेशार्हविशेषयुक्तं सगुणब्रह्म, समस्तविशेषरहितं परब्रह्म च - २७

(१२०)साध्यसाधने - पुत्रकर्मादिसाधनानि त्रयो लोकाः साध्याः - १३,१५,८२


(१२१)स्वतोऽप्राप्तम् - प्रत्यक्षादिभिरेवानिर्दारितं यत् - ११

(१२२)स्वर्गः - आनन्दरूपं ब्रह्म - ८१,८९

(१२३)हिरण्यगर्भः - ज्ञानशक्तिप्रधानभूतमपरब्रह्म - ८८

(१२४)हृदयाकाशः - सुषुप्तिकाले जीवस्य प्रतिपद्यमानं ब्रह्मणो स्वरूपम् - ५६

संस्थापकानां संस्मरणम्



श्री श्री सच्चिदानन्देन्द्र सरस्वतीस्वामिनः आ उदयाचलात् अस्ताचलपर्यन्तम् अभिनव शङ्कराचार्या इति सुप्रसिद्धम् । शाङ्करवेदान्तार्थस्य अस्मिन् विंशतितमशताब्दे प्रमाणीभूताः अधिवक्तारश्चेत्यत्र निर्मत्सरतया तद्ग्रन्थावलोकिना नास्ति विप्रतिपत्तिः । भाष्याणां तत्कृत कन्नडानुवादग्रन्थाः, तेषां टिप्पणयः, विषयविभागेन तत्तद्भाष्यभागस्य युक्त शिरोनामानि, विमर्शात्मकपीठिकाः, भाष्यसारश्चेत्येवमादयः विशेषाः संस्कृतभाषानभिज्ञानाम् जिज्ञासूनां वररूपेण विराजन्ते । संस्कृताभिज्ञानानां च विदुषां कृते जिज्ञासुजनमश्चकोरचन्द्रिकायमाणाः सुगमासूत्रभाष्यत्त्वविवेचन्यौ, माण्डूक्यरहस्यविवृतिः, नैष्कर्म्यसिद्धेः क्लेशापहारिणीव्याख्या-इत्यादीनि मेरुकृतिरूपव्याख्यानानि, स्वतन्त्राश्च वेदान्तप्रक्रियात्यभिज्ञा, शङ्करहृदयम् अथवा मूलविद्यानिरासः, गीताशास्त्रार्थविवेकः इत्येवमादयो ग्रन्थाः विरचिताः । तेषां च पठनचिन्तनाभ्यां करतलन्यस्तामलकवत् सर्वात्मभूतं परमार्थतत्त्वं जिज्ञासूनां हृदयङ्गम भवतीति न पृथग्वक्तव्यम् । एते महान्तः ५-१-१८८०तमे वर्षे अवतीर्णाः, १०-६-१९४८ तमे च संन्यासदीक्षामाधिगम्य, ५-८-१९८७तमे ब्रह्मीभूताः ।

आ सुप्तेरामृतेः कालं नयेद्वेदान्तचिन्तया इत्यस्य अभियुक्तवचनस्य प्रत्यक्षोदाहरणमासान् । अध्यात्मप्रकाशकार्यालय इत्येषां संस्था तैस्संस्थापिता । तयैतेषां परश्शतद्वयादिकाः ग्रन्थाः कन्नडाङ्ग्लसंस्कृतभाषाभिः प्रकटिता वेदान्तप्रपञ्चे अध्यात्मामरज्योतिमुद्दीपयन्ति । साक्षात् विद्याभिमानिनी सरस्वती एव तद्रूपेण अवतीर्णा यतोऽतः तान्पुरुषसरस्वतीति मन्यन्ते शिष्टाः । तेषां ग्रन्थाः देशविदेशेषु च प्रख्याताः । तत्कृतलोकोपकारम् आ चन्द्रार्कं विस्मर्तुं नार्हन्ति जनाः । इदानीमपि होळेनरसीपुरे तैस्स्थापितेयं संस्था नैरन्तर्येण तत्प्रदर्शिततदुपदिष्टमार्गानुसारेण च अध्यात्मविद्यापठनपाठनप्रचारान् तद्ग्रन्थानां च मुद्रणं कुर्वती अन्तराष्ट्रीयकेन्द्रत्वेन विराजते । निर्मत्सरास्सन्तः वाचकमहोदयाः सकृदत्रागम्य अनुभवन्तु तेषां विभूतिमाहात्म्यातिशयमिति सर्वं शिवम् ।

ब्रह्मनिष्ठाय विद्महे संयमीन्द्राय धीमहि । तन्नः सच्चिदानन्दः प्रचोदयात् ।।

ADHYĀTMA PRAKĀSHA KARYĀLAYA

Holenarasipura - 573 211, Karnataka - INDIA